अन्वयः—उदयनवेन्दुसवर्णौ आसवदत्ताबलौ पद्मावतीर्णपूर्णौ वसन्तकम्रौ बलस्य भुजौ त्वां पाताम्। व्याख्या बलस्य बलरामस्य कृष्णाग्रजस्य उदये उदयकाले नवः नवीनः इन्दुः 'चन्द्रः' तेन सवर्णौ समानवर्णौ तत्सदृशौ धवलौ संतापहरौ इति ध्वनिः, आसवेन मद्येन दत्तम् उत्पादितं जनितम् आ समन्तात् बलम् शक्तिः ययोः तौ पराक्रम-शीलौ। अथवा दत्तः आसवः यस्यै सा आसवदत्ता, 'वाहिताग्न्यादिषु' इत्यनेन दत्तशब्दस्य परनिपातः। आसवदत्ता अबला रेवती नाम बलरामस्य प्रियतमा भार्या तां। बलदेवस्य सुरापानव्यसनित्वं पुराणादिषु प्रसिद्धम्। 'हित्वा हालामभिमतरसां रेवतीलोचनाङ्काम्' इति मेघे कालिदासः। याभ्यां बाहुभ्यां बलरामः स्वप्रियायै रेवत्यै मद्यं समर्पयतिस्म तौ बाहू इति भावः। अनेन बलरामस्य

विलासिताङ्कलेन कविः उदयनस्य विलासित्वं ध्वनयति। पद्मायाः लक्ष्म्याः अवतीर्णेन अवतारेण विकाशेन, भावे क्तः, पूर्णौ सनाथौ लक्ष्मीवन्तौ श्रीसम्पन्नौ, वसन्त इव वसन्तकाल इव कम्रौ मनोज्ञौ एवंविधौ भुजौ बाहू त्वां सामाजिकवर्गं सभ्यदर्शकान् सम्मुखस्थितं नृपं वा पाताम् रक्षताम् । निर्विघ्ननाटकदर्शनानन्देन मर्घान् उपस्थितान् सभ्यान् आप्यायिनान् कुरुतामित्यर्थः। अत्र मुद्रालङ्कारः, सभंगादिश्लेषश्च । श्लेषभंग्या प्रस्तुतनाटकस्य प्रधानपात्राणाम् उदयन-वासवदत्ता-पद्मावती-वसन्तकानां निर्देशोऽपि तत्रभवता भासेन कृतः। एषा भासीया शैली तदीयेष्वन्येषु अपि प्रतिज्ञायौगन्धरायण-प्रतिमानाटकादिषु प्रायः दृश्यते। एवं वक्ष्यमाणप्रकारेण, आर्याश्च ते मिश्राश्च आर्यमिश्राः तान्। आर्याः सभ्याः, यथाह भरतः—'कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता। अद्रोह इति येष्वेतत्तानार्यान्सं-प्रचक्षते'॥ मिश्राः पूज्याः, पूज्यार्थे मिश्रपदं नित्यं बहुवचनान्तम्। विज्ञापयामि स्वकार्यं निवेदयामि। अये! आश्चर्ये विषादे वा। किंनु खलु इति जिज्ञासायां, मयि सूत्रधारे विज्ञापनव्यग्रे निवेदनचिन्तापरे, शब्दः इव अव्यक्तः कलकलः इव श्रूयते आकर्ण्यते । अंग! सम्भ्रमे। पश्यामि, केन कारणेनायमव्यक्तः शब्दः भवेत् इति सम्यक् प्रकारेण ज्ञास्यामि इति भावः।

NOTES :—

नन्दन्ति देवा अस्यां or नन्दयति देवद्विजनृपादीन् इति नान्दी, तस्याः अन्ते, नान्द्यन्ते has भावे ७मी, so the word ततः seems to be futile but it can be justified. ततः denotes 'immediately after' barring the intervention of any other action between the flourish of music and the entrance of the stage-manager. नान्दी means (a) 'benedictory verse' invoking the blessing of the gods, Kings or Brahmans for the unobstructed completion of the play. "आशीर्वचनसंयुक्ता स्तुति

यस्मात्प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता" । but the word नान्दी means (b) 'आनकं' a large military drum known as नगारा in Vernaculars and as it used to play the principal part in music, it came to mean metaphorically instrumental music in general. दुन्दुभिस्त्वानको भेरी भम्भा नान्दी च नान्द्यपि इति वैजयन्ती । or नन्दि means (c) 'joy' तस्य: इयं नान्दी, गीतवाद्यवादनक्रिया, i.e. singing and playing on music for 'joy' sake. नान्द्यन्ते means after the sally of music to attract the attention of the audience to the commencement of the play or to herald the appearance of the Sutradhara.

सूत्रधारः—सूत्रं धारयति इति सूत्र+धारि+अण् (कर्मणि अण्) । सूत्रधार means stage-manager, the principal actor who arranges the cast of the characters and instructs them, and takes a prominent part in the prelude (प्रस्तावना or स्थापना). His definition is:— नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात् सबीजकम् । रंगदैवतपूजाकृत् सूत्रधार इति स्मृतः ॥

उदयकालीनः नवेन्दुः इति उदयनवेन्दुः (मध्यमपदलोपी स.), समानः वर्णः ययोः तौ सवर्णौ, समानस्य सः (समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु), उदयनवेन्दुना सवर्णौ इति उदयनवेन्दुसवर्णौ । आसवदत्तापर्णौ:—(a) दत्तः आसवः यस्यै सा आसवदत्ता (वाहिताग्न्यादिषु), तादृशी अपत्ना स्वप्रियतमा याभ्यां तौ which offered wine to his beloved (b) आङ् समन्तात् बलम् शक्तिः इति आबलम् (प्रा० त०), आसवेन दत्तम् इति आसवदत्तम्, तादृशम् आबलं ययोः बाह्वोः तौ, which were highly invigorated by wine. (c) न बलम् इति अबलम् (नञ् त०) आसवदत्तम् अबलं

ययोः, which became languid on account of wine. Of these three (*a*) is suggestive of the loving nature of बलराम. His fondness for wine is well-known. He used to offer wine to his wife also, (*b*) seems to be suitable, as the strong arms alone can protect, and (*c*) goes against the very purpose of the benediction. Weak arms can't protect.

पद्मायाःअवतीर्णाम् अवतारः पद्मावतीर्णाम्, अव + तृ + क्तः (भावेक्तः), तेन पूर्णौ । वसन्तः इव कम्रौ इति (उपमान त. स.); कम्+र (नमि-कम्पिस्मय etc.). The poet has very *ingeniously* used such words, which construed promiscuously by dint of श्लेष, form the names of the principal characters उदयन, वासवदत्ता, पद्मावती and वसन्तक of the play. The figure, in which words are so arranged as to form all together new words, is called मुद्रालङ्कार, " सूच्यर्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः "

The metre here is आर्या. See appendix.

N. B.—(*a*) From various inscriptions and other occasional references is Sanskrit literature, it is now almost proved that सङ्कर्षण *i.e.* बलदेव was deified in Upper India along with श्रीकृष्ण near about the beginning of the Christian Era though in course of time Krishna cult went on developing but Balarama-worship declined. (*b*) This stanza fulfils all the purposes of the later नान्दी. It refers to the moon, invokes blessing on the audience, and suggests the subject matter. (*c*) In Post-Bhasa drama, नान्दी means 'a benedictory verse' recited

by somebody other than the Sutradhar, who enters at the close of the recitation of that verse. But in Bhasa's play, नान्दी means 'Sally of Music' and at its close the Sutradhar enters and he recites the 'benedictory verse'. This difference in technique as well as the short, undeveloped prologue proves the priority of Bhasa over all other dramatists.

एवं—Thus, in the way he had best proposed to himself. आर्याश्च मिश्राश्च इति आर्यमिश्राः तान्। मिश्राः is an honorific term and is used always in plural. Says Jaggadhar in मालतीमाधवटीका—and "as is seen in विष्णुपुराण e. g. मरीचिमिश्रैः दक्षेण"। आर्यः—(a) अर्यते सेव्यत्वेन गम्यते इति ऋ+ण्यत् or (b) आरात् यातः दूरंगतः अकार्यादिभ्यः इति आर्यः, or (c) आर्यः कुलशीलादिसम्पन्नः। यथाह भरतः—"कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता. अद्रोह इति येष्वेतत्तानार्यान् संप्रचक्षते". Another definition of आर्य is "कर्तव्यमाचरन् काममकर्तव्यमनाचरन्, तिष्ठति प्रकृताचारे स तु आर्य इति स्मृतः" इति वसिष्ठः। अये!—expresses surprise or vexation here. किंनु खलु is used to denote inquiry. "How is it"! इव coming after any word denotes 'something like', 'somewhat like' अंग is an indeclinable, meaning, 'well', 'indeed' etc.

पश्यामि—present tense is used to denote near future. 'वर्तमानसामीप्ये वर्तमानवद्वा'। It means 'द्रक्ष्यामि'।

नेपथ्ये (Behind the Scenes).

उस्सरह उस्सरह अय्या! उस्सरह। (उत्सरत उत्सरत आर्याः! उत्सरत). Get away, get away, gentlemen, get away.

सूत्रधारः—भवतु, विज्ञातम् ।

भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः ।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः ॥२॥

(निष्क्रान्तः)

स्थापना

The stage-Manager:—Well, I see. All the people in the penance-grove are peremptorily (or rudely) turned out by the faithful servants of the King of Magadha forming the retinue of the princess.

सूत्रः—भवतु अस्तु, विज्ञातं मया अवधारितम् ।

अन्वयः—तपोवनगतः सर्वः जनः मगधराजस्य कन्यानुगामिभिः स्निग्धैः भृत्यैः धृष्टम् उत्सार्यते। व्याख्या-तपोवनगतः आश्रमस्थः सर्वः बालवृद्धतापसादिः जनः लोकः मगधराजस्य मगधनरेशस्य मगधानां राजा इति 'राजाहःसखिभ्यष्टच्', कन्यानुगामिभिः अनुचरैः सहचरैः स्निग्धैः स्वामिभक्तैः भृत्यैः किंकरैः धृष्टम् धृष्टतापूर्वकम् उद्धतं यथा तथा उत्सार्यते मार्गात् दूरीक्रियते । एतः ते राज्ञः भृत्याः, तस्य कन्यायाः अनुचराः च, अतः गर्वान्विताः, तस्मात् ते सर्वान् तपोवनवासिनः जनान् उद्धतप्रकारेण उत्सारयन्ति ।

Notes

नेपथ्ये:—नेपथ्य means, "decoration, costume, dress, dressing room, or tiring room, *i.e.* the place behind the curtain where the actors attire themselves. Hence नेपथ्ये means "behind the scenes or the curtain". When some actors have not appeared on the stage, but are behind the curtain very near the stage, so near that their words can be heard by the audience, then we get 'नेपथ्ये'.

विज्ञातम्—I have definitely understood it. तपोवन-गतः—तपसः अवस्थानं वनम् इति शाकपार्थिवादित्वात् मध्य० लो० स० पु०, तत् गतः इति द्वि० त० पु०। मगधराजस्य:—मगधानां राजा इति, मगधराजन्+टच् by राजाहःसखिभ्यष्टच्. This was King Darsaka of Magadha, the son of Ajatasatru; a contemporary of Lord Buddha. स्निग्धैः—loving, devoted, faithful. स्निह्+क्त. धृष्टैः—धृष्+क्त (धृषेश्च विभाषा इति सूत्र)

सर्वः—all people without any distinction. The servants blinded with their loyalty to their master were turning out all men, whether ascetics or householders, young or old, without any discrimination. धृष्टम्:—boldly, rudely, peremptorily.

स्थापना—स्थाप्यते प्रस्तुतं कथावस्तु अस्याम् इति स्थापना, i.e., that in which the topic of the play is established. This is what the later writers on dramaturgy call आमुख or प्रस्तावना। In the time of Bhasa, स्थापना was very simple, so we do not find here stage-manager, unlike the Sutradhar of Kalidasa or other later dramatists, talking with his wife or servants, mentioning the drama, its another's name, describing the author's family, his personal attainments, the name of his protege, the occasion of the performance etc. This shows that the art of drama-writing was in its rudimentary stage and had not yet developed well as it did by the time of Kalidasa or others. The manager slips out of the stage saying ' All the people are turned out.' The prologue of स्वप्नवासवदत्तम् has many things in common with his other dramas which proves

genuinely that they were written by the same hand. (See Introduction).

प्रविश्य (Entering)

भटौ :— उस्सरह उस्सरह अय्या ! उस्सरह । (उत्सरत उत्सरत आर्याः ! उत्सरत)

Two GUARDS :—Move away, move away, Sirs ! Move away.

(ततः प्रविशति परिव्राजकवेषो यौगन्धरायण आवन्तिकावेषधारिणी वासवदत्ता च)

यौगन्धरायण :—(कर्णं दत्वा) कथमिहाप्युत्सार्यते ! कुतः

धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-
र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते ।
उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः
कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया ॥३॥

(Then enter Yaungandharayana in the dress of a mendicant and Vasavadatta in the costume of a lady of Avanti.)

Yaugandharayana :—(Lending his ear) How ? Here also people are driven out ! Why is terror caused to the equanimous-minded people, who clad in bark, are worthy of our respect, and who have resorted to the hermitages and live here well-contented with wild fruits ? Oh ! Who is this haughty man, all devoid of modesty, so puffed-up with his fickle fortune as to turn this peaceful penance-grove into a village by his (authoritative) command ?

भटौ :—राजकन्यायाः रक्षकौ द्वौ जनान् उत्सारयतः ।

कर्णौ दत्वा श्रुतिमभिनीय। कथम् इह अस्मिन् उत्साराणानुचिते शान्ते अपि सिद्धाश्रमे उत्सार्यते मार्गात् अपसार्यते। धीरस्येति।

अन्वय :—कुतः धीरस्य, आश्रमसंश्रितस्य, वन्यैः फलैः तुष्टस्य वसतः, मानार्हस्य, वल्कलवतः जनस्य त्रासः समुत्पाद्यते। भो अयम् कः उत्सिक्तः, चलैः भाग्यैः विस्मितः विनयादपेतपुरुषः यः इदम् निभृतम् तपोवनम् आज्ञया ग्रामीकरोति ?

व्याख्या :—धीरस्य स्थिरधियः विषयविरक्तस्य आश्रमसंश्रितस्य आश्रमवासिनः वन्यैः वनजातैः फलैः तुष्टस्य तृप्तस्य वसतः मानार्हस्य श्रद्धेयस्य वल्कलवतः वल्कलधारिणः जनस्य लोकस्य त्रासः भयम् समुत्पाद्यते जन्यते। आश्रमवासिनः सर्वथा सन्तुष्टा निष्कामा निरपराधाश्च, तेभ्यो भयप्रदर्शनं नितान्तमनुचितमिति भावः। उत्सिक्तः उद्धतः विनयात् शीलात् अपेतः भ्रष्टः विनयादपेतः, [न्यापेक्षत्वेऽपि गमकत्वात् समासः] शीलभ्रष्टः पुरुषः जनः चलैः चञ्चलैः नश्वरैः भाग्यैः विभवैः विस्मितः गर्वितः अवलिप्तः कः अयम् यः इदम् निभृतम् शान्तम् तपोवनम् आज्ञया निदेशेन ग्रामीकरोति ग्रामतुल्यतां नयति [अभूततद्भावेच्विः, अस्य च्वौ] यथा ग्रामे स्वनिदेशप्रचारं कारयति तथैव अत्र तपोवनेऽपि अहो आश्चर्यम् ! ग्रामतुल्यं कृतम् इदं तपोवनम्, इति भावः। शार्दूलविक्रीडितं वृत्तम्।

NOTES

उत्सरत उत्सरत :—संभ्रमे द्विरुक्तिः according to 'संभ्रमेण प्रवृत्तौ यथेष्टम् अनेकधा प्रयोगो न्यायसिद्धः' *i. e.*, in expressing perplexity or alarm, a word may be repeated twice or as many times as will make the meaning of the *speaker clear to the person addressed.*

धीरस्य :—धियं बुद्धिं राति ददाति इति धी+रा+कः firm-minded, equal-minded. "विकारहेतौ सति विक्रियन्ते येषां न

चेतांसि त एव धीराः ।" कालिदासः K. I. 59. See Gita for स्थितप्रज्ञ as well.

आश्रमसंश्रितस्य :—आश्रमं संश्रितः इति (२या तत्); resorted to the hermitage for refuse. This shows that they, finding the world full of troubles and turmoils, renounced it and resorted to the penance-forest. This interpretation is fully supported by the coming verse, "नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति A. I. 5. ।"

वन्यैः—वने जातानि इति वन+यत्=वन्य, तैः फलैः तुष्टस्य तृप्तस्य वसतः, living contented with wild fruits.

उत्सिक्तः—उत्+सिच्+क्तः, उत्+सि —to be puffed up, to be elated.

विनयादपेतपुरुषः—(a) विनयात् अपेतः इति विनयादपेतः (अलुक् स०) विनयादपेतश्चासौ पुरुषश्च इति विनयादपेतपुरुषः, (कर्म० स०) the man devoid of modesty. The word विनय is connected with अपेत in sense and so both of them should be compounded according to अपेतापोढ etc., but विनयात् is left out and अपेत is compounded with पुरुषः by सापेक्षत्वेऽपि गमकत्वात् समासः ।

(b) विनयात् अपेताः इति विनयादपेताः, तादृशाः पुरुषाः यस्य (ब० व्री०) whose servants are devoid of modesty. Like masters, like servants. Bad servants reflect discredit on the part of their masters. I think the reading विनयाद्यपेतपुरुषः is better and does not mar the metre.

चलैः भाग्यैः—This shows that Fortune is fickle. One should not be proud of his evanescent wealth. अचिरांशुविलासचंचला ननु लक्ष्मीः फलमानुषङ्गिकम् (Kir. II. 19)

Remember मा कुरु धनजनयौवनगर्वं, हरति निमेषात् कालः सर्वम् ।

विस्मितः—वि+स्मि+क्त, puffed up, to be conceited. *cf.* न विस्मयेत तपसा, Manu 4. 236. "विहगवाहनमात्रविस्मिता हुतः" इ० वा० p. 34.

निभृतम् :—Noiseless, silent, hence peaceful.

ग्रामीकरोति :—अग्रामं ग्रामं करोति इति ग्राम+च्वि+कृ लट् ति, "कृभ्वस्तियोगे सम्पद्यकर्तरिच्विः, अभूततद्भावे"। 'अस्य च्वौ इत्यनेन अवर्णस्य ईत्'। आज्ञया—By his command. The man, being puffed-up with his fortune is getting his orders proclaimed by his servants even in this holy place. He is treating even this sacred place like his zamindari village, which is highly improper.

वासवदत्ता—अय्य ! को एसो उस्सारेदि । (आर्य ! क एष उत्सारयति).

Vasavadatta—Sir, who is driving out ?

यौगन्धरायण :—भवति ! यो धर्मादात्मानमुत्सारयति ।

Yaugandharayana—Madam, he who drives himself away from piety, or deprives himself of piety.

वासवदत्ता :—अय्य ! ण हि एव्वं वत्तुकामा, अहं वि णाम उस्सारइदव्वा होमि त्ति । [आर्य ! न ह्येवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति]।

Vasava—Sir, I do not mean to say so. Am I also to be turned out ?

यौगन्धरायण :—भवति ! एवमनिर्ज्ञातानि दैवतान्यवधूयन्ते ।

Yaug—Madam, even gods when not known are so slighted.

वासवदत्ता—अय्य ! तह परिस्समो परिखेदं ण उप्पादेदि, जह अअं परिभवो । [आर्य ! तथा परिश्रमः परिखेदं नोत्पादयति यथायं परिभवः] ।

Vasava—Sir, fatigue does not tire so much as this insult.

यौगन्धरायण :—भुक्तोज्झित एष विषयोऽत्रभवत्या । नात्र चिन्ता कार्या । कुतः

पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः ।
कालक्रमेण जगतः परिवर्तमाना,
चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः ॥४॥

Yaug—This object was enjoyed and given up by your ladyship. Do not think over it. For :—such a gait *i.e.* going out in a state-procession was formerly liked by you also or formerly you, too, used to go about so laudably. Again, on the victory of your husband, you shall go out pompously or grandly. The course (lit. row) of the fate of people, goes on revolving up and down like the row of the spokes of a wheel, according to the course of time.

आर्येति—क एष पुरुषाधमो योऽनुचितोत्सारणां करोति । भवतीति—भवति ! पूज्ये ! यो धर्मात् पुण्यात् आत्मानम् उत्सारयति पातयति । ईदृशोऽनुचितोत्सारणाकारी नूनं धर्मभ्रष्टो भवेत् । आर्येति—न हि एवं वक्तुं कामो मनो यस्याः सा, वक्तुकामा (तुम् काममनसोरपि) कथितुमिच्छामि । किमसौ अनुचितोत्सारणाकारी स्वकार्यस्य फलाफलं जानाति न वेति ज्ञातुं नाहमिच्छामि । परन्तु

कीदृशोऽसौ जनः ? किमसौ मां परमेश्वरीमपि सामान्यलोकवत् मार्गात् उत्सारयिष्यति।

भवतीति—एवम् अनेन प्रकारेण अनिर्ज्ञातानि अविदितानि दैवतानि अपि देवा अपि अवधूयन्ते तिरस्क्रियन्ते। तर्हि का कथा मनुष्याणाम् ?

आर्येति—परिश्रमः अध्वश्रमः कौशाम्ब्याः राजगृहागमनयात्रायाः श्रमः क्लेशः परिखेदं क्लान्तिं नोत्पादयति न जनयति। अध्वश्रमात् उत्सारणाजन्यापमानः अधिकक्लेशकरः इति भावः।

भुक्तेति—पूर्वं भुक्तः आस्वादितः पश्चात् उज्झितः त्यक्तः एषः विषयः परिजनकृतोत्सारणापूर्वकगमनरूपोऽर्थः।

अन्वयः—पूर्वं त्वया अपि एवम् अभिमतं (यथा तथा) गतम् आसीत्। पुनः भर्तुः विजयेन श्लाघ्यं गमिष्यसि। जगतः भाग्यपंक्तिः चक्रारपंक्तिः इव कालक्रमेण परिवर्त्तमाना गच्छति।

व्याख्या:—पूर्वं पूर्वस्मिन् काले यदा त्वं राज्ञी आसीः तदा त्वया स्वराज्यवर्त्तिन्यापि एवम् अभिमतमिष्टं यथा तथा (क्रियाविशेषणं तथा) गतं गमनमासीत्। भर्तुः तत्रभवतः उदयनस्य, विजये सफलतायां, पुनरपि श्लाघ्यं परिजनोपेतं यथा तथा सविलासं गमिष्यसि। तदेव सामान्येन समर्थयते :—जगतः लोकस्य भाग्यपंक्तिः दैवविहिता दुःखसुख-श्रेणिः कालक्रमेण समयानुसारेण अनुकूलप्रतिकूलसमयपरिपाट्या चक्रारपंक्तिः चक्रस्य अराणाम् दण्डानाम् पंक्तिः इव परिवर्त्तमाना भ्रमन्ती गच्छति क्वचिदुच्चैर्गच्छति क्वचिन्नीचैर्गच्छति। अस्यानुरूपो भावो यथा मेघदूते "नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण"। यथा वा शाकुन्तले "तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां, लोको नियम्यत इवैष दशान्तरेषु"। वसन्ततिलकावृत्तम्। उपमालङ्कारः।

Notes:—वक्तुं कामःयस्याः सा वक्तुकामा। म् of वक्तुम् disappears by the Karika "लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपि। समो वा हिततत्योर्मांसस्य पचि युड्घञोः"।

न हि एवं वक्तुकामा—She means to say "I do not mean to ask who this man is that is clearing the road so rudely even in this holy place. Does he know the consequence of his unrighteous action or not." but rather 'Shall he possibly drive me also out like an ordinary man'?" Yaugandharayana, himself didn't like the driving out of the pious and so he thought that the guards' manner of asking the pious people to get out was perhaps painful to her and so he remarked "the man, so rudely driving out people, must go to hell." To this Vasava had so rejoined. देव एव इति देव + तल् (स्वार्थे) + टाप् स्त्रियाम्=देवता; देवता एव इति दैवतम्, देवता+अण् (स्वार्थे). It is an instance of double addition of स्वार्थ affix. भुक्तोज्झितः—पूर्वं भुक्तः पश्चात् उज्झितः The rule is "पूर्वकालैक सर्वजरत्पुराणनवकेवलाः"। विषयः refers to her previous walking in a state-procession, in a manner befitting her royal position, when attendants and bodyguards following her whenever she used to go out, used to cry out to people "Go away from the way, Go away, the Queen is coming."

पूर्वं त्वया etc.—This sentence can be construed severally.

(i) पूर्वं त्वयापि एवम् अभिमतं यथा तथा (adverb) गतमासीत् *i.e.* Formerly you, too, walked so grandly, *i.e.* in such a laudable (covetable) manner. अभिमत is used here as an adverb.

(ii) पूर्वं त्वयापि एवं गतम् अभिमतम् आसीत् *i.e.* formerly,

such a walk in a state-manner was liked by you, too. Here एवं meaning एवंविधम् is like an adj. to गतम् and त्वया is the nom. of अभिमत, अभि + मन् = to desire, to approve.

(*iii*) पूर्वं त्वयापि गतम् एवमभिमतमासीत् ; पूर्वं त्वयापि त्वत्कृतमपि गत् गमनम् एवम् इत्थम् अभिमतं लोकैः प्रशंसितम् आसीत् *i.e.*, formerly your walk or movement also was esteemed so by the people. In this अभिमत is taken as a finite verb of लोकैः and used as a predicate to गतम्। गम् + क्तः (भावे) = गतम् । अभिमतम्—क्रियाविशेषणे द्वितीया is the first case only ; श्लाघ्यम्—क्रिया वि० २या, grandly. Yaug, means to say " You also used to walk in a state procession surrounded by your guards and servants, proclaiming your march and driving out the people from the path. And, again I assure you that after the victory of your husband, you shall again enjoy the same kind of grand state procession. Nothing remains in the same condition for ever; Yours also shall be a bright day, though due to evil time you are now reduced to this condition." जगतः—लोकस्य, of the peoples, use of the word in this sense is rare. कालक्रमेण —As time passes on, according to the course of time. कालस्य समयस्य क्रमः गतिः तेन, करणे ३या । अराः—spokes of a wheel. Parrallel thoughts, in मेघ, " नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ". Again in शाकुन्तल " तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां लोको नियम्यत इवैष दशान्तरेषु ". Dr. Sarup says : " पूर्वं त्वयापि अभिमतम् गतमेवमासीत् ।" First, even you gave your consent, this was the

only course of action." Of course a novel interpretation.

भटौ—उस्सरह अय्या ! उस्सरह । (उत्सरत आर्याः ! उत्सरत)

Guards—Move away Gentleman, move away.

(ततः प्रविशति काञ्चुकीयः)

(Then enters the Chamberlain).

कांचुकीयः—संभषक ! न खलु न खलूत्सारणा कार्या । पश्य

परिहरतु भवान् नृपापवादं
न परुषमाश्रमवासिषु प्रयोज्यम् ।
नगरपरिभवान् विमोक्तुमेते
वनमभिगम्य मनस्विनो वसन्ति ॥ ५ ॥

The Chamberlain—Sambhasaka, driving out must not be done, O must not be done. See—You should avoid bringing reproach on the King. No harshness (*i.e.*, harsh words) should be used to the denizens of the hermitage. In order to avoid the slights of town, these high-souled persons, coming here, reside in the forest.

उभौ—अय्य ! तह । (आर्य ! तथा)

Both—Just as you say, Sir.

काञ्चुकीयः—अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः । सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते । मातृगुप्तस्तु "ये नित्यं सत्यसम्पन्नाः कामदोषविवर्जिताः । ज्ञानविज्ञानकुशलाः काञ्चुकीयास्तु ते स्मृताः ॥ न खलु न खलु,—संभ्रमेण प्रवृत्तौ द्विरुक्तिः ।

अन्वयः—भवान् नृपापवादं परिहरतु, आश्रमवासिषु परुषं न प्रयोज्यम् एते । मनस्विनः नगरपरिभवान् विमोक्तुम् वनम् अभिगम्य वसन्ति ।

CHAMBERLAIN—Listen, Holy sirs. This is the sister, Padmavati by name, of our Sovereign, who is called Darsaka by his elders. She, after paying a visit to the Dowager queen, our King's mother, who is now residing in the hermitage, and being permitted by her, goes to very Rajagriha. So she desires to take up her residence, today in this hermitage.

Your reverences, therefore may take away freely, the holy water, faggots, flowers and Kusagrass. The princess, fond as she is of religion, would not certainly desire the obstruction of the religions rites of the hermits. This is her family vow.

हन्त ! हर्षे, उत्सारणानिवारणात् स्वप्रवेशसंयोगलाभात् च हन्तेति—'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः। अस्य काञ्चुकीयस्य दर्शनं बुद्धिः पर्यालोचनं वा सविज्ञानं विशिष्टेन ज्ञानेन कर्त्तव्याकर्त्तव्यविचारेण युक्तम् अस्ति। अस्य बुद्धिः परिष्कृता। विवेकपूर्णा च भाति इति भावः। तपस्विन् ! इतिपरिव्राजकवेषदर्शनात् इदमामंत्रणपदम्। आत्मगतम् अन्यैःश्रोतुमशक्यम्, स्वस्मिन् एव चिन्तितम्, स्वगतम्। तदुक्तं—"सर्वश्राव्यं प्रकाशं स्याद्श्राव्यं स्वगतं मतम्"। आलापः सम्बोधनं गुणवान् श्लाघनीयः एवं, वेशसदृशः संमानसूचकः एव। तु किन्तु अपरिचयात् परिचयाभावात् अद्यावधि नाहं कदापि एवं केनापि संबोधितः, अतो न परिचितोऽयमालापविधिः। तस्मात् मे मनसि चेतसि न श्लिष्यते संलगति। नाहमनेन प्रसन्नोभवामि इतिभावः। आत्मनेपदं तु कर्मकर्तृवाच्ये कर्मवद्भावात् समर्थनीयम्। ओदनः पच्यते इतिवत्।

भो इति—गुरुभिः श्रेष्ठजनैः पित्रादिभिः अभिहितं कृतं नामधेयं अभिधानं यस्य, तस्य कृताभिधानस्य अस्माकं मगधदेशवासिनां महाराजदर्शकस्य अजातशत्रुपुत्रस्य विम्बिसारपौत्रस्य दर्शकनाम्ना

इतिहासप्रसिद्धस्य मगधेश्वरस्य भगिनी स्वसा । महाराजमातरं दर्शकजननीं अजातशत्रोः विधवां धर्मपत्नीं आश्रमस्थां वर्द्धके तपस्यार्थं तपोवने वसन्तीमभिगम्य मिलित्वा अनुज्ञाता तथा आदिष्टा पुनः राजगृहमेव मगधराजधानीं यास्यति । अभिप्रेतः रुचितः इष्टः ।

अन्वयः—भवन्तः तपोधनानि तीर्थोदकानि समिधः कुसुमानि दर्भान् च वनात् स्वैरम् उपनयन्तु । हि नृपसुता, धर्मप्रिया अतः तपस्विषु धर्मपीडाम् न इच्छेत् । एतत् अस्याः कुलव्रतम् । व्याख्या—तत् तस्मात् कारणात् भवन्तः सर्वे तपस्विनः तपोधनानि तपसः-धनानि उपकरणानि द्रव्याणि, तीर्थोदकानि तीर्थजलानि समिधः होमकाष्ठानि, कुसुमानि पुष्पाणि, दर्भान् कुशान् च वनात् अरण्यात् स्वैरं यथेच्छम् निर्बाधम् उपनयन्तु समाहरन्तु गृह्णन्तु । हि यतः नृपसुता राजकुमारी धर्मप्रिय धर्मःप्रियाः यस्याः सा, प्रियधर्मा धर्मरुचिः [वा प्रियादिषु], अतः एषा तपस्विषु तपोधनेषु धर्मपीडां धर्मक्रियोपरोधं नेच्छेत् न वाञ्छेत् । एतत् धर्मानुपरोधनम् अस्याः राजकुमार्याः कुलव्रतम् वंशपरम्परागतो नियमः । काव्यलिङ्गालंकारः, वसन्ततिलकावृत्तम् ।

Notes :—

'हन्त'—It is an अव्यय, an interjection used to express, joy, pity or grief, and sometimes it is used in the beginning of a sentence. "हन्त हर्षेऽनुकम्पायां वाक्यारंभविषादयोः"

हन्त ! सविज्ञानमस्य दर्शनम्—This line can be interpreted variously.

(i) If दर्शन means remark, observation or doctrine, then, Joy ! his observation or remark is very wise. (ii) If दर्शन means बुद्धि i e. mind, then, Joy ! his mind is very discreet. (iii) If दर्शन means appearance, then, joy ! his appearance is very intelligent. The first is the most suitable as Yaug, who was as yet disgusted with the

manner in which the guards were driving out all indiscriminately from the public path could not but admire the wise proclamation of the *Brahman* Chamberlain who prohibited them from treating the ascetics harshly, so in admiration of the Chamberlain's noble order, he exclaims in joy, " Aha ! how wise the remark of the Chamberlain is !" The second interpretation also seems to be fair as this also praises the prudence of Chamberlain's mind, but the third, though sensible, does not suit the context as Yaug was not charmed with the intelligent face of Chamberlain. Other explanations, offered by different learned commentators are all irrelevant and senseless. तावत्—first, just, as much as, etc. आत्मगतम्—to himself; when the speaker wants that his speech should be heard by all then 'प्रकाशम्' is used by the dramatist but if his speech is not desired to be heard then स्वगतम् or आत्मगतम् is used. 'सर्वश्राव्यं प्रकाशम् स्यादश्राव्यं स्वगतं मतम्'। श्लिष्यते should be परस्मैपदी। आत्मनेपद in कर्मकर्तृवाच्य। महाराजदर्शक.—He was Ajatasatru's son and Bimbisar's grandson. Bimbisar had fortified Rajagriha for fear of the invasion of मालवराज प्रद्योत। The relics of this fort are still to be seen at 'Rajagira' in Patna district at short distance from the old site of the Nalanda University. Ajatasatru had built a small wooden fort at the confluence of the Sona and the Ganga to check the invasion of the Lichchavis of Baisali, but the capital was at Rajagriha, and it was so in दर्शक's time. It was उदयन the son and successor of दर्शक who ...d the capital from राजगृह to पाटलिपुत्र। महादेवी

refers to the wife of अजातशत्रु, mother of दर्शक। Owing to her old-age and widowed life, she had repaired to the penance-grove for practising penance. Her grown-up daughter पद्मावती, used to pay visit to her occasionally. She is now coming back from her mother and wants to pass that day in that place. स्वैरम्—स्वस्य, आत्मनः ईरः गमनं गतिः इति स्व+ईरः स्वैरः, 'स्वादीरेरिणोः' इत्यनेन वृद्धिः। स्वैरः यस्मिन् कर्मणि तत् यथा स्यात् तथा स्वैरम् (adverb), according to one's wish. धर्मप्रिया—धर्मः प्रियः यस्याः सा, (ब. व्री.), प्रियधर्मा also by 'वा प्रियस्य'। इच्छेत्—अधीष्टे विधिलिङ् *i.e.*, in expressing politely one's wish. एतत्—विधेयप्राधान्यात् नपुंसकम्।

यौगन्धरायणः—(स्वगतम्) एवम्। एषा सा मगधराजपुत्री पद्मावती नाम, या पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति। ततः

प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥ ७ ॥

Yaug—(To himself). So it is! She is that princess of Magadha, Padmavati by name, who has been declared by astrologers Puspaka, Bhadra and others to be the queen of our Master. Hence 'Hatred or respect springs up from one's own (mind's) idea.' I regard her as my own, because I desire her to be wife of my master.

वासवदत्ता—(स्वगतम्) राजदारिअत्ति सुणिअ भइणिआसिणेहो वि मे एत्थ सम्पज्जइ। [राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मे अत्र संपद्यते]

Vasav—(To herself). Hearing that she is a princess, I feel a sisterly attachment for her.

(ततः प्रविशति पद्मावती सपरिवारा चेटी च)

(Then enters Padmavati with her retinue as well as a maid).

चेटी—एदु एदु भट्टिदारिआ, इदं आस्समपदं पविसदु [एतु एतु भर्तृदारिका, इदमाश्रमपदं प्रविशतु]

Maid—Come, come princess. Enter this hermitage.

स्वगतेति—मगधराजपुत्री मगधदेशस्य राजकुमारी । पुष्पकभद्रादिभिः पुष्पक-भद्रौ आदि येषां तैः तदाख्यैः आदेशिकैः दैवज्ञैः भविष्यद्वक्तृभिः । आदिशन्ति भविष्यदर्थमिति आदेशिकाः । आदिष्टा कथिता । स्वामिनः अस्माकं नृपस्य उदयनस्य ।

प्रद्वेषेति । व्याख्या—प्रद्वेषः विद्वेषः घृणा बहुमानो वा समादरो वा सङ्कल्पात् मनःव्यापारात् उपजायते उत्पद्यते । यथा मनसा कमपि विभावयति तथैव तेन सह व्यवहारं करोति । भर्तुः दाराः, तान् अभिलाषी, तस्य भावः, तस्मात् भर्तुदाराभिलाषित्वात् । इयं मे स्वामिनः दाराः भवेत् इति मे अभिलाषः । तस्मात् अस्यां राजकुमार्यां मे महती गुरुः स्वता आत्मीयता आत्ममीयजनबुद्धिः अस्ति। पूर्वमुत्सारणाप्रवर्तिकां मत्वा मम द्वेषः अधुना स्वामिनो भाविनीं पत्नीं बुद्ध्वा मे स्नेहः । अहो स्वार्थमहिमा ! यथोक्तं कालिदासेन 'कामी स्वतां पश्यति' । अर्थान्तरन्यासः । काव्यलिंगं च । अनुष्टुप् वृत्तम् ।

राजदारिकेति—भगिनिकास्नेहः सौदर्यप्रेम । उभे आर्या राजदारिके, अतः अस्यां पद्मावत्यां मे सौन्दर्यास्नेहः स्वाभाविकः । अपिशब्दात् ' न केवलं भर्तुरभ्युदयहेतुतयाभिमता सपत्नी तु स्नेहमयी भगिनी अपि इति लक्ष्यते ।

Notes :—पुष्पकभद्रादिभिः—पुष्पकश्च भद्रश्च तौ आदी येषां तैः । पुष्पक, भद्र and other court-astrologers Kausambi had declared that the King would get back his Kingdom through the help of the King of Magadha on marrying

his sister Padmavati. Their astrological calculations and prophecies always used to come true. सङ्कल्पात्—सङ्कल्प. Means a definite idea formed in mind about any object (*i.e.* a thing or a person), presented to the mind. In logical term, संकल्प means 'Concept'. If a man forms a good idea about any person, then he loves him, if bad, then he hates him. भर्तृदाराभिलाषित्वात्—See Vyakhya. As I wish that she should be the wife of my King, so my affectionate regard for her. Previously I felt aversion for her as I knew her then as the promulgator of bad order of driving, but now I regard her as our own, knowing that she is the future wife of our lord. स्वता स्वस्य भावः, आत्मीयता kindred, regard as one's own relation. भगिनिकास्नेहः—Sisterly love. अपि reveals her inner thoughts. I do not only esteem her highly because of her being the cause of the future prosperity of my husband but I have come to love her like a sister on knowing that she, too, is a princess. परिवारः—परि परितः वारयति इति परि+वृ+घञ्, attendant, retinue. पदम्—स्थानम्, place site.

(ततः प्रविशत्युपविष्टा तापसी)

(Then appears on stage a lady-hermit seated.)

तापसी—साअदं राजदारिआए। [स्वागतं राजदारिकायाः]

Lady Hermit—Welcome to the princess.

वासवदत्ता—(स्वगतम्) इअं सा राजदारिआ। अभिजणाणुरूवं खु से रूवं। [इयं सा राजदारिका। अभिजनानुरूपं खलु अस्या रूपम्]

Vasav—(To herself). She is that princess! Her beauty is indeed worthy of her noble lineage.

पद्मावती—अय्ये ! वन्दामि । [आर्ये ! वन्दे]

Padma—Revered lady, I salute you.

तापसी—चिरंजीव । पविस जादे । पविस तवोवणाणि णाम अदिहिजणस्स सग्गेहं । [चिरंजीव । प्रविश जाते । प्रविश । तपोवनानि नाम अतिथिजनस्य स्वगेहम्]

Lady Hermit—Live long, come in, my child, come in ! Penance-groves are, indeed, guests' or visitors' own home.

पद्मावती—भोदु, भोदु । अय्ये ! विस्सत्थम्हि । इमिणा बहुमाणवअणेण अणुग्गहिदम्हि ।

Padma—Well, well, revered lady, I feel quite at home. I am obliged to you for these words of great regard.

वासवदत्ता—(स्वगतम्) ण हि रूवं एव्व, वाआ वि खु से महुरा । [न हि रूपमेव, वाचापि खलु अस्याः मधुरा]

Vasav—(To herself). Not only her appearance, but her speech also is sweet *i.e.*, charming.

तापसी—भद्दे ! इमं दाव भद्दमुहस्स भइणिअं कोवि राआ ण वरेदि । [भद्रे ! इमां तावत् भद्रमुखस्य भगिनिकां कश्चित् राजा न वरयति]

Lady Hermit—My good woman, does not any prince solicit the hand of this sister of our blessed (lit. noble-faced) King ?

चेटी—अत्थि राआ पज्जोदो णाम उज्जइणीए । सो दारअस्स कारणादो दूदसम्पादं करेदि । [अस्ति राजा प्रद्योत नामोज्जयिन्याः । स दारकस्य कारणाद् दूतसम्पातं करोति]

Maid—There is King named Pradyota of Ujjayini. He sends his messengers on behalf of his son.

वासवदत्ता—[आत्मगतम्] भोदु, भोदु । एसा अ अत्तणीआ दाणिं संवुत्ता । [भवतु, भवतु । एषा चात्मीयेदानीं संवृत्ता]

Vasav—Well, I see. She has now become my own relation.

तापसी—अर्हा खु इअं आइदी इमस्स बहुमाणस्स । उभआणि राअउलाणि महत्तराणि त्ति सुणीअदि । [अर्हा खलु इयम् आकृतिः अस्य बहुमानस्य । उभे राजकुले महत्तरे इति श्रूयते]

Lady Hermit—Worthy, indeed, is this form of this high honour. Both royal families are highly exalted.

पद्मावती—अय्य ! किं दिट्ठो मुणिजणो अत्ताणं अणुग्गहीदुं । अभिप्पेदप्पदाणेण तपस्सिजणो उवणिमन्तीअदु "दाव को किं एत्थ इच्छदि' त्ति । [आर्य्य ! किं दृष्टो मुनिजनः आत्मानम् अनुग्रहीतुम् । अभिप्रेतप्रदानेन तपस्विजनः उपनिमन्त्र्यताम् तावत् "कः किमत्र इच्छति' इति]

Padma—Noble Sir, did you see any sage to oblige ourselves (by accepting our gifts) ? Let the hermits be, first, invited for (taking) the gift of their desired objects thus ' who wants what here ?'

स्वागतम् शोभनागमनम् । अभिजनानुरूपम्—अभिजनस्य उच्चवंशस्य अनुरूपं योग्यं सदृशम् । यथैवास्या वंशः उच्चः तथैव सौंदर्यमपि रमणीयम् । स्वगेहम्—स्वस्य आत्मनः गेहम् गृहम् । वत्से ! तपोवनं स्वकीयमेव गृहं मत्वा निश्शङ्कं प्रविश इति तस्यास्तात्पर्यम् । नाम प्राकाश्य-संभाव्य क्रोधोपगमकुत्सने । अत्र प्राकाश्यवाची । भवेति—भवतु, भवतु—संभ्रमे द्विरुक्तिः । अजमजमत्यादरेण, त्वच्चरणदास्या मम एतावदेव तावदलम् । विश्वस्ता निःशङ्का, सुखोपविष्टावां भद्रे !

इति चेट्याः सम्बोधनम् । भद्रमुखस्य सौम्यदर्शनस्य महाराज-दर्शकस्य । न पश्यति विवाहार्थं न प्रार्थयते किम् इति प्रश्नकाकुः । प्रद्योतः इतिहासप्रसिद्धः महाप्रभावशाली मालवनरेशः । दारकस्य गोपालकनामकस्य पालक नामकस्य वा स्वपुत्रस्य कारणात् पद्मावत्या सह विवाहकरणार्थं दूतसम्पातं दूतप्रेषणं दूतमुखेन विवाहचर्चां करोति । आत्मीया निजा सम्बन्धिनी भ्रातृपत्नीत्वात् । अर्हति इति अर्हा योग्या, अर्ह+अच्+टाप् । आकृतिः, रूपलावण्यम्, आकारः । राजकुले मगधराजवंशः मालवनृपवंशश्च महत्तरे प्रशस्ते, उच्चे । आत्मानम् नाम स्वयम् अनुग्रहीतुम् कृतार्थयितुम् । मम दानं प्रतिगृह्य मां कृतार्थां करिष्यति, ननु स प्रतिग्राही एव धन्यधन्यो भविष्यति । धार्मिकभावादेव दानं करोतिस्म सा राजकुमारी इति सूच्यते ।

Notes :

इयं सा राजदारिका—She is that princess who is to be married by my husband or about whom the Chamberlain has said so much just now. अभिजनानुरूपम्—अभिजनस्य वंशस्य अनुरूपं सदृशम् इति, अनुगतं रूपमिति (प्रा० त०) *'नाम'* means 'well-known', it is well-known that hermitage, etc., see व्याख्या ।

अतिथि—अतति सन्ततं गच्छति इति अत्+इथिन् । or न तिथिः द्वितीया यस्य स । As *says* Manu "एकरात्रं तु निवसन्नतिथिः ब्राह्मणः स्मृतः" ।

स्वगेहम्—यथाह भवभूतिः यथेच्छं भोग्यं वो वनमिदम् etc. उत्तरच । भवतु—संभ्रमे द्वित्वम् ।

विश्वस्ता—Confident, I feel quite at ease here. बहुमान-वचनेन—by the word of high honour. It refers to saying "तपोवनानि नाम अतिथिजनस्य स्वगेहम्" । भद्रमुख—A term used in addressing a prince by low class characters. As

says S. Darpan. "सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः"
VI. But was तापसी a low class character ? Mr. Sylvan Levy, a great French Orientalist says that it was used for the first time in inscription of the Western Scythian Satraps of Ujjayini in the 2nd C. A. D. and so perhaps it has a Scythian Origin. प्रद्योत—was a very powerful ruler of Malwa in the 5th C. B. C. He was a contemporary of Lord Buddha, Bimbisara. Ajatasatru and Udayana. His full name was महासेनचण्डप्रद्योत। He had one daughter; Vasavadatta, Our heroine and two sons, Gopalaka and Palaka, for either of whom he was seeking the hand of पद्मावती। भवतु भवतु—Repetition shows her great delight at hearing that news. आत्मीया—आत्मनः इयमिति आत्मन्+छ+टाप् (स्त्रियाम्), she was to be her own brother's wife. बहुमानस्य—This great honour consisted in being sought for by the bride-groom's father; the custom is that the bride's father searches for the bride-groom. Or it may refer to her being married in the most rising family of Ujjayini. आत्मानम् अनुग्रहीतुम् —for doing favour to her own self. The sense is 'for getting favour done to her own self by the sage accepting a gift.' *i.e.*, आत्मानमनुग्राहयितुम्। She means that the sage, by accepting her gift, shall be obliging her and not being obliged to her. She considered giving of alms as a pious act meant more for the merits of the giver than those of the taker. अभिप्रेतप्रदानेन—अभिप्रेतस्य इष्टस्य प्रदानेन (हेतौ ३या) for the gift of the desired things, or करणे ३या if it means, 'with the offer of the gift of etc.' अभि+प्र+इ+क्तः।

काञ्चुकीयः—यदभिप्रेतं भवत्या। भो भो आश्रमवासिनस्तपस्विनः, शृण्वन्तु शृण्वन्तु भवन्तः। इहात्रभवती मगधराजपुत्री अनेन विस्रम्भेणोत्पादितविस्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते।

कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद्भवेत्।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिराममिया
यद्यस्याति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ॥८॥

Chamberlain--As desires your ladyship. "O Ye ascetics that live in this penance-grove; hark! hark! Sirs. Her Royal Highness, the princess of Magadha here, being intimate with the intimacy shown to her (by your cordial reception and kind enquiry), invites you, for piety's sake, to take her (gifts).

Who wants a pitcher? Who seeks cloth? What again does he, who has finished the prescribed course of his studies, want to present to his teacher? In this matter the princess, fond as she is of the pious, wants a favour (to be done) to her own self. Whatever be one's desideratum, please say, what should be given to whom?

अभिप्रेतेति—अभिप्रेतम् इष्टम्। शृण्वन्तु—संभ्रमेण प्रवृत्तौ, इत्यनेन द्वित्वम्।

विस्रम्भेण—विश्वासेन, तापसीकृतेन निःशङ्कप्रवेशार्थनिवेदनेन, उत्पादितविस्रम्भा जनितविश्वासा जातपरिचया वा। धर्मार्थम् धर्माय एव, न तु यशोगौरवप्राप्त्यर्थम्। अर्थेन स्ववस्तुजातेन करणेन।

अन्वयः—कस्य कलशेन अर्थः। कः वासः मृगयते? यः यथानिश्चितम् दीक्षाम् पारितवान्, स पुनः किम् इच्छति, यत् गुरोः

देयम् भवेत् ? धर्माभिरामप्रिया नृपजा इह आत्मानुग्रहम् इच्छति। यत् यस्य समीप्सितम् अस्ति, (स) तत् वदतु, अद्य कस्य किम् दीयताम्।

व्याख्या—कस्य तापसस्य कलशेन जलपात्रेण घटेन अर्थः प्रयोजनम्। कः वासः वस्त्रम् मृगयते वाञ्छति। यः यः कोऽपि तापसः यथानिश्चितम् निश्चितमनतिक्रम्य इति यथासंकल्पितम् दीक्षां वेदाध्ययनव्रतं पारितवान् समापितवान् स पुनः किं स्वर्णादिवस्तु इच्छति वाञ्छति यत् गुरोः आचार्यस्य देयं दातव्यं दक्षिणास्वरूपेण भवेत्। धर्मे अभिरमन्ते इति धर्माभिरामाः धर्मरुचयः धर्मसर्वस्वाः। ते प्रियाः यस्याः सा। यद्वा धर्मे अभिराम अभिरुचिः, धर्माभिरामः, स प्रियः यस्याः सा, धर्माभिरामप्रिया। नृपजा राजपुत्री इह अस्मिन् दानविषये आत्मानुग्रहम् आत्मनः कृतार्थतां न तु प्रतिग्राहिणः अनुग्रहीतुम् इच्छति, यत् यस्य कस्यापि समीप्सितं वाञ्छितमस्ति स त वदतु कथयतु। प्रार्थनायां लोट्। कस्य कस्मै किं वस्तु अद्य दीयताम्। विवक्षया शेषे षष्ठी। शार्दूलविक्रीडितं वृत्तम्। वृत्यनुप्रासः।

Notes :—अनेन विश्रम्भेण—By this intimacy shown to her by your cordial welcome and kind inquiry about her marriage, उत्पादितविश्रम्भा—जनितविश्वासा जात-प्रणया वा। With confidence caused in her or with love produced in her, i. e., Your intimacy has begotten confidence, in her so etc. or it means—'Being confident because of the confidence reposed in her by your cordial etc.' धर्मार्थम्—धर्माय इदमिति मयूर-व्यंसकादित्वात् नित्य-समासः। अर्थेन—करणे ३या यथानिश्चितम्—as resolved i.e. to read one Veda or two, ब्रह्मचर्यपूर्वकं स्वाध्यायव्रतम्। दीक्षा—students' period of the Vedic study, course of study, दीक्ष्—means to initiate or to prepare one self for performing a religious rite. दीक्ष्+अ+टाप् (गुरोश्चहलः)।

गुरोः—विवक्षया शेषे षष्ठी like राज्ञः करं ददाति। A student pays something in return of the teaching received and so no सम्प्रदान, which requires selflessness. After finishing his prescribed study, the student was required in ancient India, to present some gifts to his Guru according to his means, usually a co-conut, or a pair of sacred thread, यथाह मनुः 'स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत्'। इह —In this forest or in this matter of distribution of gifts. आत्मानुग्रहम्—Favour or obligation to be done to her own self, and not to the Takers of gifts. धर्माभिरामप्रिया—Fond of the delighters in religion, or fond of taking delight (herself) in religion or dear (प्रिया) to all for her interest in matters religious. See व्याख्या, समीप्सितम्—सम्+आप्+सन्+क्त (भावे), आप्तुमिच्छति इति।

कस्य—शेषे षष्ठी see गुरोः। She expects obligation for her own self, i. e., If her gifts be accepted, then she shall be much obliged to the gift-takers and not that they should be obliged to her.

यौगन्धरायणः—हन्त ! दृष्ट उपायः। (प्रकाशम्) भोः ! अहमर्थी।

Yaug—Good luck ! I have found the way. (Aloud) Hallo ! I am a supplicant.

पद्मावती—दिट्ठिआ सहलं मे तवोवणाभिगमणं। [दिष्ट्या सफलं मे तपोवनाभिगमनम्।]

Padma—Luckily, my coming to the penance-wood is successful.

तापसी—संतुट्ठतपस्सिजणं इदं अस्समपदं। आअन्तुएण इमिणा होदव्वं। [संतुष्टतपस्विजनमिदमाश्रमपदम्। आगन्तुकेनानेन भवितव्यम्।]

Lady Hermit—This hermitage is one where all the hermits are well-content. He must be a newcomer.

काञ्चुकीयः—भोः ! किं क्रियताम् ?

Chamber—Ho ! what should be done (for you) ?

यौगन्धरायणः—इयं मे स्वसा । प्रोषितभर्तृकामिमामिच्छाम्यार्यया किञ्चित्कालं परिपाल्यमानाम् । कुतः

कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रै-
र्नाहं काषायं वृत्तिहेतोः प्रपन्नः ।
धीरा कन्येयं दृष्टधर्मप्रचारा
शक्ता चारित्रं रक्षितुं मे भगिन्याः ॥ ९ ॥

Yaug—She is my sister. I wish her, whose husband is living abroad, to be taken care of, for sometime by her ladyship. For I need no wealth, no pleasures, no garments. I have not taken to this Gerua a robe (of a sanyasi) for the sake of my livelihood. This equanimous girl (the princess), whose observance of religious rites is just seen, is capable of protecting the character of my sister.

वासवदत्ता—(आत्मगतम्) हुं । इह मं णिक्खिविदुकामो अय्य यौगन्धरायणो । होदु, अविचारिअ कमं ण करिस्सदि ।

[हम् ! इह मां निक्षेप्तुकाम आर्य यौगन्धरायणः । भवतु, अविचार्य कर्म न करिष्यति ।]

Vasav—(To herself). Humph ! noble Yaugandharayana wants to deposit (place) me here. Well he will not take any step without due deliberation.

व्याख्या—हन्तेति हन्त ! हर्षे, वासवदत्तानिक्षेपावसरलाभात् हर्षः । उपायः मार्गः स्वकार्यसिद्धेः । अर्थी याचकः । दिष्ट्या हर्षे,

अहोभाग्यम् । संतुष्टा तपस्विजनाः यत्र तत् संतुष्टतपस्विजनम्, परितृप्ततापसम् । यत्र सर्वे तापसाः परमुखापेक्षा पराङ्मुखाः आसन् । आगन्तुकेन नवागतेन । अवश्यमयमन्यदेशादागतो भवेत् । अत्र तपोवने तु भिक्षुकाभावः । प्रोषितभर्तृकां प्रोषितः देशान्तरगतः भर्ता पतिर्यस्या ताम् । नद्यृतश्च इति कप् । परिपाल्यमानाम् निज समीपे संस्थाप्य रक्ष्यमाणाम् । यावदहमस्या पतिं कुतोऽप्यन्विष्य नानयामि तावदियं भवत्या रक्षणीया इतिभावः ।

अन्वयः—अर्थैः न एव (मम) कार्यम्, न भोगैः अपि, न वस्त्रैः । अहम् वृत्तिहेतोः काषायम् न प्रपन्नः । धीरा दृष्टधर्मप्रचारा इयम् कन्या मे भगिन्याः चारित्रम् रक्षितुम् समर्था ।

व्याख्या—अर्थैः धनैः नैव नहि कार्यं प्रयोजनम्, न भोगैः भोगवस्तुभिः प्रयोजनं नास्ति । अहं परिव्राजकवेषो यौगन्धरायणः ।

वृत्तिहेतोः जीविकार्थं काषायं गेरुकरक्तं वस्त्रं, न प्रपन्नः स्वीकृतवान् परिहितवान् । नाहमुदरपूर्त्यर्थं संन्यासं गृहीतवान् इति भावः । इयं पुरोवर्तिनी कन्या राजकुमारी धीरा स्थिरधीः मनस्विनी, दृष्टः अवलोकितः धर्मस्य प्रचारः आचरणं यस्या सा दृष्टधर्मप्रचारा, अतः मे भगिन्याः स्वसुःचरित्रमेव चारित्रम्, सतीत्वादिशीलं, प्रज्ञादिभ्यश्च इत्यण् । रक्षितुं पालयितुं शक्ता समर्था । अनया पद्मावत्या परिपाल्यमानाया मे भगिन्याःश्चरित्रं कलुषयितुं न कोऽपि उत्सहेत । काव्यलिङ्गालङ्कारः । वैश्वदेवी वृत्तम् ।

इममिति—हम्, विषादे क्रोधे वा । निक्षेप्तुं न्यस्तुं न्यासरूपेण अर्पयितुंकामः इच्छा यस्य । तुंकाममनसोरपि । अविचार्य अविमृश्य क्रमं विधिं कर्मप्रवृत्तिं नियोगं वा करोति ।

Notes—हन्त expresses Y's Joy at seeing a 'means' (उपाय) to deposit वासवदत्ता with पद्मावती । दिष्ट्या— fortunately, lucklily अव्ययम्, expressing joy. She is glad as it was difficult to get any suppliant there. संतुष्टतपस्विजन—संतुष्टा, तपस्विजनाः, यत्र ।, where all the

ascetics were content, None wanted anything. "Happy are those whose wants are few."

आगन्तुकेन—तापसी was mortified to see a beggar coming forward to take alms in that hermitage where none was needy. So she infers that the fellow must be a foreigner and not an inhabitant of this place. प्रोषितभर्तृका—प्रोषित: living abroad or gone on a journey भर्ता यस्या:, one separated from her husband यथा साहित्यदर्पणे—

" नानाकार्यवशाद्यस्या दूरदेशंगतः पतिः ।
सा मनोभवदुःखार्त्ता भवेत्प्रोषितभर्तृका ।"
ननर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्नविवाहकाले ।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि ॥"
इति महाभारतवचनात् अनृतभाषणं न पापजनकम् ।

काषम्—अत्यन्तसंयोगे २या । कषायेण रक्तमिति काषायम्, कषाय+अण् (तेन रक्तम् इति अण्); लक्षणया कषायरक्तं वस्त्रम् अर्थात् संन्यासः ; Metaphorically it means the ascetic life, काषायं प्रपन्नः therefore means 'have become a recluse'. Gerua cloth is the sign of our Indian Sannyasin. वृत्तिहेतोः—जीविकार्थम् वृत्तेः हेतुः तस्य । षष्ठी हेतुप्रयोगे । This should that he was quite unlike the modern Sannyasin who renounces the world only to earn a living. He was a pacca sadhu, दृष्टधर्मप्रचारा—धर्मस्य प्रचारः observance of religious rites, दृष्टो धर्मप्रचारः यस्याः (I) whose religious propaganda has been seen (by me just now), i.e., who is well-known for her piety. (II) दृष्टो धर्मप्रचारो यया सा, who herself has seen the (right) path of religion प्रचारः गतिः । चरित्रमेव चारित्रम्, चरित्र+अण् (प्रज्ञादिभ्यश्च स्वार्थे अण्)। शक्ता—capable by all means, i.e. She won't allow any-

body whosoever he may be, to defile my sisters' chastity, purity of life and conduct as she is धीरा and दृष्टधर्मप्रचारा। She is quite fit for being the guardian of my sister. The figure here is काव्यलिङ्ग because 'धीरा दृष्टधर्मप्रचारा' are used as the cause of her being able to protect her character "हेतो वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते। निक्षेप्तुकामः—निक्षेप्तुं कामः यस्य (ब० व्री०) "म् of तुमुन्" is dropped by 'तुङ्काममनसोरपि'—। क्रमम्—course of action, step, कर्म would be the better reading, (क्रम and not कर्म as found here in प्राकृत would give better sense).

काञ्चुकीयः—भवति ! महती खल्वस्य व्यपाश्रयणा। कथं प्रतिजानीमः। कुतः

सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥ १०॥

The Chamberlain—Your Highness, great (i.e. difficult), indeed, is her trust. How can we promise. For—

It is easy to give wealth, easy to give life, and easy to part with penance. Everything else is easy to give, but it is very difficult to protect one's deposit.

पद्मावती—अय्य ! पठमं उग्घोसिअ को किं इच्छदि त्ति अजुत्तं दाणिं विआरिदुं। जं एसो भणादि, तं अणुचिट्ठदु अय्यो। [आर्य ! प्रथममुद्घोष्य कः किमिच्छतीति अयुक्तमिदानीं विचारयितुम्। यदेष भणति तदनुतिष्ठत्वार्यः।]

Padma—Sir, Having first announced 'who wants what', it is now improper to deliberate. Let Your Honour do what he says.

काञ्चुकीयः—अनुरूपमेतद् भवत्याभिहितम्।

Chamber—It has been rightly said by your ladyship.

चेटी—चिरं जीवदु भट्टिदारिआ एवं सच्चवादिणी । [चिरंजीवतु भर्तृदारिका एवं सत्यवादिनी ।]

Maid—Long live the princess who is so truthful.

तापसी—चिरंजीवदु भद्दे ! [चिरंजीवतु भद्रे !]

Lady Hermit—Live long, O noble one !

काञ्चुकीयः—भवति ! तथा (उपगम्य) भोः । अभ्युपगतमत्रभवतो भगिन्याः परिपालनमत्रभवत्या ।

Chamber—Your ladyship, so be it. (Approaching). Hallo ! Her Highness has accepted the guardianship of Your Holiness's sister.

यौगन्धरायणः—अनुगृहीतोऽस्मि तत्रभवत्या । वत्से ! उपसर्प अत्रभवतीम् ।

Yaug—I am very thankful to Her Highness. Dear child, approach Her Highness.

वासवदत्ता—(आत्मगतम्) का गई । एसा गच्छामि मन्दभाआ । [का गतिः । एषा गच्छामि मन्दभागा]

Vásav—(To herself). What alternative ? Here go I, a luckless one.

पद्मावती—भोदु, भोदु । अत्तणीआ दाणिं संवुत्ता । [भवतु, भवतु । आत्मनीयेदानीं संवृत्ता ।]

Padma—Well, well. Now she has become my own.

तापसी—जा ईदिसी से आइदी, इयं वि राजदारिअ त्ति तक्केमि । [यत् ईदृशी अस्या आकृतिः, इयमपि राजदारिकेति तर्कयामि ।]

Lady Hermit—Since her feature is so charming, I infer that she, too, is a princess.

चेटी—सुट्ठु अय्या भणादि । अहं वि अणुहूदसुहत्ति पेक्खामि । [सुष्ठु आर्या भणति । अहमपि अनुभूतसुखेति पश्यामि ।]

Maid—Your Reverence says right, I, too, see that she has enjoyed pleasures (of life).

यौगन्धरायणः—(आत्मगतम्) हन्त भोः । अर्धमवसितं भारस्य । यथा मंत्रिभिः सह समर्थितं, तथा परिणमति । ततः प्रतिष्ठिते स्वामिनि तत्रभवतीमुपनयतो मे इहात्रभवती मगधराजपुत्री विश्वासस्थानं भविष्यति । कुतः

पद्मावती नरपतेर्महिषी भवित्री
दृष्टा विपत्तिरथ यैः प्रथमं प्रदिष्टा ।
तत्प्रत्ययात् कृतमिदं नहि सिद्धवाक्या
न्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि ॥ ११ ॥

Yaug—(To himself). Aha ! Half of my burden is removed. It turns out just as it was planned by us with the Ministers. So when my master will be re-installed on his gadi, and when I shall be presenting her ladyship (Vasavadatta) to him, then Her Highness, the princess of Magadha, shall be my witness in this matter.

For, Padmavati is to be the consort of our king, this (deposit of Vasavadatta here) has been done through my confidence in them, the calamity first foretold by whom, has been after-wards realised (seen). Destiny never goes against the well-tested words of the prophets.

व्याख्या—भवति ! राजपुत्रि ! अस्य परिव्राजकस्य व्यपाश्रयणा अभ्यर्थना, महती गुर्वी दुष्करा । प्रतिजानीमः सम्पादयितुं स्वीकुर्मः । वि-अप-श्रि+युच्+टाप् (स्त्रियां बाहुलकात् भावे युच्) ।

अन्वयः—अर्थः सुखम् दातुम् भवेत् । प्राणाः सुखम्, तपः

सुखम् । अन्यत् सर्वम् सुखम् दातुम् भवेत् । न्यासस्य रक्षणम् तु दुःखम् ।

व्याख्या—अर्थो धनं सुखम् अनायासं दातुम् भवेत् स्यात् । शक्यं भवेत् इति भावः शकधृषज्ञाग्लेत्यादिना अस्त्यर्थकभवेत्पदयोगे तुमुन् । यथा अस्ति भोक्तुमन्नम् । प्राणाः स्वजीवितमपि सुखमनायासं दातुं भवेत् । तपः सुखं दातुं भवेत् । अन्यत् अपरं सर्वं सकलवस्तुजातम् सुखम् अनायासं दातुं भवेत् । न्यासस्य निक्षेपस्य रक्षणं परिपालनं दुखं दुष्करं दुःसाध्यं भवेत् । धनजीवनतपः प्रभृतिदानात् अपि दुष्करतरं न्यासरक्षणमितिभावः ।

आर्येति—उद्घोष्य घोषणां कृत्वा । अयुक्तमनुचितम् । अनुतिष्ठतु सम्पादयतु ।

अनुरूपेति—अनुरूपम् अनुगुणम् कुलशीलादियोग्यम् एतत् प्रतिज्ञातकरणम् ।

चिरेति—एवमित्थम् । सत्यवादिनो सत्यवदनशीला । प्रतिज्ञातं शक्यमशक्यं वेति विचारं विहायावश्यं कर्त्तव्यमेवेति तथ्यभाषिणी ।

भवतीति—तथा अस्तु इतिशेषः, एवमस्तु । अभ्युपगतं स्वीकृतम् अत्रभवतः पूज्यस्य ते । का अन्या गतिः उपायः, पद्मावती समीपगमनात् अन्यो न कोऽपि उपायः । मन्दभागा मन्दः अल्पः भागः भाग्यं यस्याः सा । पतिविरहकातरायाःमम यौगन्धरायणादपि विच्छेदः; अहो मे दौर्भाग्यम् ।

भवत्विति—विषण्णामिव उपसर्पन्तीं वासवदत्तामाश्वासयति—भवतु भवतु अलमलम्खेदेन । द्विरुक्तिः तस्याः हर्षं दर्शयति ।

यदीति—ईदृशी लावण्यमयी । आकृतिः सौन्दर्यम् ।

सुष्ठु इति—चेटी तदेवानुमोदते । सुष्ठु शोभनम् । अनुभूतसुखा अनुभूतम् उपभुक्तं सुखं राजकुमारीसुलभं सौख्यं यया सा ।

हन्त भोः—हन्त भोः आश्वासजन्यहर्षद्योतकमव्ययद्वयम् भारस्य स्वामिराज्यप्रत्यावर्त्तनरूपस्य कार्यस्य । अर्द्ध समानांशः, वासवदत्तायाः क्वचित् विश्वसनीयस्थाने न्यासीकरणरूपः अर्द्धं भागः । अवसितम्

विष्पन्नम् । मंत्रिभिः रुमरावदादिभिः । समर्थितं मंत्रितं निश्चितम् । परिणमति आपतति घटते । प्रतिष्ठिते राजसिंहासनारूढे । तत्रभवतीम् वासवदत्ताम् । उपनयतः उपहरतः । इह अस्मिन् विषये वासवदत्तासतीत्वसादये। विश्वासस्थानम् विश्वासस्य 'इयं सुरक्षितचरित्रा' इति विश्रम्भस्य स्थानं पद्माथयो वा साक्षिभूता भविष्यति।

अन्वयः—पद्मावती नरपतेः महिषी भविश्री । यैः प्रथमं प्रदिष्टा विपत्तिः अथ दृष्टा । तत्प्रत्ययात् इदं कृतम् । विधिः सुपरीक्षितानि सिद्ध-वाक्यानि उत्क्रम्य नहि गच्छति ।

व्याख्या—पद्मावती नरपतेः उदयनस्य महिषी राज्ञी पत्नी भविश्री भाविनी । कथमेव विश्वासः इत्याह । यैः सिद्धैः आदेशिकैः प्रथमं पूर्व विपत्तिः अस्मत्स्वामिनो राज्यनाशः । दिष्टा कथिता । सा अथ अनन्तरम् । दृष्टा प्रत्यक्षीकृता अवलोकिता अस्माभिः । तत्प्रत्ययात् आदेशिकवचनविश्वासात् । यतः एका भविष्यवाणी सत्याभूत्, अपरापि तथैव स्यात्, अतः। इदं पद्मावत्यां वासवदत्तायाः न्यासीकरणादिकं कृतम् सम्पादितम् । विधिः नियतिः भाग्यम्, सुपरीक्षितानि पर्यालोचितानि बहुशः प्रत्यक्षीकृतानि । सिद्धवाक्यानि आदेशिकवचनानि उत्क्रम्य उल्लंघ्य न हि गच्छति । प्रत्युत तदनुसारं फलं ददाति । अर्थान्तरन्यासः । वसन्ततिलकावृत्तम्

Notes—व्यपाश्रयणा टाप्—वि + अप + आ + श्रि + युच् (वासस्‍ अन्येोयुच् । 'कृत्य-ल्युटो बहुलम्'-इत्यस्य बाहुलकात् भावे युच्). व्यपाश्रयणा—taking recourse to, trusting to dependence, दातुं भवेत्—(1) तुमुन् has come here by शकधृषज्ञाग्लाघट-रभ लभ क्रम सहार्हास्त्यर्थेषु तुमुन् as भवेत् is अस्त्यर्थक । दातुं भवेत् means दातुं स्यात् । It is just like अदो भोक्तुमस्ति तुमुन् seems to be added here in the passive sense i. e. दातुं means to be given.

Notes—I व्यपाश्रयणा—आश्रयणम्; taking recourse to, trusting to, dependence, hence, trust or refuse-taking

आश्रय-भित्ता, वि+अप+आ+श्रि+युच् (बाहुलकात्)+स्त्रियां टाप्। कृत्यल्युटो बहुलम्। युच् comes by ययासश्रन्थो युच्, though-erroneously, as श्रि is not allowed युच् by this, in non causative form. If the reading be व्यपाश्रयणा then it is grammatically correct.

2 (a) दातुं भवेत्—तुमुन् has come by शंकधृषज्ञाग्लाघट रमलभ क्रम सहाहस्त्यर्थेषु तुमुन्, as भवेत् is अस्त्यर्थक। Just as अस्ति भवति विद्यते वा अन्नं भोक्तुम्। (b) दातुं शक्यः भवेत् तुमुन् on account of शक्यः by the rule or, पर्याप्तिव चनेष्वलमर्थेषु। (c) The meaning may be " Wealth is easy to be given, तुमुन् is added in passive sense.

3. अनुगतं रूपमिति अनुरूपम् suitable, worthy.

4. सत्यं वदितुं शीलंयस्याः सा, सत्यवादिनी truthful. She is praised as she has ordered the chamberlain to do according to the announcement he made, see व्याख्या।

8. मन्दभागा—मन्दो भागः भाग्यं यस्या सा। She calls herself unlucky as she had been already separated from her husband and from her hearth and home. Now she is separated from her only support यौगन्धरायण as well.

9. भवतु भवतु—Repetition shows her delight. She consoles Vasav.

11. अनुभूतसुखा—अनुभूतम् उपभुक्तं सुखं यया सा, who enjoyed the happiness of life.

12. हन्त भोः!—Aha, Good luck, used in expressing exultation of heart. अवसितम्—has ended अव+सो+क्त (कर्मणि) Half, of the responsible arduous task is finished. What was this task (भार)? Ans. Astrologers Puspaka

and Bhadra and others of Kausambi court had predicted that Udayana would lose his kingdom and would recover it through the help of the Magadhan king on his marrying the Magadhan princess Padmavati. Soon after the kingdom was lost. So Udayan's ministers believing in the prophecy, with a view to recover the kingdom planned to spread the false news about the death in fire of Queen Vasavadatta and to Minister Yaugandharayana and after that, place Vasavadatta under Padmavati, the sure and certain would-be wife of their king. So that, on the recovery of the kingdom through Magadh-King's help, when Yaug would present Vasavadatta all safe to Udayana, Padmavati might give evidence of Vas's chastity. Now Yaug's anxiety for keeping Vas. under Padmavati is over, his only anxiety to recover the kingdom, will be now how to bring about Udayan's marriage with Padma so that the whole plan may succeed. मंत्रिभिः—with ministers Rumnavan and others, समर्थितम्—planned विश्वासस्थानम्—cause of confidence, witness. भवित्री—will be भू + तृच् + स्त्रियां ङीप् । यैः—आदेशिकः prophets, foretellers. विपत्ति—calamity i. e. the loss of kingdom. तत्प्रत्ययात्—Out of confidence in them तेषु आदेशिकेषु प्रत्ययः विश्वासः । तेषु should be separate, but it is justified by "सर्वनाम्नानुसन्धिर्वृत्ति च्छन्नस्य ।"

(ततः प्रविशति ब्रह्मचारी)

1. ब्रह्मचारी—(ऊर्ध्वमवलोक्य) स्थितो मध्याह्नः । दृढमस्मि परिश्रान्तः । अथ कस्मिन् प्रदेशे विश्रमयिष्ये । (परिक्रम्य) भवतु, दृष्टम् । अभितस्तपोवनेन भवितव्यम् । तथाहि

विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षा पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः ।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि वह्वाश्रयः ॥ १२ ॥

यावत्प्रविशामि । (प्रविश्य) अये ! आश्रमविरुद्धः खल्वेष जनः । (अन्यतो विलोक्य) अथवा तपस्विजनोऽप्यत्र । निर्दोषम् उपसर्जनम् । ! अये स्त्रीजनः ।

Brahmachari—(Looking upwards) It is mid-day I am thoroughly tired. In which region, then shall I take rest ? (Walking) Well, I see. The penance-wood must be near at hand. For—The deer unalarmed are grazing at ease, confident of reaching their home (own region). The trees, all tenderly nurtured, have their branches laden with fruits and flowers. The treasure-like cows are mostly brown. The quarters are free from (corn) fields. Surely it is the penance-wood as the smoke (of the mid-day sacrifice) is rising simultaneously from various places. I shall just enter. (Entering) This person is, indeed, incompatible with the hermitage. (Looking elsewhere) Or there are hermits, too, here. There is no harm in advancing. Oh, ladies here !

टिप्पणी—अभिलषितविवाहार्थं पद्मावत्याः हृदयमुदयनस्य गुणकीर्त्तनेन आकृष्टं कर्त्तुं, वियुक्तां वासवदत्तां तस्य कुशलचर्ययाश्वासयितुं च ब्रह्मचारिणः प्रवेशः । ब्रह्म वेदं, तत्तपो वा विदाध्ययनार्थं व्रतं चरितुं शीलं अस्य इति । ब्रह्म+चर+णिनिः ताच्छील्ये । मध्यमहः मध्याह्नः । विश्रमविषये आत्मानं विश्रान्तं करिष्यामि । अभितः समीपे संनिधौ ।

विश्रब्धेति—अन्वयः—देशागतप्रत्ययाः अचकिताः हरिणाः विश्रब्धम् चरन्ति। सर्वे वृक्षाः दयारक्षिताः (सन्तः) पुष्पफलैः समृद्धविटपाः सन्ति। गोकुलधनानि भूयिष्ठं कपिलानि सन्ति। दिशः अक्षेत्रवत्यः। इदम् निस्संदिग्धम् तपोवनम्। हि अयम् धूमः बह्वाश्रयः।

व्याख्या—देशागतप्रत्ययाः, देशे स्वनिवासप्रान्ते, आगतम् आगमनं, तस्य प्रत्ययः विश्वासो येषां ते। अतः अचकिताः निर्भयाः, अपरिचितपुरुषदर्शनेऽपि निर्भीकाः। हरिणाः मृगाः। विश्रब्धं निश्शङ्कम्। चरन्ति इतस्ततो विहरन्ति तृणानि अदन्ति। सर्वे सफलाः वृक्षाः तरवः दयारक्षिताः दयया अनुकम्पया रक्षिताः पालिताः। सेचनादिना भङ्गच्छेदाद्यकरणेन च पालिताः इति भावः। अतएव पुष्पफलैः समृद्धविटपाः समृद्धाः सम्पन्नाः परिपूर्णाः विटपाः शाखाः येषां ते। गोकुलधनानि गवां धेनूनां कुलानि समूहाः गोकुलानि, तानि धनानि सर्वस्वम् इव। भूयिष्ठम् बहुलतया कपिलानि। कपिलानामेव गवां प्राशस्त्यात्। दिशः दिग्भागाः अक्षेत्रवत्यः क्षेत्राणि शस्यक्षेत्राणि सन्ति आसाम् इति क्षेत्रवत्यः। यथा ग्रामेषु। न क्षेत्रवत्यः इति अक्षेत्रवत्यः। अतः इदं निस्संदिग्धम् असंशयं तपोवनम्। हि यस्मात् अयं धूमः बह्वाश्रयः बहवः आश्रयाः उद्गमस्थानानि यस्य। मध्याह्नत्वात् माध्यन्दिनसवनार्थं युगपदेव होमाग्निः बहुषु स्थलेषु प्रज्वलितः। तस्य धूमो युगपदेव आक्रामति।

Notes.—मध्यम् अह्नः इति मध्याह्नः, मध्याहन् + अच, by 'अह्नः सर्वैकदेशादिना। after that अह्नोऽह्न एतेभ्यः। राजाहः सखिभ्यष्टच्' is barred by this. अभितः—*near*, on both sides, on all sides.

देशागतप्रत्ययाः—(a) Confident of reaching their homes, hence grazing fearlessly देशे स्वनिवासस्थानेषु आगतमागमनं, तस्मात् प्रत्ययो विश्वासो येषां ते।

(b) देशः देशविशेषः पावनं तपोवनम्, तस्मात् आगतः प्रत्ययः येषां ते। Those in whom confidence (of safety of life)

was bred by the holy penance-wood. As says Kalidasa. " विश्वास.........मृगाः" शाकु० Act. I. 8.

" विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः" शाकु० Act. I. 8. विस्रब्धम्—fearlessly. दयारक्षिताः—Kindly protected, as none could injure these trees. गोकुलधनानि—(a) *Treasure-like cows. The wealth of the hermits consisted* only in their cows. भूयिष्ठं—Mostly, generally. कपिलानि—as the brown cows are considered most sacred and auspicious. अग्निचित् कपिला सत्री राजाभिक्षुर्महोदधिः दृष्टमात्राः पुनन्त्येते तस्मात्पश्येन्नित्यशः। Remember this. (b) Or supply चरन्ति, brown Cows are grazing in large numbers. बह्वाश्रयः—बहवः आश्रयाः उद्गमस्थानानि येषां ते। Rising from various places, or rising from many things such as घृत, तिल etc.

2. काञ्चुकीयः—स्वैरंस्वैरं प्रविशतु भवान्। सर्वजनसाधारणमाश्रमपदं नाम।

Cham.—Come in, sir, come in freely. A hermitage *is, indeed, open to* all.

3. वासवदत्ता—हम्

Vasav—Hamph !

4. पद्मावती—अम्मो परपुरुसदंसणं परिहरदि अय्या। भोदु, सुपरिवालणीओ खु मए णासो। (अम्मो परपुरुषदर्शनं परिहरति आर्या। भवतु, सुपरिपालनीयः खलु मम्न्यासः।)

Padmavati—Oh, this noble lady avoids the sight of other men. All right, my ward must be carefully looked after or it is very easy to look after my ward.

5. काञ्चुकीयः—भोः! पूर्वं प्रविष्टाऽस्मः। प्रतिगृह्यतामतिथिसत्कारः

Chamb—Hallo! we have entered before. Please accept our hospitality.

6. ब्रह्मचारी—(आचम्य) भवतु भवतु । निवृत्तपरिश्रमोऽस्मि ।

Brahma—(Sipping). Very well, my fatigue is removed.

7. यौगन्धरायणः—भोः! कुत आगम्यते, क्व गन्तव्यं, क्वाधिष्ठानमार्यस्य।

Yaug—Sir, whence do you come? Where shall you go? Where do you live?

8. ब्रह्मचारी—भोः! श्रूयताम्। राजगृहतोऽस्मि। श्रुतिविशेषणार्थं वत्सभूमौ लावाणकं नाम ग्रामस्तत्रोषितवानस्मि।

Brahma—Listen, Sir. I hail from Rajagriha: I have lived at a village Lavanaka by name in the country of the Vatsas, with a view to specialise in the Vedic Study.

9. वासवदत्ता—(आत्मगतम्) हा लावाणअं णाम। लावाणअसंकित्तणेण पुणो णवीकिदो विअ मे सन्दावो। (हा! लावाणकं नाम। लावाणक-संकीर्त्तनेन पुनः नवीकृतः इव मे संतापः।)

Vasav—(To herself) Ah! Lavanaka, indeed. By the mention of Lavanaka, my grief is, as it were renewed.

10. यौगन्धरायणः—अथ परिसमाप्ता विद्या?

Yaug—Have you, then, finished your study?

11. ब्रह्मचारी—न खलु तावत्।

Brahma.—No, not yet, indeed.

12. यौगन्धरायणः—यद्यनवसिता विद्या, किमागमनप्रयोजनम्?

Yaug—If your study is not finished, what is the reason of your coming?

13. ब्रह्मचारी—तत्र खल्वतिदारुणं व्यसनं संवृत्तम्।
Brahma.—A terrible calamity has happened there.

14. यौगन्धरायणः—कथमिव।
Yaugandharayan—What's that?

15. ब्रह्मचारी—तत्रोदयनो नाम राजा प्रतिवसति।
Brahma—There lives a King Udayana by name.

16. यौगन्धरायणः—श्रूयते तत्रभवानुदयनः। किं सः?

Yaug—We hear of His Majesty Udayana. What of him?

17. ब्रह्मचारी—तस्यावन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढमभिप्रेता खलु।

Brahma—His wife Vasavadatta by name, the daughter of the King of Avanti, was, it is said, deeply loved by him.

18. यौगन्धरायणः—भवितव्यम्। ततस्ततः?
Yaugandharayan—May be, what next?

19. ब्रह्मचारी—ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा।

Brahmachari—Then when the King had gone out a-hunting, she was burnt by the village-conflagration.

20. वासवदत्ता—(आत्मगतम्) अलिअं अलिअं खु एदं। जीवामि मन्दभाआ। [अलीकम् अलीकम् खलु एतत्। जीवामि मन्दभागा।]

Vasav—(To herself). False, it is quite false. I live, an unlucky one.

21. यौगन्धरायणः—ततस्ततः?
Yaugandharayan—What next?

22. ब्रह्मचारी—ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नाम सचिवस्तस्मिन्नेवाग्नौ पतितः।

Brahma—Then a minister, Yaugandharayana by name, while trying to rescue her, fell into that very fire

23. यौगन्धरायणः—सत्यं पतित इति। ततस्ततः?

Yaug—Is it true that he fell? What then?

24. ब्रह्मचारी—ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोगजनितसंतापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽमात्यैर्महता यत्नेन वारितः।

Brahma—Then the King, hearing on his return the sad news, being afflicted with grief of their bereavement, wanted to give up his life in that very fire, but was prevented or prevailed upon with great difficulty by his ministers.

25. वासवदत्ता—(आत्मगतम्) जाणामि जाणामि अय्यउत्तस्स मइ साणुक्कोसत्तणं। [जानामि जानामि आर्यपुत्रस्य मयि सानुक्रोशत्वम्।]

Vasav—(To herself). I know, I know my dear husband's kindness to me.

26. यौगन्धरायणः—ततस्ततः।

Yaug—Then, then?

27. ब्रह्मचारी—ततस्तस्याः शरीरोपभुक्तानि दग्धावशेषाण्याभरणानि परिष्वज्य राजा मोहमुपगतः।

Brahma—Then the King, embracing the burnt remains of the ornaments she was wearing on her body, fell down in a swoon,

28. सर्वे—हा!

All—Alas!

29. वासवदत्ता—(स्वगतम्) सकामो दाणि अय्यजोअन्धरायणो होदु। [सकामः इदानीम् आर्ययौगन्धरायणः भवतु।]

Vasav—Let noble Yaugandharayana be now successful.

30. चेटी—भट्टिदारिए! रोदिदि खु इअं अय्या। [भर्तृदारिके! रोदिति खलु इयम् आर्या।]

Maid—Princess, this noble lady is really weeping.

31. पद्मावती—साणुक्कोसाए होदव्वं। [सानुक्रोशया भवितव्यम्।]

Padma—She must be tender-hearted.

व्याख्या—4. परपुरुष दर्शनम् परः स्वपतेः अन्यः पुरुषः नरः, तस्य दर्शनम् अवलोकनं परिहरति विवर्जयति। सुपरिपालनीयः सुरक्षणीयः खलु मन्न्यासः मम निक्षेपः। मम निक्षेपभूताया अस्याः आर्यायाः मनसः प्रतिकूलं कार्यं न कदापि मया करणीयम्।

8. भो इति—राजगृहतः आगतोऽस्मि। श्रुतेः वेदस्य विशेषणम् अर्थश्रवणादिना उपस्करणम्, विशेषज्ञानप्राप्तिः तदर्थम्। उषितवान् पूर्व वासं कृतवान्। नाधुना।

17. दृढम् भृशम् अत्यन्तं वा। अभिप्रेता प्रिया स्निग्धा। किल वार्त्तायाम्।

22. अभ्यवपत्तुम् ग्रामाग्निदाहव्यसनात् रक्षितुं कामो मनो यस्य स। तुङ्काममनसोरपि।

24. वियोगजनितसंतापः—वियोगेन विरहेण जनितः उत्पादितः संतापः दुःखं यस्य।

25. सानुक्रोशत्वम्—अनुक्रोशेन अनुकम्पया सह वर्त्तमानः यः, तस्य भावः। सदयत्वम्। मयि सोऽतितरामनुरक्तः इति भावः। जानानि इत्यत्र द्वित्वं तु हर्षातिरेकजन्यसंभ्रमात्।

26. शरीरोपभुक्तानि देहे उपयुक्तानि परिहितानि। दग्धशेषाणि एकदेशप्लुष्टानि अर्द्धदग्धानि परिष्वज्य आलिङ्ग्य। प्रियजनस्पृष्टस्य स्पर्शः विनोदनोपायः।

27. सकामः सफलमनोरथः स्वनियोगे कृतकार्यः भवतु । आशंसावचनमेतत् । अथवा यौगन्धरायणं प्रति वासवदत्तायाः उपालम्भः । यतः तस्यैव नीत्याः फलमिदं यद्राजा संकटापन्नः मोहमुपगतः । अतः तस्य सकामत्वम् ।

Notes—स्वैरं स्वैरम्—freely, fearlessly, स्वस्य ईरः यस्मिन् कर्मणि तत् यथा स्यात् आदरे द्वित्वम् । तथा सर्वजनसाधारणम्—open to all, public. सर्वेषां जनानां साधारणम् सामान्यम् 'यथेच्छं भोग्यं वो वनमिदम्' भवभूतिः उत्तरचरिते ।

4. परपुरुषदर्शनम्—the sight of other men except her own men. मन्न्यासः—My deposit, my ward Vasavadatta. The line is interpreted in two ways. (a) My ward (मन्न्यासः) must be carefully looked after, *i.e.*, we must not do anything which she does not like. (b) It is very easy to look after (सुपरिपालनीयः) my ward. As she herself avoids the presence of even a student, so there will be little chance of her being seduced and spoiled by the evil-minded people.

8. श्रुतिविशेषणार्थम्—To ameliorate my Vedic study, *i.e.*, to specialise in Vedas. वत्सभूमि—The region of Vatsas was an important part of U. P. in the Budhistic period. It lay around Modern Allahabad on the Southern bank of the Yamuna, with its capital at Kausambi, now identified with a village Kosama by name, about 25 miles north-west of Allahabad. Nichachhu, the great-great-grandson of Janmajaya had sifted the capital from Hastinapura to Kausambi; Udayana was a descendant of the Pandavas twenty-sixth in descent from Arjuna.

13. व्यसनम्—Calamity. 17. किल—It is said, they say. ऐतिह्ये 19. ग्रामदाहेन—Village-fire, ग्रामस्य दाहः अग्निकाण्डम् ।

22. अभ्युपपत्तिकामः—With a mind to rescue म् of तुमुन् is dropped by तुङ्काममनसोरपि ।

24. प्रतिनिवृत्तः—Returned from hunting. तयोः-द्वयोः वासवदत्तायाः यौगन्धरायणस्य च । Grief was caused by his bereavement from his most beloved Vasavadatta and Yaugandharayana both. अमा सह वर्त्तते इति अमा+त्यप् । अव्ययात् त्यप् ।

25. सानुक्रोशत्वम्—Compassion, tenderness, hence affection. अनुक्रोशेन अनुकम्पया सह वर्त्तमानः यः । तस्य भावः ।

27. शरीरोपभुक्तानि—Enjoyed by her body, *i.e.*, worn on her person. शरीरेण उपभुक्तानि उपयुक्तानि । दग्धशेषाणि—burnt relics ; burnt in parts. दग्धात् शेषाणि अवशिष्टानि ।

29. सकामः—Successful, Vasavadatta means "The King without suspecting any fraud, thinking her to be really dead had fallen in a swoon. So Yaug. may now succeed in his plan of persuading him to marry Padmavati if offered and of recovering the lost Kingdom through the help of the latter's brother. The passage may have ironical sense as well. "Yaug. knew well his deep love for me. Yet he hatched this plan. The very news of my death has shocked him so much. I fear the worst may happen later. Let Yaug. be successful in his plan at the cost of the life of his King." But the honorific title आर्य added to यौगन्ध does not

leave any loophole for this ironical sense. The fir one is better. Compare.

राजा—(स्वगतम्) एवमस्मात्तु गृह्यमाणेषु स्वकार्यसिद्धिका सकामो भवत्वार्यः। मुद्राराक्षसे। Again in शाकुन्तल—अनसू —कामः इदानीं सकामो भवतु।

1. पद्मावती—साणुक्कोसाए होदव्वं। (She must be tende hearted).

2. यौगंधरायणः—अथकिमथकिम्। प्रकृत्या सानुक्रोशा मे भगिनी ततस्ततः।

Yaug—Yes, Yes. My sister is tender-hearted b nature. What then ?

3. ब्रह्मचारी—ततः शनैः शनैः प्रतिलब्धसंज्ञः संवृत्तः।

Brahma.—Then slowly and gradually he gained hi consciousness.

4. पद्मावती—दिट्ठिआ धरइ। मोहं गदोत्ति सुणिअ सुण्णं विअ मे हिअअं। [दिष्ट्या धरति। मोहं गतः इति श्रुत्वा शून्यम् इव मे हृदयम्।]

Padmā—Fortunately he is alive. Hearing that he fainted, my heart became, as it were, void.

5. यौगन्धरायणः—ततस्ततः।

Yaug—What next ?

6. ब्रह्मचारी—ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय हा वासवदत्ते! हा अवन्तिराजपुत्रि! हा प्रिये! हा प्रियशिष्ये! इति किमपि किमपि बहु प्रलपितवान्। किं बहुना,

escendant नैवेदानीं तादृशाश्चक्रवाका

rom Ar नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।

धन्या सा स्त्री यां तथा वेत्ति भर्ता
भर्तृस्नेहात् सा दग्धाप्यदग्धा ॥ १३ ॥

Brahma—Then that King, with his body soiled with the dust due to his rolling on ground (through grief), suddenly getting up, began to lament much saying 'Alas! Vasavadatta ! Oh ! the daughter of the King of Avanti ! Alas ! My darling ! Ah ! My dear disciple !, and such and similar incoherent things. In short even the Chakravaka birds are not now like him (in lamenting), not even others (other personages) separated from their distinguished consorts. Blessed is that lady whom her husband regards so. Though burnt, she is really not burnt, on account of the (undying) love of her husband.

1. सानुक्रोशया कोमलहृदया । स्त्रीणां हृदयस्य मृदुता स्वाभाविकी ।

2. अथकिमथकिम्—एवमेव, वा बाढम् । सत्यमेव सा मृदुलहृदया इतिभावः । उदयनवासवदत्तयोः संबन्धशंकानिवारणार्थं यौगन्धरायणस्य संभ्रमेणाद्विरुक्तिः । पद्मावत्याः मतं दृढयति । प्रकृत्या स्वभावेन नतु केनापि संबन्धेन ।

3. प्रतिलब्धः—पुनःप्राप्तः संज्ञा चेतना येन ।

4. धरति—प्राणान् इति शेषः । धृञ् धारणे भ्वादिः । शून्यम् अचेतनम् विषण्णम् । उदयनस्य मोहवार्त्तां श्रुत्वा पद्मावत्या अपिहृदयं विषण्णमभूत् ।

5. महीतले—पृथ्वीतले परिसर्पणं लुठनम्, तस्य पांसवः धूलयः तैः पाण्डुम् ईषद्रक्तं धूसरं वा शरीरं देहः यस्य । किं बहुना, किमधिकेन, संक्षेपतः शृणु ।

अन्वयः—इदानीम् चक्रवाकाः सादृशाः न एव । स्त्रीविशेषैः

वियुक्ताः अन्ये (तादृशाः) न एव । सा स्त्री धन्या, यां भर्ता तथ वेत्ति । सा भर्तृस्नेहात् दग्धा अपि अदग्धा हि ।

व्याख्या—इदानीम् वर्त्तमानकाले चक्रवाकाः पक्षिविशेष तादृशाः प्रिया-वियोगदुःखिताः न एव । उदयनविरहसमक्षे चक्रवाकाण विरहः अल्पदपो भाति । का कथा पक्षिणां, मनुष्या अपि तादृशं विरह कातरा नैव श्रूयन्ते । स्त्रीणाम् विशेषाः सर्वगुणसम्पन्नरमणीभि इन्दुमतीदमयन्ती सीताप्रभृतिभिः स्त्रीरत्नैः वियुक्ता विरहिताः अन्ये अपरेजनाः अजनन्तरामादयः तादृशाः दुःखिताः नैव यादृशोऽयमुदयनः सा स्त्री नारी धन्या सौभाग्यवती, यां भर्त्ता पतिः तथा स्वप्रेम भाजनं वेत्ति मन्यते । अथवा तथा तेन प्रकारेण । यथा उदयनो वासवदत्ताम् । वेत्ति मन्यते स्निह्यति । यावज्जीवं सुस्निह्य मृताया मपि दृढं स्निह्यति । सा वासवदत्ता दग्धा भस्मीभूता अपि भर्तृ स्नेहात् पत्युः उदयनस्य स्नेहात् अनुरागात् हेतौ अदग्धा जीविता एव । न सा मृता यां प्राणवल्लभो मधुरं स्मरति । नष्टं तु तस्या नश्वरं शरीरं परन्तु स्नेहनिर्मिता तस्याः भावमयी मूर्तिः प्राणनाथस्य हृदये जीवन्ती एव तिष्ठति ।

Notes—1. अथकिमथकिम्—Anxious as Yaug. was not to allow any suspicion to arise about Vasava's connection with Udayana, he at once supported Padmavati's remark saying 'yes, yes' etc.

प्रकृत्या—By nature, and not owing to any connection.

2. शनैः शनैः—वीप्सायां द्वित्वम् ।

3. धरति—प्राणान् इति शेषः । धृञ् धारणे भ्वादिः उभय० । शून्यम्—Void, empty, विषण्णम् रिक्तम्—Mark the effect of the news on पद्मावती ।

5. महीतलपरिसर्पणपांसुपाटलशरीरः—With his body all sullied with dust of rolling on ground. महीतले

परिसर्पणं तस्य पांसवः, तैः पाटलं शरीरं यस्य स । पाटल—reddish, greyish, but here soiled. The King began to roll on ground because of grief. उत्थाय—Rising up. उत्+स्था+ल्यप् । उदः स्थास्तम्भयोः सलोपः । प्रियशिष्ये—Dear disciple. She was his disciple in learning playing on lyre. इदानीम्—now, when the King is mourning. चक्रवाकः—Ruddy goose. चक्रः (Ruddy goose) इति वाकः (Title) यस्य स । वाक means वचनम् नमोवाकं प्रशास्महे उ. रा. ।

तादृशाः—Like him *i.e.*, in sorrowing. अन्ये what to speak of birds, even men are not and were not like him. अन्ये अपरे अजनलरामादयः इतिहासप्रसिद्धाः प्रेमिकाः Other men like अज, नल, राम । स्त्रीविशेषैः—स्त्रीणां विशेषाः तैः from their distinguished beloved. Even famous lovers, Aja, Nala and Rama were not so much aggrieved when separated from their distinguished beloved. तथा वेत्ति—Regards so dearly as Udayana, regards his Vasav. दग्धाप्यदग्धा—Though burnt still she is unburnt, *i.e.*, though dead still she is alive and lives enshrined in the heart of her lord. Parallel ideas : उपरतापि अनुपरता महासेनपुत्री एवमनुकम्पमानार्यपुत्रेण । Infra VI. Again न खलु स उपरतो यस्य वल्लभो जनः स्मरति । Mal. Mad. V.

1. यौगन्धरायणः—अथ भोः ! तं तु पर्यवस्थापयितुं न कश्चित् यत्नवानमात्यः ।

Yaug—Now Sir, did none of the ministers try to console him ?

ब्रह्मचारी—अस्ति रुमण्वान्नामामात्यो दृढं प्रयत्नवांस्तत्रभवन्तं पर्यवस्थापयितुम् । स हि

अनाहारे तुल्यः, प्रततरुदितक्षामवदनः
शरीरे संस्कारं नृपतिसमदुःखं परिवहन्।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः॥ १४ ॥

Brahma.—A minister, Rumanvan by name, has been trying hard to compose His Majesty. For, he is equal to him (King) in his fast. His body is emaciated through continuous weeping. Wearing decorations on his body, indicative of his grief equal to King's, he assiduously waits upon the King day and night. If the King gives up his life at once, he, too shall cease to live.

1. पर्यवस्थापयितुम्—सांत्वयितुम् आश्वासयितुं प्रकृतिस्थं कर्त्तुम् वा।

2. दृढम्—भृशम्। प्रयत्नवान्—प्रकृष्टाः बहवः यत्नाः प्रयासाः। प्रयत्नाः सन्ति अस्य इति प्रयत्नवान्। भूम्नि मतुप्।

अन्वयः—स अनाहारे तुल्यः। प्रततरुदितक्षामवदनः। शरीरे नृपतिसमदुःखं (यथास्यात् तथा) संस्कारं परिवहन् दिवा वा रात्रौ वा यत्नैः नरपतिं परिचरति। यदि नृपः प्राणान् सद्यः त्यजति, तस्य अपि उपरमः भवेत्।

व्याख्या—स रुमण्वान् अनाहारे अनशने तुल्यः समानः। यदा राजा पत्नीशोकविह्वलत्वाद्भोजनं न करोति तदा रुमण्वानपि न किञ्चिदपि अश्नाति। प्रततम् अविरतं रुदितं रोदनं, तेन क्षामं क्षीणं म्लानं वदनं मुखं उपलक्षणया शरीरं यस्य स। अविरतरोदनेन नृपवत् तस्य मुखमपि परिम्लानं संजातम्। शरीरे देहे। नृपतेः समं नृपतिसमम्। तादृशं दुःखं यस्मिन् कर्मणि। तत् यथा स्यात् तथा। अथवा नृपतिसमं दुःखं यस्य। तं संस्कारम्। परिवहन्

धारयन्। दिवा वा रात्रौ वा रात्रिन्दिवम्। यत्नैः महता क्लेशेन। नरपति नृपम्। परिचरति शुश्रूषते। रुमरावान् छायेव उदयनसदृशीं दुःखावस्थामनुभवति। तं पदे पदे अनुवर्त्तते। किं बहुना। यदि नृपः उदयनः सद्यः सत्वरं प्राणान् स्वजीवनं त्यजति, म्रियेत, तर्हि तस्य रुमरावतः अपि उपरमः मृत्युः सपदि एव भवेत्। नृपे मृते सति रुमरावान् क्षणमात्रमपि न जीविष्यति इति भावः। अहो तस्य राजभक्तिः।

Notes.—2. अनाहारे—This stanza describes loyalty of Rumnavata to the King. प्रततरुदितक्षामवदनः—with his face (body) emaciated with constant weeping, प्रततं रुदितं, तेन क्षामं वदनं यस्य सः। प्र+तन्+क्त (कर्मणि) रुद्+क्त भावे= रुदितम्। क्षाम=क्षै+क्तः (कर्त्तरि), क्षायो मः। There is अविधेय-विमर्शदोष here. प्रततरुदितक्षाम is the predicate of वदन, it should have been kept separate. संस्कारम्—embelishing, decoration, or dressing. सम्+कृ + घञ्, (संपरिभ्यां करोतौ भूषणे सुट्) नृपतिसमदुःखम् (a) Grieving equally with the King क्रि० वि० २या। नृपतेः समम्, तादृशं दुःखं यस्मिन् कर्मणि, तत् यथा स्यात् तथा। Adv. modifying परिवहन्। (b) समं दुःखं यस्मिन् स, सम दुःखं, नृपतेः समदुःखः, तम्; sympathetic of the King's grief. Adj. qualifying संस्कारः। Wearing decorations sympathetic of the King's grief. As the King was mourning, so the minister also was dressing himself like a mourner, वा and, as well as, समुच्चये वा. It is used like च here. तस्याप्युपरमः —His death also shall follow. This shows the great loyalty of the King—The metre is शिखरणी.

1. वासवदत्ता—(स्वगतम्) दिट्ठिआ सुणिक्खित्तो दाणीं अय्यउत्तो। [दिष्ट्या सुनिक्षिप्तः इदानीम् आर्यपुत्रः।]

Vasav—(To herself). Luckily my dear husband has been now deposited well, (in good hands).

2. यौगन्धरायणः—(आत्मगतम्) अहो महद्भारमुद्वहति रुमण्वान् । कुतः—

सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः ।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः ॥ १५ ॥

(प्रकाशम्) अथ भोः । पर्यवस्थापित इदानीं स राजा ?

Yaug—(To himself). Oh! Rumanvan is bearing a great burden (grave responsibility). For—This burden (I bear) has rest, but his is a continuous toil. For everything is under him, under whom is the king or who has the king under him. (Aloud) Now Sir, is the king consoled now ?

3. ब्रह्मचारी—तदिदानीं न जाने । इह तया सह हसितम्, इह तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम् इह तया सह शयितम्, इत्येवं तं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद्ग्रामाद्गृहीत्वापक्रान्तम् । ततो निष्क्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः । ततोऽहं निर्गतोऽस्मि ।

Brahm—That I know not now. "Here had I laughed with her, here had I talked with her, here had I dwelt with her, here had I been angry with her, here had I slept with her." While thus lamenting, the King was taken away, with great difficulty, from that village by the ministers. After that, the King having gone, the village became charmless like the sky when the stars and the moon have disappeared from it.

4. तापसी—सो खु गुणवन्तो णाम राजा, जो आअन्तुपण वि इमिणा एव्वं पसंसीअदि। [स खलु गुणवान् नाम राजा, य आगन्तुकेन अपि अनेन एवं प्रशस्यते ।]

Lady-Hermit—That King, of course, must be very meritorious, who is thus highly praised even by this new-comer.

5. चेटी—भट्टिदारिए ! किं णु खु अवरा इत्थिआ तस्स हत्थं गमिस्सदि । [भर्तृदारिके ! किं नु खलु अपरा स्त्री तस्य हस्तं गमिष्यति ।]

Maid—Princess ; can not possibly any other lady fall into his hand !

6. पद्मावती—(आत्मगतम्) मम हिअएण एव्व सह मन्तिदं । [मम हृदयेन सह एव मंत्रितम् ।]

Padma—(To herself). She has spoken just what my heart wants or she has spoken out my mind.

7. ब्रह्मचारी—मापृच्छामि भवन्तौ । गच्छामस्तावत् ।

Brahm—I beg leave of you both, now I must go away.

8. उभौ—गम्यतामर्थसिद्धये ।

Both—You may go to achieve your object.

9. ब्रह्मचारी—तथास्तु, (निष्क्रान्तः ।)
Brahm—May it be so ! (*Exit*)

1. सुनिक्षिप्तः—सुन्यस्तः, स्वामिभक्तसचिवस्य हस्ते निहितः । अहो ! मे आनन्दः ।

2. अन्वयः—अयम् भारः सविश्रमः हि । तु तस्य श्रमः प्रसक्तः । राजा हि यत्र अधीनः, सर्वम् तस्मिन् अधीनम् ।

Vasav—(To herself). Luckily my dear husband has been now deposited well, (in good hands).

2. यौगन्धरायणः—(आत्मगतम्) अहो महद्भारमुद्वहति रुमण्वान् । कुतः—

सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः ।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः ॥ १५ ॥

(प्रकाशम्) अथ भोः । पर्यवस्थापित इदानीं स राजा ?

Yaug—(To himself). Oh ! Rumanvan is bearing a great burden (grave responsibility). For—This burden (I bear) has rest, but his is a continuous toil. For everything is under him, under whom is the king or who has the king under him. (Aloud) Now Sir, is the king consoled now ?

3. ब्रह्मचारी—तदिदानीं न जाने । इह तया सह हसितम्, इह तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम्, इह तया सह शयितम्, इत्येवं तं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद्ग्रामाद्गृहीत्वापक्रान्तम् । ततो निष्क्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः । ततोऽहं निर्गतोऽस्मि ।

Brahm—That I know not now. "Here had I laughed with her, here had I talked with her, here had I dwelt with her, here had I been angry with her, here had I slept with her." While thus lamenting, the King was taken away, with great difficulty, from that village by the ministers. After that, the King having gone, the village became charmless like the sky when the stars and the moon have disappeared from it.

4. तापसी—सो खु गुणवन्तो णाम राजा, जो आअन्तुएण वि इमिणा एव्वं पसंसीअदि। [स खलु गुणवान् नाम राजा, य आगन्तुकेन अपि अनेन एवं प्रशस्यते।]

Lady-Hermit—That King, of course, must be very meritorious, who is thus highly praised even by this new-comer.

5. चेटी—भट्टिदारिए! किं णु खु अवरा इत्थिआ तस्स हत्थं गमिस्सदि। [भर्तृदारिके! किं नु खलु अपरा स्त्री तस्य हस्तं गमिष्यति।]

Maid—Princess; can not possibly any other lady fall into his hand!

6. पद्मावती—(आत्मगतम्) मम हिअएण एव्व सह मन्तिदं। [मम हृदयेन सह एव मंत्रितम्।]

Padma—(To herself). She has spoken just what my heart wants or she has spoken out my mind.

7. ब्रह्मचारी—आपृच्छामि भवन्तौ। गच्छामस्तावत्।

Brahm—I beg leave of you both, now I must go away.

8. उभौ—गम्यतामर्थसिद्धये।

Both—You may go to achieve your object.

9. ब्रह्मचारी—तथास्तु, (निष्क्रान्तः।)
Brahm—May it be so! (*Exit*)

1. सुनिक्षिप्तः—सुन्यस्तः, स्वामिभक्तसचिवस्य हस्ते निहितः। अहो! मे आनन्दः।

2. अन्वयः—प्रथम् भारः सविश्रमः हि। तु तस्य श्रमः प्रसक्तः। राजा हि यत्र अधीनः, सर्वम् तस्मिन् अधीनम्।

the life of the King. सर्वं तस्मिन् अधीनम्—Everything depends on him, the entire success of our plan depends on him and hence the gravity of his responsibility. यत्र and तस्मिन् have taken सप्तमी, in connection with कर्मप्रवचनीय 'अधि' by the rule. "यस्मादधिकं यस्यचेश्वरवचनं तत्र सप्तमी," "अधिरीश्वरे"।

अधि+खः=अधीनः, (अपउत्ताशित...अस्युत्तरपदात्खः)

3. हसितम्—I laughed or jokes were cut by me; हस्+क्त (भावे), similarly in कथितम्, पर्युषितम्, and कुपितम् and शयितम्, भावे क्त has come, transitive roots being treated as intransitive, मया is understood in each case. महता यत्नेन—with great effort. This shows that the king did not like to leave the place where his beloved had breathed her last. प्रोषितनक्षत्र चन्द्रम्—Devoid of the moon and the stars, नक्षत्राणि चचन्द्रश्च, नक्षत्रचन्द्राः प्रोषिताः (banished) नक्षत्रचन्द्राः यस्मात् तत्।

The village Lavanaka is compared with the sky and the King with the moon, and the ministers with the stars.

5. हस्तं गमिष्यति—shall get into his hand, चेटी means to say. "Blessed shall be woman, who will be fortunately married to this examplary lover. Shall you not select him for your husband?"

6. हृदयेन सह—She has spoken along with my heart, *i.e.*, just as my heart speaks. Com. शकुन्तला—हृदय मा वत्ताम्य, एषा त्वया चिन्तितानि अनसूया मंत्रयते।

7. आपृच्छामि—Should be grammatically आपृच्छे, I ask leave of you both according to 'आङि नुप्रच्छ्योः'। Why then plural in गच्छामः?

Perhaps the heart of the student is very much agitated and so *he commits slips.* Or "निरङ्कुशाः कवयः" therefore such grammatical mistakes.

1. यौगन्धरायणः—साधु, अहमपि तत्रभवत्याभ्यनुज्ञातः गन्तुमिच्छामि ।

Yaug—Well, I too want to go on being permitted by her ladyship.

2. काञ्चुकीयः—तत्रभवत्याभ्यनुज्ञातो गन्तुमिच्छति किल ।

Cham—He says he wishes to go with your Ladyship's permission.

3. पद्मावती—अय्यस्स भइणिआ अय्येण विना उक्कण्ठिस्सदि । [आर्यस्य भगिनिका आर्येण विना उत्कण्ठिष्यते]

Padma—Your Honour's Sister will pine in your Honour's absence.

4. यौगन्धरायणः—साधुजनहस्तगतैषा नोत्कण्ठिष्यति (काञ्चुकीयमवलोक्य) गच्छामस्तावत् ।

Yaug—Placed as she is in the hand of a noble person, she will not languish. (Eyeing the Chamberlain) we must go now.

5. काञ्चुकीयः—गच्छतु भवान् पुनर्दर्शनाय ।
Cham—Your Honour may go away to meet us again.

6. यौगन्धरायणः—तथास्तु । (निष्क्रान्तः ।
Yaug—So be it. (Exit).

7. काञ्चुकीयः—समय इदानीमभ्यन्तरं प्रवेष्टुम् ।
Cham—Now it is time to enter in.

8. पद्मावती—अय्ये ! वन्दामि । [आर्ये वन्दे]

Padma—Revered lady, I salute you.

9. तापसी—जादे ! तव सदिसं भत्तारं लभेहि । [जाते ! तव सदृशं भर्त्तारं लभस्व ।]

Lady Hermit—Dear Child, may you get a husband worthy of you.

10. वासवदत्ता—अय्ये ! वन्दामि दाव अहं । [आर्ये ! वन्दे तावद् अहम् ।]

11. तापसी—तुमं पि अइरेण भत्तारं समासादेहि । [त्वमपि अचिरेण भर्त्तारं समासादय ।]

Vasav—Revered lady, I just bow to you.

Lady-Hermit—May you, too, get your husband soon.

12. वासवदत्ता—अणुग्गहीदह्मि । [अनुगृहीतास्मि]

Vasav—I am much obliged.

13. काञ्चुकीयः—तदागम्यताम् । इत इतो भवति ! सम्प्रति हि

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्
परिभ्रष्टो दूराद्रविरपि च संक्षिप्तकिरणो
रथं व्यावृत्यासौ प्रविशति शनैरस्तशिखरम् ॥ १६ ॥

(निष्क्रान्ताः सर्वे ।)

प्रथमोऽङ्कः ।

Cham—Come then. This way, this way, Your Highness. For now.

Birds have repaired to their nests, sages have plunged in the water. Fire, being kindled, is blazing forth, the smoke is pervading the penance wood. Fallen

from a long height (distance), with all his rays contracted, the yonder Sun, as well, turning his Chariot, is entering slowly the peak of the setting hill.

(EXEUNT ALL)

The first Act

1. साधु इति—तत्रभवत्या मगधराजकुमार्या। यतः सा दूरस्था, अतः तत्रभवतो प्रयोगः 3. आर्येति—उत्कंठिष्यति उत्कण्ठिता उत्सुका भविष्यति।

4. साध्विति—साधुजनः आर्यजनः तस्य हस्तंगता आश्रिता, आर्यजनसंश्रिता—'उत्कण्ठिष्यति' अप्रात्मनेपदमुचितम्। कवीनां निरंकुशत्वात्।

5. पुनर्दर्शनाय—पुनरागमनाय। अथवा गच्छतु अधुना भवान्, पुनर्नो निजदर्शनंदेहि।

13. खगेति—अन्वयः—खगाः वासोपेताः, मुनिजनः सलिलम् अवगाढः। प्रदीप्तः अग्निः भाति। धूमः मुनिवनम् प्रविचरति। असौ दूरात् परिभ्रष्टः संक्षिप्तकिरणः रविः अपि च रथम् व्यावर्त्य शनैः अस्तशिखरम् प्रविशति।

व्याख्या—खगाः विहगाः वासम् निवासस्थानं स्वस्वनीडम् उपेताः गताः। मुनिजनः तापसः सलिलं जलम् अवगाढः स्नातुं प्रविष्टः। प्रदीप्तः प्रज्वलितः अग्निः यज्ञियः वह्नियः भाति दीप्यते। तस्य धूमः मुनिवनं तपोवनं विचरति संचरति। असौ पुरोवर्ती, दूरात् उच्चस्थानात् आकाशात् परिभ्रष्टः पतितः, संक्षिप्तकिरणः—संक्षिप्ताः संकुचिताः किरणाः रश्मयः येन स संकुचितरश्मिः, रविः सूर्यः अपि च रथं स्वरथं व्यावर्त्य परावर्त्य गमनात् निवार्य, शनैः मन्दम्मन्दम् अस्तशिखरम् अस्ताचलशृंगं प्रविशति समागतः संध्याकालः। अस्माभिः स्वस्वनिवासस्थानं गन्तव्यम् इति भावः। शिखरणी वृत्तम्। स्वभावोक्तिः अलंकारः।

Notes—तत्रभवती—Refers to पद्मावती,

Yaug—Talks with her through the Chamberlain and so he uses तत्रभवती instead of अत्रभवती, as she was sitting beyond the Chamberlain.

4. साधुजनहस्तगता—साधुः जनः, तस्य हस्तः, तं गता इति। gone or resorted to the hand of a good man. He means to say that his sister is now under the care of a good man and so she won't pine for him. She shall find ample diversion in Her Highness's Company.

7. अभ्यन्तरम्—Inside, the inner huts, they were till then at the gate of the hermitage.

13. अवगाढः—Plunged into, entered into, अव+गाह्+क्तः, प्रदीप्तः—Kindled, lighted, the fire was burnt either for sacrificial purposes or for preparing the food. मुनिवनम्—It is कर्म of प्रविचरति according to अकर्मकधातुभियोगे etc. | दूरात्—from a high altitude, from a great height in the sky. संक्षिप्तकिरणः—One whose rays were contracted. Compare. "सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखैः" शाकुन्तले कालिदासः। There is a very nice picture of the setting sun in Ratnavali III, 5. The poet voices here the primitive notion of the falling of the sun from the sky and setting on the 'Astachala'.

अथ द्वितीयोऽङ्कः।

(ततः प्रविशति चेटी)

चेटी—कुञ्जरिए! कुञ्जरिए! कहिं कहिं भट्टिदारिआ पदुमावदी?

[कुञ्जरिके! कुञ्जरिके! कुत्र कुत्र भर्तृदारिका पद्मावती?]

किं भणासि ? एसा भट्टिदारिआ माहवीलदामण्डवस्य पस्सदो कन्दुएण कीलदि त्ति । जाव भट्टिदारिअं उवसप्पामि । [किं भणसि ?, एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडति इति यावत् भर्तृदारिकाम् उपसर्पामि] । (परिक्रम्यावलोक्य) अम्मो ! इअं भट्टिदारिआ उक्करिदकण्णचूलिएण वाआम सञ्जाद-सेद-बिन्दु-विइत्तिदेण परिस्सन्त-रमणीय-दंसणेण मुहेण कन्दुएण कीलन्दी इदो एव्व आअच्छदि । जाव उवसप्पिस्सं । [अम्मो इयं भर्तृदारिका उत्कृत-कर्ण-चूलिकेन व्यायाम-सञ्जात-स्वेद-बिन्दु विचित्रितेन परिश्रान्त-रमणीय-दर्शनेन मुखेन कन्दुकेन क्रीडन्ती इतः एव आगच्छति । यावद् उपसर्प्यामि ।]

(निष्क्रान्ताः ।)

प्रवेशकः ।

(Then Enter the Maid)

Maid—Kunjarika, Kunjarika, where is princess Padmavati ? What do you say ? The princess is playing with a ball by the side of the Madhavi-bower. I will then just advance to the princess. (Walking and seeing). Aha ! the princess is coming hither, playing with a ball, with her (pendent) ear-rings turned up,

उत्कृत-कर्णा चूलिकेन-उत्कृते क्रीडाकाले दोलनभयात् ऊर्ध्वं कर्णा-शष्कुल्योरुपरि कृते स्थापिते कर्णाचूलिके कर्णावतंसौ यस्मिन् तेन । व्यायामेन अङ्गसंचालनेन, संजाताः उत्पन्नाः स्वेदबिन्दवः श्रमकणाः तैः विचित्रितेन कर्बुरितेन मुखेन । परिश्रान्तमपि क्लान्तमपि रमणीयं कमनीयं दर्शनं यस्य तेन । मुखेन वदनेन (इत्थंभूतलक्षणे ३या) लक्षिता इतिभावः ।

Notes—किं भणसि—It is technically called आकाश-भाषित in dramas. In this, a character opens his talk with 'what do you say'? and pretends to inform the audience of the talk of any absent player, which he shows himself to be hearing. *See Vyakhya.*

माधवीलता—It is the most favourite flower-creeper of the Sans. poets known as वासन्ती, Kali called it वनज्योत्स्ना। अम्मो ! Aha, Oho, still used as ओमा ! in Bengal by females in expressing alarm. उत्कृतकर्णाचूलिकेन —in which the ear-rings are turned up. While playing, our boys and girls raise up their pendent ear-rings and place them on the ears. व्यायाम etc.—She was perspiring through the fatigue of ball-play. Mark—In ancient India, even our girls used to play with ball though not, of course, with foot-ball, but with something like the hockeyball.

प्रवेशकः—वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः। संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥ १ ॥ प्रवेशकोऽनुदात्तोक्त्या नीचपात्र-प्रयोजितः । अङ्कद्वयान्तर्विज्ञेयः शेषंविष्कम्भके यथा ॥ प्रवेशक is an interlude, coming between two acts and showing briefly the connection between the past and the future events of the story by means of the conversation in

किं भणासि ? एसा भट्टिदारिआ माहवीलदामण्डवस्स पस्सदो कन्दुएण कीलदि त्ति । जाव भट्टिदारिअं उवसप्पामि । [किं भणासि ?, एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडति इति यावत् भर्तृदारिकाम् उपसर्पामि] । (परिक्रम्याव-लोक्य) अम्मो ! इअं भट्टिदारिआ उक्करिदकण्णचूलिएण वाआम सञ्जाद-सेद-बिन्दु-विइत्तिदेण परिस्सन्त-रमणीय-दंसणेण मुहेण कन्दु-एण कीलन्दी इदो एव्व आअच्छदि । जाव उवसप्पिस्सं । [अम्मो ! इयं भर्तृदारिका उत्कृत-कर्ण-चूलिकेन व्यायाम-सञ्जात-स्वेद-बिन्दु-विचित्रितेन परिश्रान्त-रमणीय-दर्शनेन मुखेन कन्दुकेन क्रीडन्ती इतः एव आगच्छति । यावद् उपसर्प्यामि ।]

(निष्क्रान्ता ।)

प्रवेशकः ।

(Then Enter the Maid)

Maid—Kunjarika, Kunjarika, where is princess Padmavati ? What do you say ? The princess is playing with a ball by the side of the Madhavi-bower. I will then just advance to the princess. (Walking and seeing). Aha ! the princess is coming hither, playing with a ball, with her (pendent) ear-rings turned up, with her face bespangled with the drops of the sweat caused by the exercise, and looking lovely though languid (exhausted) (Exit).

'Prabeshaka'. Inter-Scene.

कुञ्जरिक—किं भणासि—आकाशभाषितमिदम् । तद्यथा—"किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ।" (दश १) । माधवीलतामण्डपस्य वासन्तीलता-कुञ्जस्य । पार्श्वतः पार्श्वे । अम्मो ! संभ्रमे आश्चर्ये ।

उत्कृत-कर्णा चूलिकेन-उत्कृते क्रीडाकाले दोलनभयात् ऊर्द्ध्वं कर्णशष्कुल्योरुपरि कृते स्थापिते कर्णचूलिके कर्णावतंसौ यस्मिन् तेन। व्यायामेन अङ्गसंचालनेन, संजाताः उत्पन्नाः स्वेदबिन्दवः श्रमकणाः तैः विचित्रितेन कर्बुरितेन मुखेन। परिश्रान्तमपि क्लान्तमपि रमणीयं कमनीयं दर्शनं यस्य तेन। मुखेन वदनेन (इत्थंभूतलक्षणे ३या) लक्षिता इतिभावः।

Notes—किं भणसि—It is technically called आकाशभाषित in dramas. In this, a character opens his talk with 'what do you say'? and pretends to inform the audience of the talk of any absent player, which he shows himself to be hearing. *See Vyakhya.*

माधवीलता—It is the most favourite flower-creeper of the Sans. poets known as वासन्ती, Kali called it वनज्योत्स्ना। अम्मो! Aha, Oho, still used as ओमा! in Bengal by females in expressing alarm. उत्कृतकर्णचूलिकेन—in which ths ear-rings are turned up. While playing, our boys and girls raise up their pendent ear-rings and place them on the ears. व्यायाम etc.—She was perspiring through the fatigue of ball-play. Mark—In ancient India, even our girls used to play with ball though not, of course, with foot-ball, but with something like the hockeyball.

प्रवेशकः—वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः। संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः॥ १॥ प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः शेषंविष्कम्भके यथा॥ प्रवेशक is an interlude, coming between two acts and showing briefly the connection between the past and the future events of the story by means of the conversation in

यन्न-परिमाण-णिव्वुत्तं णामहेअं महासेणो त्ति । [अस्ति उज्ज-यिन्याः राजा प्रद्योतो नाम । तस्य बलपरिमाणनिर्वृत्तं नामधेयं महासेनः इति ।]

Vasav—There is a King of Ujjayini, Pradyota by name, Mahasena is the (second) name, given to him owing to the Vatsa magnitude of his army.

11. चेटी—भट्टिदारिआ तेण रञ्ञा सह सम्बन्धं णेच्छदि। [भर्तृदारिका तेन राज्ञा सह सम्बन्धं नेच्छति ।]

Maid—Our princess does not desire alliance with that King.

12. वासवदत्ता—अह केण खु दाणिं अभिलसदि । [अथ केन खलु इदानीम् अभिलपति ।]

Vasav—Then, with whom she desires (alliance)?

13. चेटी—अत्थि वच्छराओ उदअणो णाम । तस्स गुणाणि भट्टिदारिआ अभिलसदि। [अस्ति वत्सराजः उदयनो नाम । तस्य गुणान् भर्तृदारिका अभिलपति ।]

Maid—There is a King of Vatsa, Udayana by name. His virtues our princess admires.

14. वासवदत्ता—(आत्मगतम्) अय्यउत्तं भत्तारं अभिलसदि । (प्रकाशम्) केण कारणेण ?। [आर्यपुत्रं भर्तारम् अभिलपति। केन कारणेन ?]

Vasav—(To herself) she wants my lord to be her husband.

(Aloud) For what reason?

15. चेटी—साणुक्कोसो त्ति । [सानुक्रोशः इति ।]

Maid—Because he is very loving or kind-hearted.

16. वासवदत्ता—(आत्मगतम्) जाणामि जाणामि । अअं वि जण एव्वं उम्मादिदो ।

Vasav—(To herself). I know, I know. This fellow (my own self), too, was so infatuated.

17. चेटी— भट्टिदारिए ! जदि सो राआ विरूवो भवे । [भर्तृदारिके ! यदि स राजा विरूपो भवेत् ।]

Maid—Princess, if that King be ugly.

18. वासवदत्ता—णहि णहि दंसणीओ एव्व । [नहि नहि दर्शनीयः एव ।]

Vasav—No, no. He is very handsome.

19. पद्मावती—अय्ये ! कहं तुवं जाणासि ? [आर्ये ! कथं त्वं जानासि ?]

Padma—Noble lady, how do you know ?

20. वासवदत्ता—(आत्मगतम्) अय्यउत्तपक्खपादेण अदिक्कन्दो समुदाआरो । किं दाणिं करिस्सं । होदु, दिट्ठं । (प्रकाशम्) हला ! एव्वं उज्जइणीओ जणो मन्तेदि । [आर्य-पुत्र-पक्ष-पातेन अतिकान्तः समुदाचारः किम् इदानीम् करिष्यामि ? भवतु, दृष्टम् । हला ! एवम् उज्जयिनीयो जनः मंत्रयते ।

Vasav—(To herself). Owing to my partiality for my lord, I have overstepped decorum. What shall I do now ? Well, I see. (Aloud). So say the people of Ujjayini, My dear.

21. पद्मावती—जुज्जइ । ण खु एसो उज्जइणीदुल्लहो । सव्वजण-मणाभिरामं खु सोभग्गं णाम । [युज्यते । न खलु एष उज्जयिनीदुर्लभः । सर्व-जन-मनोऽभिरामं खलु सैाभाग्यं नाम ।]

Padma—That's true. He is not, indeed, rare at Ujjayini. Beauty, of course charms the minds of all. (*Cf.* A thing of beauty is a joy forever).

(ततः प्रविशति धात्री)

(Then enter the Nurse).

धात्री—जेदु भट्टिदारिआ । भट्टिदारिए ! दिण्णासि । [जयतु भर्तृदारिका । भर्तृदारिके ! दत्तासि ।]

Nurse—Victory to the princess. Princess, you are given away.

वासवदत्ता—अय्ये ! कस्स ? [आर्ये ! कस्मै ?]

Vasavadatta—Madam, to whom ?

धात्री—वच्छराअस्स उदअणस्स । (वत्सराजाय उदयनाय)

Nurse—To Udayana, King of the Vatsa-lands.

वासवदत्ता—अह कुसली सो राआ ? [अथ कुशली स राजा ?]

Vasav—Well, is the King all right ?

धात्री—कुसली सो आअदो । तस्स भट्टिदारिआ पडिच्छिदा-अ । [कुशली स आगतः । तस्य भर्तृदारिका प्रतीष्टा च ।]

Nurse—He is come here safe and sound and has accepted the princess.

वासवदत्ता—अच्चाहिदं । [अत्याहितम् ।]

Vasav—A great Mishap !

धात्री—किं एत्थ अच्चाहिदं ? (किम् अत्र अत्याहितम् ?)

Nurse—What is the mishap in it ?

वासवदत्ता—ण हु किञ्चि । तह णाम सन्तप्पिअ उदासीणो होदि त्ति । [न खलु किञ्चित् । तथा नाम संतप्य उदासीनो भवति इति ।]

Vasav—Nothing indeed. Only this that he should be indifferent after lamenting so.

धात्री—अय्ये ! आअमप्पहाणाणि सुलहपय्यवत्थाणाणि महापुरुसहिअआणि होन्ति । [आर्ये ! आगमप्रधानानि सुलभ-पर्यवस्थानानि महापुरुषहृदयानि भवन्ति ।]

Nurse—Madam, the hearts of the great follow the Sastras and are easily consoled.

वासवदत्ता—अय्ये ! सअं एव्व तेण वरिदा । [आर्ये ! स्वयमेव तेन वरिता ।)

Vasav—Lady, did he himself woo her ?

धात्री—णहि णहि । अण्णप्पओअणेण इह आअदस्स अभिजणविण्णाणवओरुवं पेक्खिअ सअं एव्व महाराएण दिण्णा । [नहि नहि । अन्यप्रयोजनेन इह आगतस्य अभि-जनविज्ञानवयोरूपं प्रेक्ष्य स्वयम् एव महाराजेन दत्ता ।]

Nurse—No, no. He came here for other business. The King, *seeing his high birth, his learning, his age*, and beauty himself offered her.

वासवदत्ता—(आत्मगतम्) एव्वं । अणवरद्धो दाणि एत्थ अय्यउत्तो । [एवम् । अनपराद्धः इदानीम् अत्र आर्यपुत्रः ।]

Vasav—So it is : My husband is not guilty in this matter.

(प्रविश्यापरा)

(Another Maid entering)

चेटी—तुवरदु तुवरदु दाव अय्या । अज्ज एव्व किल सोभणं णक्खत्तं । अज्ज एव्व कोदुअमङ्गलं कादव्वं त्ति अह्माणं भट्टिणी भणादि । [त्वरताम् त्वरताम् तावत् आर्या । अद्य एव किल शोभनं नक्षत्रम् । अद्य एव कौतुकमङ्गलम् कर्त्तव्यम् इति अस्माकम् भट्टिनी भणति ।]

Maid—Hurry up lady, hurry up. To-day, indeed, the stars are auspicious. Our mistress says, that just to-day the nuptial ceremony should be performed.

वासवदत्ता—(आत्मगतम्) जह जह तुवरदि तह तह अन्धीकरेदि मे हिअअं। [यथा यथा त्वरते तथा तथा अन्धीकरोति मे हृदयम्।]

Vasav—(To herself). The more she hurries, the more she blinds my heart.

धात्री—एदु एदु भट्टिदारिआ। [एतु एतु भर्तृदारिका।] (Come, princess, come).

(निष्क्रान्ता सर्वे)
(Exeunt All)
द्वितीयोऽङ्कः।
End of Act II.

Notes—1. तस्य प्रतीक्षा should be तेन प्रतीक्षा, was accepted by him.

2—अत्याहितम् great calamity, अतिशयेन आधीयते मनसि इति That affects the mind much. अति+आ+धा+क्त (भावे), तथा नाम etc.—She conceals her real feeling. I exclaimed so, because I thought that when he has become so indifferent to his first wife for whom he lamented so much, then, he might prove indifferent to his second wife too in course of time and so it will be a great misfortune for her. Thus she passes off the matter by interpreting her exclamation differently.

3—आगमप्रधानानि—(i) आगमः शास्त्रम् मित्रोपदेशो वा प्रधानः predominant येषां तानि। The hearts which attach highest importance to the teachings of the Sastras or to the counsels of the friends, *i. e.*, which follow the injunctions of the Sastras or the sage advice of friends. (ii) आगमः advent (of sorrow), the befalling of calamity,

प्रधान: chief, overpowering येषां तानि । The hearts of the great are greatly overpowered by sorrow, but are easily consoled. (iii) आगमः—आगच्छतीति what comes to pass, what becomes necessary to be done, an emergency, as in the present case, regaining of the lost Kingdom. The hearts of the great rise equal to the emergency that arises etc The latter two interpretations have been given by Mr. Kale, but they are farfetched. The first is the best as it is traditional.

" यद्यपि महापुरुषाणां हृदयानि विपत्काले व्यथितानि भवन्ति तेषां शास्त्रज्ञत्वात् तानि शीघ्रमेव शान्तानि भवन्ति । "
See Gita—ii : " गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः । "

4. अन्यप्रयोजनेन—For some other purpose. Perhaps the King had visited Gaya to perform Gaya श्राद्ध of his wife who had died an untimely death (अकालमृत्यु).

5. अभिजनविज्ञान etc.—These are the qualifications required from the bridegroom. कुलं च शीलं च सनाथतां च विद्यां च वित्तं चवपुर्वयश्च । एतान्गुणान् सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् । Raghu. VI, 19.

6. शोभनं नक्षत्रम्—In marriage auspicious constellation is the chief consideration ; auspiciousness of तिथि or लग्न comes next.

7. कौतुकमङ्गलम्—कौतुक means विवाह सूत्रबन्धः The nuptial thread bracelet tied on the left wrist of the bride and on the right wrist of the bridegroom. The tying of the विवाहकङ्कण is an auspicious ceremony in marriage कौतुकरूपं मङ्गलम् (मध्य. कर्म. स.)

8. अन्धीकरोति—न अन्धम् अन्धं करोति, अन्ध+अभूत तद्भावेच्विः+कृ+लट् ति ।

अथ तृतीयोऽङ्कः।

(ततः प्रविशति विचिन्तयन्ती वासवदत्ता)

(Then Enter Vasavadatta a-thinking).

वासवदत्ता—विवाहामोदसङ्कुले अन्तेउरचउस्साले परित्तजिअ पदुमावदिं इह आअदह्मि पमदवणं। जाव दाणिं भाअधेअनिव्वुत्तं दुःखं विणोदेमि। (परिक्रम्य) अहो अच्चाहिदं। अय्यउत्तो वि णाम परकेरओ संवुत्तो। जाव उवविसामि। [विवाहामोदसङ्कुले चतुश्शाले परित्यज्य पद्मावतीम् इह आगतास्मि प्रमदवनम्। यावत् इदानीम् भागधेयनिर्वृतम् दुःखम् विनोदयामि (परिक्रम्य) अहो अत्याहितम्! आर्यपुत्रोऽपि परकीयः संवृत्तः। यावत् उपविशामि (उपविश्य) धञ्ञा खु चक्कवाअवहू जा अण्णोण्णविरहिदा ण जीवइ। ण खु अहं पाणाणि परित्तजामि। अय्यउत्तं पेक्खामि त्ति एदिणा मणोरहेण जीवामि मन्दभाआ। (धन्या खलु चक्रवाकवधूः या अन्योऽन्यविरहिता न जीवति। न खलु अहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामि इति एतेन मनोरथेन जीवामि मन्दभागा।]

Vasav—Leaving Padmavati in the quadrangle of the harem, full of nuptial rejoicings, I have come to this pleasure-garden. I will then divert my sorrow given by my fate. (Walking about). Oh a great Mishap! Even my husband belongs now to other. I will sit down (sitting) Blessed is the Chakrabak female, who lives not, when mutually separated. I do not indeed give up my life. With this desire (hope) that I will see my husband, I live, luckless as I am.

Notes—1. विवाहामोदसङ्कुले—विवाहस्य आमोदाः तैः सङ्कुले व्याप्ते।

2. चतसृणां शालानां समाहारः इति चतुश्शालम् (समाहार द्वन्द by वार्त्तिक), अन्तःपुरस्य चतुश्शालम् (The quadrangle of the harem), तस्मिन्। चतुःशालम् is known in

Hindi as चौखण्डी "Indian' Zanana", with buildings on four sides in a quadrangular form.

3. प्रमदवन—garden where ladies of the harem walk, play and gambol.

4. परकीय—पर+छः (ईय), क comes by कुक् जनस्य परस्यच।

5. मनोरथेन—हेतौ तृतीया। मन्दः भागः यस्या सा मन्दभागा।

(ततः प्रविशति पुष्पाणि गृहीत्वा चेटी)

(Then enter a Maid with flowers)

चेटी—कहिं णु खु गदा अय्या आवन्तिआ। (परिक्रम्यावलोक्य च) अम्मो इअं चिन्तासुञ्जहिअआ णीहार पडिहदचन्दलेहा विअ अमण्डिदभद्दअं वेसं धारअन्दी पिअंगुसिलापट्टए उवविट्ठा। जाव उवसप्पामि। (उपसृत्य) अय्ये! आवन्तिए! को कालो तुमं अण्णेसामि। [क नु खलु गता आर्या आवन्तिका। (परिक्रमावलोक्य च) अम्मो इयं चिन्ताशून्यहृदया नीहारप्रतिहतचन्द्रलेखा इव अमण्डितभद्रकं वेषं धारयन्ती प्रियंगुशिलापट्टके उपविष्टा। यावत् उपसर्पामि। आर्ये! अवन्तिके! कः कालः त्वाम् अन्वेषामि।]

Maid—Where is lady Avantika gone? (Walking and seeing). Oh, she is there sitting on a slab of stone under the Priyangu creeper, with her heart vacant on account of thought, and putting on a garb beautiful though undecorated, like the disc of the moon obscured by mist. I will then approach her. Revered Avantika, how long have I been searching for you!

वासवदत्ता—किणिमित्तं। [किन्निमित्तम्]

Vasav—Wherefore.

चेटी—अहाअं भट्टिणी भणादि—महाकुलप्पसूदा सिणिद्धा णिउणा त्ति। इमं दाव कोदुअमालिअं गुम्हदु अय्या। [अस्माकं भट्टिनी भणति—महाकुलप्रसूता स्निग्धा निपुणा इति। इमां तावत् कौतुकमालां गुम्फतु आर्या।]

वासवदत्ता—(वर्जयित्वा विलोक्य) इमं दाव ओसहं किं णाम ! [इदं तावत् औषधं किं नाम ?]

Vasav—(Taking out and seeing). What is the name of this herb ?

चेटी—अविहवाकरणं णाम । [अविधवाकरणं नाम ।]

Maid—" Widowhood-proof" is its name.

वासवदत्ता—(आत्मगतम्) इदं बहुसो गुम्फिदव्वं मम अ पदुमावदीए अ । (प्रकाशम्) इदं दाव ओसहं किं णाम ? [इदं बहुशो गुम्फितव्यं मम च पद्मावत्याश्च । (प्रकाशम्) इदं तावत् औषधं किं नाम ?]

Vasav—(To herself). This should be wreathed in plenty, both for my own sake and for the sake of Padmavati : (Aloud), what is the name of this herb here ?

चेटी—सवत्तिमद्दणं णाम । [सपत्नी-मर्दनं नाम ।]

Maid—It is called Co-wife-Crusher."

वासवदत्ता—इदं ण गुम्फिदव्वं । [इदं न गुम्फितव्यम् ।]

Vasav—This should not be woven.

चेटी—कीस ? [कस्मात् ?]

Maid—Why ?

वासवदत्ता—उवरदा तस्स भय्या, तं णिप्पओअणं त्ति । [उपरता तस्य भार्या, तत् निष्प्रयोजनम् इति ।]

Vasav—His wife is dead, therefore it is useless.

(प्रविश्यापरा)

(Entering other maid)

चेटी—तुवरदु तुवरदु अय्या ! एसो जामादुओ अविहवाहिं अब्भन्तर-चउस्सालं पवेसीअदि । [त्वरताम् त्वरताम् आर्या ! एष जामाता अविधवाभिः अभ्यन्तरचतुश्शालं प्रवेश्यते ।]

Maid—Make haste, Lady, please make haste ; the

son-in-law is being conducted there into the inner apartment by the un-widowed damsels.

वासवदत्ता—अइ ! वदामि, गह्न एदं । [अयि ! वदामि गृहाण एतत् ।]

Vasav—My maid, I say take it.

चेटी—सोहणं । अय्ये ! गच्छामि दाव अहं । [शोभनम् । आर्ये ! गच्छामि तावत् अहम् ।]

Maid—Nice, madam. I am now going away.

(उभे निष्क्रान्ते ।)

(Exeunt both)

वासवदत्ता—गदा एसा । अहो अच्चाहिदं । अय्यउत्तो वि णाम परकेरओ संवुत्तो । अविदा ! सय्याए मम दुक्खं विणोदेमि, जदि णिद्दं लभामि । [गता एषा । अहो अत्याहितम् । आर्यपुत्रोऽपि नाम परकीयः संवृत्तः । अविदा ! शय्यायां मम दुःखं विनोदयामि, यदि निद्रां लभे ।]

Vasav—Gone is she Oh a calamity ! Even my husband, now belongs to other. Ah ! I will remove my sorrow by lying down in my bed, if I get sleep.

(निष्क्रान्ता)

(Exit)

तृतीयोऽङ्कः ।

End of the third Act.

Notes—1. चिन्ताशून्यहृदया—चिन्तया शून्यम् इति (३या त. स.) चिन्ताशून्यं हृदयम् यस्याः सा (ब. व्री)।

2. नीहारप्रतिहतचन्द्रलेखा—नीहारेण प्रतिहता नीहारप्रतिहता (३या त. स.) चन्द्रस्य लेखा (ष. त.) नीहारप्रतिहता चन्द्रलेखा इति (कर्मधा)। नि+ह+घञ् । उपसर्गस्य घञि अमनुष्ये बहुलम्- इत्यनेन दीर्घत्वम् ।

3. अमण्डितभद्रकम्—अमण्डितम् च भद्रकम् च undecorated and yet beautiful. (विशेषणोभयपदकर्म सः)

4. कः कालः—Bhasa uses it several times. According to कालाध्वनोरत्यन्तसंयोगेऽग्या the form should be कं कालम् । We can say कः कालः यापितः, त्वदन्वेषणे what a long time has passed in searching you. It is Bhasa's own idiom.

5. महाकुलप्रसूता स्निग्धा निपुणा shows that she will weave the *garland readily, affectionately and skilfully*.

6. मा चिन्तयित्वा—मा चिन्तय the use of क्त्वा, in connection with negative अव्यय मा is against पाणिनि-grammar. The rule is अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" अलं दत्त्वा, Do not give, पीत्वा खलु Do not drink. We can't have on this analogy. मा पीत्वा, मा दत्त्वा Perhaps in Bhasa's time such use was prevalent though not sanctioned by Panini. As सिद्धान्तकौमुदी lays down अलंखल्वोः किम् ? why अलम् and खलु only ? मा कार्षीत्, In case of negative particle माङ् लुङ् is used and not क्त्वा as in मा कार्षीत् Do not do.

7. मणिभूमिः—a pavement studded with gems.

8. आम—older form ओम्, in Sans. आम्, in Vernaculars, हां O Yes.

9. दृष्टपूर्वः—पूर्वं दृष्टः इति दृष्टपूर्वः सुप्सुपा समास like भूतपूर्वः ।

10. शरचापहीनो कामदेवः—उदयन was very beautiful; beautiful like cupid himself. The only difference being that cupid has always bow and arrows in his hand while उदयन was without them.

11. In भण, भण, and त्वरतां त्वरताम्, duplication is due to सम्भ्रमेण प्रवृत्तौ यथेष्टम् अनेकधा प्रयोगो न्यायसिद्धः।

12. अविदा is not found in Sans. dictionary "आविद"—is found in प्राकृतसर्वस्व used as an interjection indicating sorrow. It may mean, Ah, Oh, Ooph, etc.

अथ चतुर्थोऽङ्कः

(ततः प्रविशति विदूषकः)

(Then enter the clown)

विदूषकः—(सहर्षम्) भो ! दिट्ठिआ तत्तहोदो वच्छराअस्स अभिप्पेदविवाहमङ्गलरमणिज्जो कालो दिट्ठो । भो को णाम एदं जाणादि—तादिसे वयं अणत्थ-सलिलावत्ते पक्खित्ता उण उम्मज्जिस्सामो त्ति । इदाणिं पासादेसु वसीअदि, अन्तेउर दिग्घिआसु ह्णाईअदि, पकिदिमउरसुउमाराणि मोदअ-खज्जआणि खज्जीअन्ति त्ति अणच्छर-संवासो उत्तर-कुरुवासो मए अणुभवीअदि । एक्को खु महन्तो दोसो, मम आहारो सुट्ठु ण परिणमदि । सुप्पच्छदणाए सय्याए णिद्दं ण लभामि, जह वादसोणिदं अभिदो विअ वत्तदि त्ति पेक्खामि। भो ! सुहं णामअपरिभूदं अकल्लवत्तं च ।
[भोः ! दिष्ट्या तत्रभवतो वत्सराजस्य अभिप्रेत-विवाह-मङ्गल-रमणीयः कालो दृष्टः । भोः ! को नाम एतत् जानाति—तादृशे वयम् अनर्थ सलिलावर्त्ते प्रक्षिप्ताः पुनः उन्मङ्क्ष्यामः इति । इदानीम् प्रासादेषु उष्यते, अन्तःपुरदीर्घिकासु स्नायते, प्रकृतिमधुर-सुकुमाराणि मोदकखाद्यानि खाद्यन्ते, इति अनप्सरस्संवासः उत्तर-कुरुवासः मया अनुभूयते । एकः खलु महान् दोषः मम आहारः सुष्ठु न परिणमति, सुप्रच्छदनायाम् शय्यायाम् निद्राम् न लभे, यथा वातशोणितम् अभितः इव वर्तते इति पश्यामि । भोः ! सुखम् नामयपरिभूतम् अकल्यवर्त्तम् च ।]

Vidusak—(Joyfully). Luckily have I witnessed the charming occasion of the auspicious celebration of

the desired marriage of the King of Vatsa., oh ! who ever knew that we thrown as we were in such a whirlpool of disasters, shall again emerge out from that ? Now I dwell in the royal-palace, bathe in the harem-ponds, eat dainty edibles naturally delicious and delicate. Thus I enjoy (live) here a life in paradise (lit. Uttara Kuru), save and except the company of the nymphs. There is, indeed, one great drawback ; my food does not digest well ; I donot get sleep in a well-furnished bed, so that I see gout is near at hand (about to attack me), oh that pleasure is no pleasure which is full of disease and devoid of food.

Notes :—1 अभिप्रेतविवाहमङ्गलरमणीयः—अभिप्रेतम् विवाहमङ्गलम् अभिप्रेतविवाहमंगलम्, (कर्म.) तेन रमणीयः (३या त. स.-), अभिप्रेत—desired by the ministers and himself for the recovery of the lost kingdom.

2. अनर्थ etc. सलिलस्य आवर्तः (ष. त. स.) अनर्थ एव सलिलावर्त्तः (मयूरव्यंसकादित्वात् रूपक समासः) The jester says we were caught by the whirlpool of calamity. We never expected to come out of that, but fortunately we have passed over the troubles and are living again as happily as before. Calamity refers to the recluse-life of the King on the death of his wife or to his misfortunes on the loss of his kingdom.

3. वासवदत्ताविवाहविधुरस्य राज्ञः समवेदनया अस्माकम् अपि आहारविहारादयः सर्वे नष्टाः, अधुना वयं पुनरपि राजसुखानि अनुभवामः इतिभावः।

4. उत्तरकुरुवासः—A residence in उत्तरकुरु; *i. e.* we enjoy all the pleasures available in उत्तरकुरु except the company of the nymphs. उत्तरकुरु It is to the north of Mèru and is a land of eternal beatitude and pleasures.

It is called देवभूमि where all kinds of pleasures abound and अप्सरा dwell. The Vidusaka feels the want of nymphs in the Magadhan palace. He has all pleasures minus beautiful Apsarasas. Some scholars hold that उत्तरकुरु is somewhere north of the Himalayan range *i. e.* in Kashmir.

5. अनप्सरस्संवासः—अप्सरसां संवासः, (ष. त.) अविद्यमानः अप्सरस्संवासः यस्मिन् स (ब. व्री.)

6. सुप्रच्छदनायाम्—शोभनानि प्रच्छदनानि प्रच्छदपटा (bed-sheets) यस्या सा (ब. व्री.)

7. वातशोणितम्—वातरक्तम्, वातेन संसक्तम् शोणितम् (मध्यमपदलोपी-स.) ; gout, rheumatism, a disease in which blood is vitiated due to the disturbance of वात one of the three humours of the Indian Pathology ! The jester apprehends an attack of gout in no time and so he is very anxious.

8. अभित means here nearby. Bhasa uses अभित in this sense in Act II अभित एव तेऽग्र etc.।

9. सुखं नामय etc.—This line properly construed stands आमयपरिभूतम् अकल्यवर्त्तम् च सुखम् न सुखं भवति The pleasure full of disease (आमय) but devoid of food (कल्यवर्त्त—breakfast) is no pleasure. I do not welcome this kind of pleasure which is sure to throw me on sick bed and compel me to go without food. The jester was all glad for the happy life he was living in the Magadhan harem, but the thought of approaching rheumatism makes him sad and melancholy. He cannot afford to go without such a delicious royal food.

(ततः प्रविशति चेटी)

(Then enter the maid)

चेटी—कहिं ग्रु खु गदो अय्यवसन्तओ । (परिक्रम्यावलोक्य) अम्भो एसो अय्य वसन्तओ । (उपगम्य) अय्य ! वसन्तअ ! को कालो, तुमं अण्णेसामि । [कुत्र नु खलु गतः आर्यवसन्तकः । (परिक्रम्यावलोक्य) अहो एष आर्यवसन्तकः । आर्य ! वसन्तक ! कः कालः, त्वाम् अन्विष्यामि ।]

Maid—Where is, indeed, noble Basantaka gone ? (walking and seeing). Holla, noble Basantaka sits there (Approaching). Noble Basantaka, how long have I been searching for you ?

विदूषकः—(दृष्ट्वा) किंणिमित्तं भद्दे । मं अण्णेससि ? [किं निमित्तं भद्रे ! माम् अन्विष्यसि ?]

Vidu—Wherefore, have you been looking for me noble lady.

चेटी—अह्माणं भट्टिणी भणादि—अवि ह्णादो जामादुओ त्ति [अस्माकं भट्टिनी भणति—अपि स्नातः जामाता इति ।]

Maid—Our mistress asks. Has the son-in-law bathed ?

विदूषकः—किं णिमित्तं भोदी पुच्छदि ? [किं निमित्तं भवती पृच्छति ?]

Vidu—Why does her ladyship ask ?

चेटी—किमण्णं । सुमणावण्णअं आणेमि त्ति । (किम् अन्यत् । सुमनोवर्णकम् आनयामि इति)

Maid—What else ? That I may bring flowers and paints.

विदूषकः—ह्णादो तत्तभवं । सव्वं आणेदु भोदी वज्जिअ भोअणं । [स्नातः तत्रभवान् । सर्व्वम् आनयतु भवती वर्जयित्वा भोजनम् ।]

Vidu—His Majesty has bathed. You may bring all excepting food.

चेटी—किंणिमित्तं वारेसि भोअणं ? [किंनिमित्तं वारयसि भोजनम् ?]

Maid—Why do you prevent food ?

विदूषकः—अधण्णस्स मम कोइलाणं अक्खिपरिवट्टो विअ कुक्खिपरिवट्टो संवुत्तो । [अधन्यस्य मम कोकिलानाम् अक्षि-परिवर्त्तः इव कुक्षिपरिवर्तः संवृत्तः ।]

Vidu—Unlucky as I am, my stomach is rolling like the rolling of the eyes of the cuckoos.

चेटी—ईदिसो एव्व होहि । [ईदृश एव भव ।]

Maid—Be just like that !

विदूषकः—गच्छदु भोदी । जाव अहं वि तत्तहोदो सआसं गच्छामि । [गच्छतु भवती । यावत् अहम् अपि तत्रभवतः सकाशं गच्छामि ।]

Vidu—Your ladyship may go. Meanwhile, I also shall go near His Majesty.

(निष्क्रान्तौ)

(Exeunt Both)

प्रवेशकः

Interlude.

Notes:—1. सुमनोवर्णकम्—सुमनस्सहितम् वर्णकम् इति (मध्य. कर्म.)

Paints or unguents with flowers, पुष्पचन्दनम् for king's worship or personal decoration.

2. अक्षिपरिवर्त्तः—अक्ष्णः परिवर्त्तः (ष. त.) rolling or revolving of eyes.

3. कुक्षेः परिवर्त्तः—कुक्षिपरिवर्त्तः उदरविकारः As the eyes of cuckoo are always rolling, upside down, similarly the stomach of the jester was rolling, say rumbling; there was some disorder therein. The maid says in

joke, "Be like that," so that you may not eat so voraciously and fall ill.

प्रवेशकः—See Act II ; infra.

(ततः प्रविशति सपरिवारा पद्मावती आवान्तिकावेषधारिणी वासवदत्ता च ।)

(Then enter Padmawati with her retinue and Vasavadatta in the dress of a woman of Avanti).

चेटी—किं णिमित्तं भट्टिदारिआ पमदवणं आअदा ? [किं निमित्तं भर्तृदारिका प्रमदवनम् आगता ?]

Maid—Why is the princess come to the pleasure garden ?

पद्मावती—हला ! ताणि दाव सेहालिआ गुह्मआणि पेक्खामि कुसुमिदाणि वा ण वेत्ति । [हला ! ते तावत् शेफालिका गुल्मकाः पश्यामि, कुसुमिता वा न वा इति]

Padma—My dear, so that I may see, if the Shephalika-bushes are blossoming or not.

चेटी—भट्टिदारिए ! ताणि कुसुमिदाणि णाम, पवालन्तरिदेहिं विअ मोत्तिआलम्बएहिं आइदाणि कुसुमे हिं । [भर्तृदारिके ! ते कुसिमिताः नाम, प्रवालान्तरितैः इव मौक्तिकलम्बकैः आचिताः कुसुमैः ।]

Maid—Princess, they have certainly flowered and are laden with flowers, as if with the pendants of pearls studded with corals.

पद्मावती—हला ! जदि एव्वं, किं दाणिं विलम्बेसि ?

[हला ! यदि एवम्, किम् इदानीम् विलम्बयसि ?]

Padma—My dear, if so, why do you delay now ?

चेटी—तेण हि इमस्सिं सिलावट्टए मुहुत्तअं उपविसदु भट्टिदारिआ जाव अहं वि कुसुमावचअं करेमि । [तेन हि अस्मिन् शिलापट्टके मुहूर्त्तम् उपविशतु भर्तृदारिका । यावत् अहम् अपि कुसुमावचयम् करोमि ।]

Maid—Then, may the princess sit for a while on this stone-slab. Meanwhile, I, too, will gather flowers.

पद्मावती—अय्ये ! किं एत्थ उपविसामो ? [आर्ये ! किम् अत्र उपविशावः ?]

Padma—Madam, shall we sit here ?

वासवदत्ता—एव्वं होदु । [एवं भवतु ।]

Vasav—Let it be so.

(उभे उपविशतः)
(Both sit down.)

-गुल्मकाः—Masculine, the whole sentence is, th of पश्यामि ।—पश्यामि—द्रक्ष्यामि वर्तमानसामीप्ये ल: is no hard and fast rule for differentiating m and neuter in prakrit (प्राकृते पुन्नपुंसकयोरनियमात्) ।

2. शेफालिका—सिंघारा, हरसिंगार, a kind of fragrant flowers.

3. प्रवालान्तरितैः—प्रवालैः विद्रुमैः (corals) अन्तरितैः खचितैः (studded) इति (३या त. स.)

4. मौक्तिकालम्बकैः—मौक्तिकानां लम्बकानि ललन्तिकाः तैः । लम्बकम् hanging, pendent, long necklace. (ललन्तिका) आचितः=आ+चि+क्त (कर्मणि) Covered with.

5. कुसुमावचयम्—कुसुमानाम् अवचयः; अवचय is wrong according to Panini. It should be अवचाय "हस्तादाने चेरस्तेये" इति अनेन घञ् प्राप्तः । 'अवतरावचाय शब्दयोः दीर्घस्यत्यासो बालानाम् इति वामनः, but Bhasa, Kalidasa and many others use अवचय । अवतार is a very popular word, though incorrect according to पाणिनि ।

चेटी—(तथा कृत्वा) पेक्खदु पेक्खदु भट्टिदारिआ अद्धमणासिलावट्टएहिं विअ सेहालिआकुसुमेहिं पूरिअं मे अञ्जलिं । [पश्यतु

पश्यतु भर्तृदारिका अर्द्धमनःशिलापट्टकैः इव शेफालिकाकुसुमैः पूरितम् मे अञ्जलिम्।]

Maid—(Doing so). Behold, O princess, behold my palm full of Shephalika flowers, as if half full of tablets of red arsenic.

पद्मावती—(दृष्ट्वा) अहो विइत्तदा कुसुमाणां। पेक्खदु पेक्खदु अय्या। [अहो विचित्रता कुसुमानाम्। पश्यतु पश्यतु आर्या।]

Padma—(Seeing) Oh! the varied colours of the flowers! Behold, noble lady, behold.

वासवदत्ता—अहो दस्सणीअदा कुसुमाणं। [अहो दर्शनीयता कुसुमानाम्।]

Vasav—Oh! how charming the flowers!

चेटी—भट्टिदारिए! किं भूयो अवइस्सं। [भर्तृदारिके! किं भूयः अवचेष्यामि?]

Maid—Princess, shall I again pluck flowers?

पद्मावती—हला! मा मा भूयो अवइणिअ। [हला मा भूयः अवचिनुय।]

Padma—My dear, donot pluck them again.

वासवदत्ता—हला! किंणिमित्तं वारेसि? [हला! किं निमित्तं वारयसि?]

Vasav—Dear friend, why do you prevent?

पद्मावती—अय्यउत्तो इह आअच्छिअ इमं कुसुमसमिद्धिं पेक्खिअ सम्माणिदा भवेअं। [आर्यपुत्रः इह आगत्य इमां कुसुमसमृद्धिं दृष्ट्वा सम्मानिता भवेयम्।]

Padma—My husband, coming here and beholdin the richness of flowers, I shall be much honoured.

वासवदत्ता—हला! पिओ ते भत्ता? [हला! प्रियः ते भर्ता?]

Vasav—Friend, do you love your husband?

पद्मावती—अय्ये! ण आणामि, अय्यउत्तेण विरहिदा उक्कण्ठिदा होमि। [आर्ये! न जानामि; आर्यपुत्रेण विरहिता उत्कण्ठिता भवामि।]

Padma—That I donot know madam, but I feel very anxious when separated from my lord.

वासवदत्ता—(आत्मगतम्) दुक्करं खु अहं करेमि, इअं वि णाम एव्वं मन्तेदि। [दुष्करं खलु अहं करोमि, इयम् अपि नाम एवं मन्त्रयते।]

Vasav—(To-herself) I do a hard thing, she also speaks so.

चेटी—अभिजादं खु भट्टिदारिआए मन्तिदं—पिओ मे भत्ता त्ति। [अभिजातं खलु भर्तृदारिकया मन्त्रितम्—प्रियो मे भर्ता इति।]

Maid—Wisely has it been said by the princess "I love my husband".

पद्मावती—एक्को खु मे सन्देहो। [एकः खलु मे सन्देहः।]

Padma—I have, of course, one doubt.

वासवदत्ता—किं किं? [किं किम्?]

Vasav—What, please, what?

पद्मावती—जह मम अय्यउत्तो, तह एव्व अय्याए वासवदत्ताए त्ति। [यथा मम आर्यपुत्रः, तथा एव आर्यायाः वासवदत्तायाः। इति]

Padma—Was my dear husband as dear to evered Vasavadatta as he is to me?

वासवदत्ता—अदो वि अहिअं। [अतः अपि अधिकम्।]

Vasav—More than this.

पद्मावती—कहं तुवं जाणासि? [कथं त्वं जानासि?]

Padma—How do you know?

वासवदत्ता—(आत्मगतम्) हं, अय्यउत्त पक्खवादेण अदि क्कन्दो समुदाआरो । एव्वं दाव भणिस्सं । (प्रकाशम्) जइ अप्पे सिणेहो, सा सजणं ण परिच्चजदि । [हम् आर्यपुत्रपक्षपातेनातिक्रान्तः समुदायारः एवं तावत् भणिष्यामि यद्यल्पः स्नेहः सा स्वजनं न परित्यजति]

Vasav—(To herself) Oh ! owing to my partiality for my husband, I have overstepped the limit of decorum. I will then say so. (Aloud) Had her love been little, she would not have forsaken her relatives.

पद्मावती—होदव्वं । [भवितव्यम्]

Padma—May be.

चेटी—भट्टिदारिए ! साहु भट्टारं भणाहि—अहं वि वीणं सिक्खिस्सामि त्ति । [भर्तृदारिके ! साधु भर्तारं भण अहम् अपि वीणाम् शिक्षिष्ये इति]

Maid—Princess, say to your husband cleverly "I too shall learn lyre-playing.

पद्मावती—उत्तो मए अय्यउत्तो । [उक्तः मया आर्यपुत्रः ।]

Padma—I have spoken to my lord.

वासवदत्ता—तदो किं भणिदं ? [ततः किं भणितम् ?]

Vasav—Then what did he say ?

पद्मावती—अभणिअ किञ्चि दिग्घं णिस्ससिअ तुह्णीओ संवुत्तो । [अभणित्वा किञ्चित् दीर्घं निःश्वस्य तूष्णीकः संवृत्तः ।]

Padma—Without saying anything, he heaved a long sigh and remained silent.

वासवदत्ता—तदो तुवं किं विअ तक्केसि ? [ततः त्वम् किम् इव तर्कयसि ?]

Vasav—Then what do you guess ?

पद्मावती—तक्केमि अय्याए वासवदत्ताए गुणाणि सुमरिदक्खिण्णदाए मम अग्गदो ण रोदिदि त्ति । [तर्कयामि आर्याय

वासवदत्तायाः गुणान् स्मृत्वा दक्षिणतया मम अग्रतः न रोदिति इति]

Padma—I guess that remembering the virtues of noble Vasavadatta, he does not weep before me out of courtesy.

वासवदत्ता—(आत्मगतम्) धञ्ञा खु म्हि, जदि एवं सच्चं भवे। [धन्या खलु अस्मि, यदि एवं सत्यं भवेत्।]

Vasav—(To herself). Blessed, indeed, am I, if it be true.

Notes—अर्द्धमनःशिलापट्टकैः—(i) अर्द्धम् एकदेशः मनःशिलापट्टः येषां, तैः ; part (अर्ध) of which resembles red arsenic। (मनःशिला) मनःशिला is a red arsenic, a mineral known कुनटी (मैनसिल in Hindi)।

(ii) अर्द्धे पुष्पदलाधोभागे मनःशिलायाः पट्टैः खण्डैः इव प्रतीयमानैः, शेफालिका कुसुमैः।

(iii) अर्द्धः मनःशिलापट्टकाः इव part (of which flowers) was (red) like the tablets of red arsenic. शेफालिका flowers have reddish stems, and white petals. So the maid says that her palm was full of शे flowers appearing partly like tablets of red arsenic. मनःशिलाखण्डवद्रक्तप्रथमार्द्धैः शेफालिकाकुसुमैः। मनः शब्दवाच्या शिला मनःशिला (मध्यमपदलोपी स.). If the word अर्द्ध be taken separately then it yields better sense ; see my palm full of Shephalika flowers as if half full of tablets of red arsenic. अर्द्ध then will have क्रियाविशेषणरूपता qualifying पूरितम्। गणपतिशास्त्री says that the reading "अद्धा" is wrong. The construction here is difficult.

2. मा मा भूयो श्रयचित्यः—It is a mistake ; "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" allows क्त्वा only in connection

अलम् and खलु used in negative sense and not with मा or माङ् see act III मा चिन्तियित्वा ।

3. अय्यउत्तो...भवेअः—This sentence is wrong. It should be अय्यउत्तेण...भवेअं (2) अय्यउत्तो...सम्माणिदो भवे। The first suggestion gives a good meaning "I shall feel much honoured when my dear husband will come and see the exuberance of these flowers." The second one means, "My dear husband, coming here and seeing the exuberance of these flowers, shall feel much honoured." The mistake is a scribe's mistake or archaic use of Bhasa.

4 उत्कण्ठितः—उत्कण्ठा+इतच् (जातार्थे)=उत्कण्ठा अस्याः संजाता इति, Mark well the modesty of Padma. Like a well-bred maiden of high family she answers. She does not openly say "I love my husband." Her maid praises her for this.

5. आर्यपुत्रपक्षपातेन—पक्षे पातः पक्षपातः (स. त.); आर्यपुत्रस्य पक्षपातः (ष. त.) तेन हेतौ ३या ।

6. अभणित्वा—"समासेऽनञ्पूर्वे क्त्वो ल्यप्" । क्त्वा changes to ल्यप् in a compound except अनञ् compound Here अनञ् comp. so no ल्यप् ।

7. दक्षिणतया—हेतौ ३या ; other reading is दाक्षिण्य तया—दक्षिणः एव इति दाक्षिण्यः (स्वार्थे ष्यञ्) courteous, like आलस्य (idle), दाक्षिण्यता is thus defended.

(ततः प्रविशति राजा विदूषकश्च)

(The enter the King and Vidusaka)

विदूषकः—ही ही । पचिअ-पडिअ-बन्धुजीव-कुसुमविरलवाद रमणिज्जं पमदवणं । इदो दाव भवं । [ही ही । प्रचितपतित

बन्धुजीव-कुसुम-विरलवात-रमणीयं प्रमदवनम् । इतः तावत् भवान् ।]

Vidu—Ho ho ! (Hi Hi !) The pleasure-garden is charming on account of the gentle breeze blowing herein and on account of the Bandhujiva flowers fallen in heaps (here and there.) Come hither, Your Honour.

Notes—प्रचित etc.—प्रचितानि संहतानि च तानि पतितानि च इति प्रचितपतितानि, (विशेषणोभयपदकर्मधा.) like खञ्जश्चासौ कुब्जः इति खञ्ज कुब्जः । विरलः अल्पः सौम्यः वातः इति विरलवातः (कर्मधा.); प्रचितपतितानि बन्धुजीवकुसुमानि, (कर्मधा.); प्रचितपतित बन्धुजीवकुसुमानि विरलवातः च (द्वन्द्व) प्रचितपतितबन्धुजीवकुसुमविरलवाताः, तैः रमणीयम् (३या तत्)

If वातं be translated by पात then the meaning is "charming on account of the sparse falls or scanty falling (विरलपात) of the B. flowers, fallen and collected together. It yields no happy sense.

The reading नवविवर्धित विरलसंपात is the best ; नवानि विवर्धितानि इत्यादि ।

राजा—वयस्य ! वसन्तक ! अयमहमागच्छामि ।

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः ।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ॥ १ ॥

King—Friend Basantaka, here am I coming. When I had gone to Ujjayini, and when I had fallen there into an unspeakable state on seeing at my sweet will, the daughter of the King of Avanti, then all the five arrows were shot at me by god Cupid ; my heart is still

wounded with those arrows. We have been again pierced, Cupid has only five arrows, how this sixth arrow is shot at me?

अन्वय—तदा उज्जयिनीम् गते, अवन्तिराजतनयाम् स्वैरम् दृष्ट्वा काम् अपि अवस्थाम् गते मयि कामेन पञ्च इषवः पातिताः ; तैः मम हृदयम् अद्य अपि सशल्यम् एव, वयम् भूयः च विद्धाः, यदा मदनः पञ्चेषुः तर्हि कथम् अयम् षष्ठःशरः पातितः ?

व्याख्या—तदा तस्मिन्काले यदा अहं प्रद्योतस्य सैनिकैः निगृहीतः सन् उज्जयिनीं नीतः, अवन्तिराजतनयाम् प्रद्योतपुत्रीं वासवदत्ताम्। स्वैरम् विस्रब्धम् स्वेच्छापूर्वकं दृष्ट्वा विलोक्य काम् अपि अनिर्वचनीयाम् अवस्थाम् दशाम् गते प्राप्ते मयि उदयने कामेन मदनदेवेन पञ्च इषवः बाणाः पातिताः निक्षिप्ताः। वासवदत्तां प्रति मम अनुरागः प्रगाढः आसीत् इति दर्शितम्-अद्यापि इदानीमपि। वासवदत्तामृत्यूपरान्तम् अपि तैः पञ्चभिः बाणैः मम हृदयम् सशल्यम् विक्षतम्, अद्यापि न हृदयात् उद्धृताः। वयम् भूयः पुनरपि च विद्धाः आहताः, यदा यदि मदनः कामदेवः पञ्चेषुः पञ्च शराः यस्य स पञ्चबाणः अस्ति तर्हि कथम् केन प्रकारेण कुतः लब्ध्वा अयं षष्ठःशरः तेन मयि पातितः निक्षिप्तः। अहो महदाश्चर्यम्! मदनः षष्ठं शरं कुतः प्राप्य मयि प्रहृतवान्। मदनहतोऽपि अहं पुनरपि आहतः।

Notes—1. कामेन अनुक्ते कर्तरि ३या of पातिताः।

2. स्वैरम्—अव्ययम्—of one's own accord, at one's own will, स्व+ईरम्, irregular सन्धि by "स्वादीरेरिणोः"।

3. सशल्यम्—शल्यैःसह वर्तमानम् इति (तुल्ययोगे ब. व्रो.)

4. विद्धः—√व्यध्+क्तः (कर्मणि); विध्यति, विव्याध, अव्यात्सीत्।

5. पञ्चेषु—पञ्च इषवः यस्य (ब. व्री.)।

विदूषकः—कदि ण खु गदा सतहोदी पदुमावदी, तदामयडपं गदा भवे, उदाहो असणकुसुमसञ्चिदं वण्वचम्मायगुविदं विअ

पच्चदतिलअं णाम सिजापट्टअं गदा भवे, आदु अधिक कडुअगन्धसत्तच्छदवणं पविट्ठा भवे, अहव आलिहिदमिअ पक्खिसङ्कुलं दारुपव्वाअं गदा भवे। (उर्ध्वमवलोक्य) ही ही सरअकाल णिम्मले अन्तरिक्खे पसादिअबलदेव बाहुदंसणीअं सारसपन्ति जाव समाहिदं गच्छन्तिं पेक्खदु दाव भवं। [कुत्र नु खलु गता तत्रभवती पद्मावती, लतामण्डपं गता भवेत्, उताहो असनकुसुमसञ्चितं व्याघ्रचर्मावगुण्ठितम् इव पर्वततिलकं नाम शिलापट्टकं गता भवेत्, अथवा अधिककटुकगन्धसप्तच्छदवनं प्रविष्टा भवेत, अथवा आलिखितमृगपक्षिसंकुलं दारुपर्वतकं गता भवेत्। ही! ही! सादित शरत्कालनिर्मले अन्तरिक्षे प्रसन्नबलदेव बाहुदर्शनीयां सारसपङ्क्तिम् यावत् समाहितं गच्छन्तीं पश्यतु तावत् भवान्।]

Vidu—Where might have gone her ladyship Padmawati? She might have gone to the creeper-bower, or she might have repaired to the Stone-slab called "Parvata-Tilaka" strewn with the Asana-flowers as if covered with Tiger's skin, or she might have entered into the Sapta Chhada-grove emitting a pungent smell, or she might have retired to the "Wooden Hill" full of the painted figures of beasts and birds (Looking upwards). Oh ho! May Your Honour just see the row of cranes; charming like the well-washed arm of Baladeva, passing securely through the clear autumnal Sky.

Notes:—1. असनकुसुमसञ्चितम्—असनवृक्षकाणां कुसुमानि, तैः सञ्चितम् व्याप्तम्—(तृया त. स.)।

2. व्याघ्रचर्मावगुण्ठितम्—व्याघ्रस्य चर्म; तेन अवगुण्ठितम् आच्छादितम्।

3. "पर्वततिलक"—*was the name given to a rock in the pleasure-garden.*

4. अधिककटुकगन्ध—अधिकम् कटुकः (सुप्सुपा स.);

अधिककटुकः गन्धः येषां (ब. व्री.) अधिककटुकगन्धाः सप्तच्छदाः (कर्म); तेषां वनम्।

5. दारुपर्वतकम्—दारुनिर्मितः पर्वतकः पर्वताकृतिः (मध्यमपद.)

6. आलिखित etc.—मृगाश्च पक्षिणश्च मृगपक्षिणः (द्वन्द्व स.), आलिखिताः मृगपक्षिणः इति (कर्म.)।

आलिखितमृगपक्षिभिः संकुलम् (३या तत्.)।

7. प्रसादित etc.—बलदेवस्य बाहुः (ष. त.); प्रसादितः बलदेवबाहुः; स इव दर्शनीया, (उपमान कर्म.); ताम् प्र+सद्+णिच्+क्त (कर्मणि)।

8. समाहितम्—समाहितं यथा भवति तथा "क्रियाविशेषणे २या"। "securely—safely, undisturbed."

राजा—वयस्य पश्याम्येनाम्

ऋज्वायतां च विरलां च नतोन्नतां च
सप्तर्षिवंशकुटिलां च निवर्त्तनेषु।
निर्मुच्यमानभुजगोदरनिर्मलस्य
सीमामिवाम्बरतलस्य विभज्यमानाम् ॥ २ ॥

P. O.—*ऋज्वायतां च विरलां च नतोन्नतां च निवर्तनेषु सप्तर्षिवंशकुटिलां च निर्मुच्यमानभुजगोदरनिर्मलस्य अम्बरतलस्य विभज्यमानाम् सीमाम् इव एनाम्* (सारसपङ्क्तिम्) पश्यामि।

King—Friend, I behold this line of the cranes straight and long, thin, bent and raised (high & low) curved like the constellation Great Bear in its turnings, and appearing like a boundary-line detached, of the sky, clear like the belly of a serpent, casting off its slough.

व्याख्या—एनाम् सारसपङ्क्तिम् पश्यामि, कीदृशीं सारसपङ्क्तिम् ऋज्वायताम् अजिह्मां दीर्घाम् च, विरलाम् असङ्घनाम्,

नतोन्नताम् दन्तुराम् नीचोच्चाम्, निवर्तनेषु परावर्तनेषु दिगन्तरात् दिगन्तरं प्रति चलनेषु, सप्तर्षिवंशम् इव कुटिलाम् वक्राम्, सप्त ऋषयः इति "दिक्संख्ये संज्ञायाम्" । तारामण्डलविशेषस्य नामधेयम्, निर्मुच्यमानम् निर्मोकात् निष्पतत्, भुजगोदरम् सर्पोदरम् तत् इव निर्मलम् (उपमान कर्म.), तस्य अम्बरतलस्य आकाशमण्डलस्य, विभज्यमानाम् विविच्यमानाम् पृथक् क्रियमाणाम् सीमाम् मर्यादारेखाम्, इव स्थिताम् एनाम् सारसपङ्क्तिम् पश्यामि ।

Notes—ऋज्वायताम्—ऋजुः च आयता च, ताम् (विशेषणोभयपद कर्म.)

२. नतोन्नताम्—नता च उन्नता च ताम् ।

The line was somewhere straight and somewhere long, somewhere sparse and somewhere low and somewhere high. It looked curved like the Great Bear whenever it took its turn. It appeared as if the boundary-line of the sky was being detached out, so the entire surface of the sky seemed, without this dividing line, to be vast expanse of etherial hemisphere.

सप्तर्षिवंश etc.—

3. सप्तऋषयः इति सप्तर्षयः (दिक्संख्ये संज्ञायाम्), सप्तर्षीणाम् वंशः, स इव कुटिला ताम् (उपमान कर्म)।

4. निर्मुच्यमानभुजग etc.—भुजगस्य उदरम् (ष. त.), निर्मुच्यमानम् भुजगोदरम् (कर्म.) तत् इव निर्मलम् (उपमान कर्म) ।

चेटी—पेक्खदु पेक्खदु भट्टिदारिआ । एदं कोकणदमालापण्डरमणीअं सारसपन्तिं जाव समाहिदं गच्छन्ति । अम्मो भट्टा । [पश्यतु पश्यतु भर्तृदारिका । एतां कोकनदमालापाण्डुररमणीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीम् । अम्मो भर्ता ।।

Maid—See O Princess, see this row of cranes flying securely, charming and white like the garland of lotuses Oma, my lord.

पद्मावती—हं अय्यउत्तो। अय्ये! तव कारणादो अय्यउत्तदंसणं परिहरामि। ता इमं दाव माहवीलदामण्डवं पविशामो। [हम् आर्यपुत्रः। आर्ये! तव कारणादार्यपुत्रदर्शनं परिहरामि। तदिमं तावन्माधवीलतामंडपं प्रविशामः।]

Padma—O yes, my lord! Noble lady, for your sake I do avoid the sight of my husband. So we shall just enter into the bower of the Madhavi-creeper.

वासवदत्ता—एव्वं होदु। [एवं भवतु।]

Vasav—Let it be so.

(तथा कुर्वन्ति।)

(They do so)

विदूषकः—तत्तहोदी पदुमावदी इह आअच्छिअ णिग्गदा भवे। [तत्रभवती पद्मावती इहागत्य निर्गता भवेत्।]

Vidusaka—Her ladyship Padmawati might have come here and then gone out.

राजा—कथं भवान् जानाति?

King—How do you know?

विदूषक—इमाणि अवइदकुसुमाणि सेफालिआगुच्छआणि पेक्खदु दाव भवं। [इमान् अवचितकुसुमान् शेफालिकागुच्छकान् पश्यतु तावत् भवान्।]

Vidusaka—May Your Honour see these Sephalika-clusters from which flowers have been plucked off.

राजा—अहो विचित्रता कुसुमस्य वसन्तक।

King—Oh the variegatedness of the flowers! Basantaka.

वासवदत्ता—(आत्मगतम्) वसन्तअसङ्कित्तणेण अहं पुण जाणामि उज्जइणीए वत्तामि त्ति। [वसन्तकसङ्कीर्तनेन अहं पुनः जानामि उज्जयिन्यां वर्ते इति।]

Vasav—(To herself) By the mention of Basantaka, I feel as if I am at Ujjayini.

राजा—वसन्तक ! अस्मिन् एव आसीनौ शिलातले पद्मावतीं प्रतीक्षिष्यावहे ।

King—Basantaka, we shall wait for Padmawati seated here on this very stone.

विदूषकः—भो ! तह । (उपविश्योत्थाय) ही ही सरअ-कालतिक्खो दुस्सहो आदवो । ता इमं दाव माहवीमण्डवं पविसामो । [भोस्तथा । ही ही शरत्कालतीक्ष्णो दुःसह आतपः । तदिमं तावन्माधवीमण्डपं प्रविशावः] ।

Vidusaka—Yes, let us do so (sitting down and getting up) Oh Oh, unbearable is the sun scorching in the autumn, so let us just enter the Madhavi-bower.

राजा—बाढम् । गच्छाग्रतः ।

King—All right, go ahead.

विदूषकः—एव्वं होदु । [एवं भवतु ।]

Vidu—Let it be so.

(उभौ परिक्रामतः)

(Both walk forward)

पद्मावती—सव्वं आउलं कत्तुकामो अय्य वसन्तओ । किं दाणिं करेइ ? [सर्वम् आकुलं कर्तुकामः आर्यवसन्तकः । किम् इदानीम् कुर्मः ?]

Padma—Noble Basantaka wants to upset all (the arrangement), what shall we do now ?

चेटी—भट्टिदारिए ! इदं महुअरपरिणिलीणं ओलम्बलदं ओधूय भट्टारं वारइस्सं । [भर्तृदारिके ! एतां मधुकरपरिनिलीनाम् अवलम्बलताम् अवधूय भर्त्तारम् वारयिष्यामि ।]

Maid—Princess, I shall prevent the lord (from

entering) by shaking the propping (main) creeper on which bees are seated.

पद्मावती—एव्वं करेहि । [एवं कुरु ।]

Padma—Do so.

(चेटी तथा करोति)

(The maid does so)

विदूषकः—अविहा, अविहा, चिट्ठदु चिट्ठदु, दाव भवं । [अविहा । अविहा । तिष्ठतु तिष्ठतु तावद्भवान् ।]

Vidusaka—Oh ! Oh ! Oh !, halt, Your Honour.

राजा—किमर्थम् ?

King—Why ?

विदूषकः—दासीएपुत्तेहि महुअरेहिं पीडिओम्हि । [दास्याःपुत्रैर्मधुकरैः पीडितोऽस्मि ।]

Vidusaka—I am troubled by these bees, the sons of maid-servants.

राजा—मा मा भवानेवम् । मधुकरसंत्रासः परिहार्यः । पश्य,

मधुमदकला मधुकरा मदनार्त्ताभिः प्रियाभिरुपगूढाः ।

पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः ॥ ३ ॥

तस्मादिहैवासिष्यावहे ।

King—Do not, please donot do so. Avoid frightening the bees, see,

The bees, humming sweetly through their intoxication of honey and being embraced by their passion-smitten beloveds, shall be separated, like myself, from their sweet-hearts, being frightened (by the sound of) our foot-steps.

We shall, therefore, sit here.

P.O.—मधुमदकलाः मदनार्त्ताभिः प्रियाभिः उपगूढाः मधुकराः पादन्यासविषण्णाः सन्तः वयम् इव कान्तावियुक्ताःस्युः ।

व्याख्या—मधुमदकलाः मधुमदेन कलाः मधुरं गुञ्जन्तः मदनार्ताभिः कामपीडिताभिः प्रियतमाभिः उपगूढा आलिङ्गिताः मधुकराः भ्रमराः पादन्यासेन चरणन्यासध्वनिना विपन्नाः खिन्नाः भायिताः सन्तः वयम् इव अहम् राजा उदयनः इव कान्ताभिः प्रियाभिः वियुक्ताः विरहिताःस्युः भवेयुः। प्रियाविरहदग्धः अहम् न तान् कान्तावियोगपीडितान् कर्तुम् इच्छामि।

व्याकरणम्—मदनेन आर्ताः मदनार्ताः (३या त.) ऋते च तृतीया समासे। वि+सद्+क्त=विपन्नाः।

Notes--1. कोकनदमालापाण्डुररमणीयाम्—कोकनदानां माला। पाण्डुरा च रमणीया च पाण्डुररमणीया (विशेषणोभयपद कर्म.). कोकनदमाला इव पाण्डुररमणीया—(उपमान कर्म.)।

2. समाहितम्—क्रियाविशेषणे २या।

3. आर्ये तवकारणात्—She herself was anxious to see her husband. See..." सम्मानिता भवेयम् " But Vasavadatta observes a vow of not seeing the face of any other male being except her own husband's. Padma does not go to her lord along with Vasavadatta lest it may offend her feeling.

4. वसन्तसंकीर्तनेन etc.—यौगन्धरायण had gone to Ujjayini along with वसन्तक to effect the release of King Udayana. Vasavadatta remembers here how she had come across वसन्तक for the first time at Ujjayini. She remembers those sweet days of her life.

5. आसीन=आस्+शानच् 'ईदासः'।

6. शरत्काल etc.—The Sun shines very hot in the autumn season.

7. कर्तुकामः—कर्तुम् कामः यस्य स (ब. व्री.), म् of तुमुन् is dropped by तुम् काममनसोरपि—which means that म of

तुम् is dropped in a घ. द्वो. compound when it is followed by काम or मनस् ।

8 मधुकरपरिनिलीनाम्—परिनिलीनाः मधुकराः यस्याम् सा परिनिलीनमधुकरा or मधुकरपरिनिलीना by वा आहिताग्न्यादिषु or we may say मधुकरैः परिनिलीना व्याप्ता इति (३या त. स.) ।

9. अवलम्बलताः—अवलम्बभूता लता । (मध्य. कर्म.) The Main creeper which supports all other creepers. It is a sort of prop to other creepers.

10. 'अविहा' ? is transliterated, by Shastri as "अविह", 'अविह' इति खेदे । It denotes 'distress'.

11. दास्याःपुत्रैः—अलुक् समास; optional form is दासीपुत्रैः । "षष्ठ्याः आक्रोशे" "पुत्रेऽन्यतरस्याम्" these rules apply. When there is the sense of abuse or contempt then षष्ठी is not dropped but when followed by पुत्र it is optionally dropped. दास्याःपुत्र is a contemptuous term meaning "Slave-born". Something like 'bastard '.

विदूषकः—एव्वं होदु । [एवं भवतु ।]
Vidu—Let it be so.

(उभौ उपविशतः)

(*Both sit-down*)

राजा—(अवलोक्य)

पादाक्रान्तानि पुष्पाणि सोष्म चेदं शिलातलम्

नूनं काचिदिहासीना मां दृष्ट्वा सहसा गता ॥ ४ ॥

King—(Seeing)

The flowers are trampled down under feet, and this stone slab is warm; surely then some lady was sitting here ; seeing me she has suddenly gone away.

चेटी—भट्टिदारिए ! रुद्धा खु म्ह वयं । [भर्तृदारिके ! रुद्धाः खलु स्मः वयम्]

Maid—Princess, we have been, indeed, blocked up.

पद्मावती—दिट्ठिआ उवविट्ठो अय्यउत्तो । [दिष्ट्या उपविष्टः आर्यपुत्रः ।]

Padma—Fortunately my dear husband has sat down.

वासवदत्ता—(आत्मगतम्) दिट्ठिआ पकिदित्थसरीरो अय्यउत्तो । [दिष्ट्या प्रकृतिस्थशरीरः आर्यपुत्रः ।]

Vasav—(To herself) Luckily my lord is in sound health.

चेटी—भट्टिदारिए ! सस्सुपादा खु अय्याए दिट्ठी । [भर्तृदारिके ! साश्रुपाता खलु आर्यायाः दृष्टिः ।]

Maid—Princess, the eyes of this noble lady are full of tears.

वासवदत्ता—एसा खु महुअराणं अविणआदो कासकुसुमरेणुणा पडिदेण सोदआ मे दिट्ठी । [एषा खलु मधुकराणाम् अविनयात् काशकुसुमरेणुना पतितेन सोदका मे दृष्टिः ।]

Vasav—These my eyes are full of teats, on account of the pollen of Kasa-flower fallen into them through the rudeness (lit. immodesty) of the bees.

पद्मावती—जुज्जइ । [युज्यते]

Padma—That is proper.

विदूषकः—भो ! सुण्णं खु इदं पमदवणं । पुच्छिदव्वं किञ्चि अत्थि । पुच्छामि भवन्तं । [भोः ! शून्यं खलु इदं प्रमदवनम् । प्रष्टव्यं किञ्चित् अस्ति । पृच्छामि भवन्तम् ?]

Vidusaka—Vacant is this pleasure-grove. I have something to ask. Shall I ask you ?

राजा—छन्दतः ।

King—Freely.

विदूषकः—का भवदो पिआ, तदाणिं तत्तहोदी वासवदत्ता इदाणिं पदुमावदी वा ? [का भवतः प्रिया, तदानीं वासवदत्ता इदानीं पद्मावती वा ?]

Vidusaka—Which is dearer to you, the revered lady Vasavadatta then or Padmavati now ?

राजा—किमिदानीं भवान् महति बहुमानसङ्कटे मां न्यस्यति ?

King—Why do you throw me now into a great dilemma of declaring my love ?

पद्मावती—हला ! आदिसे सङ्कडे णिक्खित्तो अय्यउत्तो । [हला ! यादृशे सङ्कटे निक्षिप्तः आर्यपुत्रः ।]

Padma—Dear friend, my lord is thrown in such a fix.

वासवदत्ता—(आत्मगतम्) अहं च मन्दभाआ । [अहं च मन्दभाग्या]

Vasav—(To herself) I, too, an unlucky self.

विदूषकः—सेरं सेरं भणादु भवं । एका उवरदा, अवरा असण्णिहिदा । [स्वैरं स्वैरं भणतु भवान् एका उपरता, अपरा असन्निहिता ।]

Vidusaka—Speak freely, freely you may speak. One is dead, and the other is not near at hand ?

राजा—वयस्य ! न खलु न खलु ब्रूयाम् । भवांस्तु मुखरः ।

King—Friend I must not speak, O must not, for you are a babbler.

पद्मावती—एत्तएण भणिदं अय्यउत्तेण । [एतावता भणितम् आर्यपुत्रेण ।]

Padma—By this much, my husband has spoken out.

विदूषकः—भो ! सच्चेण सवामि, कस्स वि ण आचक्खिस्सं एसा सन्दट्ठा मे जीहा । [भोः ! सत्येन शपामि, कस्मै अपि न आख्यास्ये । एषा सन्दष्टा मे जिह्वा ।]

Vidusaka—Hallo, I swear by my truth, I will not tell any one, here do I bite my tongue.

राजा—नोत्सहे सखे ! वक्तुम् ।

King—I dare not say, my friend !

पद्मावती—अहो इमस्स पुरोभाइदा । एत्तिएण हिअअं ण जाणादि । [अहो अस्य पुरोभागिता । एतावता हृदयं न जानाति ।]

Padma—Oh ! his obtrusiveness ! He does not understand his heart from this much.

विदूषकः—किं ण भणादि मम । अणाचक्खिअ इमादो सिलापट्टआदो ण सक्कं एक्कपदं वि गमिदुं । एसो रुद्धो अत्तभवं । [किं न भणति मम । अनाख्याय अस्मात् शिलापट्टकात् न शक्यम् एकपदम् अपि गन्तुम् । एष रुद्धः अत्रभवान् ।]

Vidusaka—What ? Your Honour does not speak to me. You can't move a single step from this stone-slab without saying. Here is Your Honour blocked up.

राजा—किं बलात्कारेण ?

King—What ! perforce ?

विदूषकः—आम, बलक्कारेण । [आम्, बलात्कारेण ।]

Vidusaka—O yes, perforce.

राजा—तेन हि पश्यामस्तावत् ।

King—Then let me just see.

विदूषकः—पसीददु, पसीददु भवं । वअस्सभावेण साविदो सि, जदि सच्चं ण भणासि । [प्रसीदतु प्रसीदतु भवान् । वयस्यभावेन शापितः असि, यदि सत्यं न भणासि ।]

Vidusaka—Be pleased, Your Honour, be pleased.

10. संदष्टा मे जिह्वा—This a primitive form of taking oath, I bite my tongue *i. e.* I put a check on my glibing tongue, it won't speak out. Our children do the same even these days.

11. सत्येन शपामि—करणे ३या; the thing by which one swears takes करणे ३या, जीवितेन शपामि, ईश्वरेण शपामि etc.

12. पुरोभागिता—पुरोभागिन् obtrusive ; Kalidasa uses पुरोभागी—in Shakuntala in the sense of wanton किं पुरोभागे स्वातन्त्र्यमवलम्बसे ।

वासवदत्ता—(आत्मगतम्) भोदु भोदु । दिण्णं वेदणं इमस्स परिखेदस्स । अहो अञ्ञादवासं पि एत्थ बहुगुणं सम्पज्जइ । [भवतु भवतु । दत्तं वेतनम् अस्य परिखेदस्य । अहो अज्ञातवासः अपि अत्र बहुगुणः संपद्यते ।]

Vasava—(To herself) Well, well, this trouble has been well paid. (He has paid me well for this trouble), Oh, my incognito stay in this place has borne many fruits (lit. has many virtues).

चेटी—भट्टिदारिए ! अदक्खिण्णो खु भट्टा । [भर्तृदारिके ! अदाक्षिण्यः खलु भर्ता ।]

Maid—Princess, the master is discourteous.

पद्मावती—हला ! मा मा एवं । सदक्खिण्णो एव्व अय्यउत्तो, जो इदाणिं वि अय्याए वासवदत्ताए गुणाणि सुमरदि ।

[हला ! मा मा एवम् । सदाक्षिण्यः एव आर्यपुत्रः, यः इदानीम् अपि आर्यायाः वासवदत्तायाः गुणान् स्मरति ।]

Padma—Not so, my friend. My lord is very courteous, for he remembers even now (even after her death) the virtues of revered Vasavadatta.

वासवदत्ता—भद्दे ! अभिजणस्स सदिसं मन्तिदं । [भद्रे ! अभिजनस्य सदृशम् मंत्रितम् ।]

Vasavadatta—Good lady, you have spoken, worthy of your high lineage.

राजा—उक्तं मया। भवानिदानीं कथयतु । का भवतः प्रिया तदा वासवदत्ता, इदानीं पद्मावती वा।

King—I have said. You should say now, who is dearer to you, the then Vasavadatta or the present Padmavati.

पद्मावती—अय्यउत्तो वि वसन्तओ संवुत्तो । [आर्यपुत्रः अपि वसन्तकः संवृत्तः ।]

Padma—My lord also has become Basantaka.

विदूषकः—किं मे विप्पलविदेण । उभओ वि तत्तहोदीओ मे बहुमदाओ। [किं मे विप्रलपितेन । उभे अपि तत्रभवत्यौ मे बहुमते ।]

Vidusaka—What is the use of my prattling ? Both of their ladyships are highly esteemed by me.

राजा—वैधेय ! मामेवं बलाच्छ्रुत्वा किमिदानीं नाभिभाषसे ?

King—Fool, why do you not say now after hearing from me thus perforce ?

विदूषकः—किं मं वि बलक्कारेण ? [किं मामपि बलात्कारेण ?]

Vidusaka—What ? Me too perforce, or will you hear me too, by force.

राजा—अथ किम् ।

King—O, yes.

विदूषकः—तेण हि ण सक्कं सोदुं । [तेन हि न शक्यं श्रोतुम् ।]

Vidusaka—Then you can't hear.

राजा—प्रसीदतु प्रसीदतु महाब्राह्मणः । स्वैरं स्वैरमभिधीयताम् ।

King—Be pleased, be pleased, great Brahman; freely, freely, speak out.

विदूषकः—इदाणिं सुणादु भवं । तत्तहोदी वासवदत्ता मे बहुमदा । तत्तहोदी पदुमावती तरुणी दस्सणीआ अकोवणा अणहङ्कारा महुरवाआ सदक्खिणा । अअं च अवरो महन्तो गुणो, सिणिद्धेण भोअणेण मं पच्चुग्गच्छइ—कहिं णु खु गदो अय्यवसन्तओ त्ति ।

[इदानीं शृणोतु भवान् तत्रभवती वासवदत्ता मे बहुमता । तत्रभवती पद्मावती तरुणी दर्शनीया अकोपना अनहङ्कारा मधुरवाक् सदाक्षिण्या । अयं चापरो महान् गुणः, स्निग्धेन भोजनेन माम् प्रत्युद्गच्छति—कुत्र नु खलु गत आर्यवसन्तक इति ।]

Vidusaka—Now Your Honour may hear. Her ladyship Vasavadatta was very much liked by me. Her ladyship Padmavati is young, charming, not irritable, not vain, sweet-tongued, and courteous; and this is another great quality of hers, she welcomes me with delicious food, saying. Where can have the noble Basantaka gone?

वासवदत्ता—भोदु, भोदु, वसन्तअ ! सुमरेहि दाणिं एदं ।
[भवतु, भवतु, वसन्तक ! स्मर इदानीम् एतत् ।]

Vasav—Well, well Basantaka; bear this in mind now.

राजा—भवतु भवतु वसन्तक ! सर्वमेतत् कथयिष्ये देव्यै वासवदत्तायै ।

King—Very well, very well Basantaka, I will say all this to queen Vasavadatta.

विदूषकः—अविहा वासवदत्ता । कहिं वासवदत्ता । चिरा खु उवरदा वासवदत्ता । [अविहा ! वासवदत्ता । कुत्र वासवदत्ता । चिरा खलु उपरता वासवदत्ता !]

Vidusaka—Alas! for Vasavadatta. Where is Vasavadatta? Vasavadatta died long ago.

राजा—(सविषादम्) एवम् । उपरता वासवदत्ता ।

अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया ।
ततो वाणी तथैवेयं पूर्वाभ्यासेन निस्सृता ॥ ६ ॥

King—(With grief), so it is. Dead is Vasavadatta. By this joke, my mind has been agitated by you. So this speech, due to my previous habit, has flown out in the similar way.

अन्वयः—त्वया अनेन परिहासेन मे मनः व्याक्षिप्तम्, ततः इयम् वाणी पूर्वाभ्यासेन तथा एव निस्सृता ।

व्याख्या—अनेन परिहासेन—नर्मभाषितेन प्रीतिप्रश्ननर्मणा, मे मनः चेतः, त्वया व्याक्षिप्तम् वासवदत्तापरं वासवदत्तासक्तं कृतम्, ततः मनसः आकुलत्वात् हेतोः इयं वाणी "सर्वमेतत् कथयिष्ये देव्यै वासवदत्तायै" इति ईदृशी वाक्, पूर्वाभ्यासेन यथाभ्यस्तम्, हैतो रेया, तथैव, यथा वासवदत्तायां जीवत्यां सत्याम् तथा, निस्सृता मम मुखात् बहिरागता । न तु बुद्धिपूर्वकम् इयं वाणी निस्सृता किन्तु अभ्यासपूर्वकम् अज्ञानतः एव मुखात् बहिरागता ।

पद्मावती—रमणीओ खु कहाजोओ णिसंसेण विसंवादिओ ।
[रमणीयः खलु कथायोगः नृशंसेन विसंवादितः ।]

Padma—A charming discourse has been, indeed, marred by this cruel fellow.

वासवदत्ता—भोदु भोदु । विस्सत्थम्हि । अहो पिअं णाम, ईदिसं वअणं अप्पच्चक्खं सुणीअदि । [भवतु भवतु । विश्वस्तास्मि । अहो प्रियं नाम, ईदृशम् वचनम् अप्रत्यक्षं श्रूयते ।]

Vasav—Well, well, I am fully assured, Oh ! how pleasant it is to hear such words behind one's back !

Notes—दत्तं वेतनं—Full compensation has been given for my taking the trouble of living separated from him for his welfare. I have taken so much trouble for him

and he has paid me well for that by remembering me even in my absence.

2. बहुगुण:—बहवः गुणाः यस्य which has many advantages or virtues. (*i*) Her incognito life has facilitated Padma's marriage with King. (*ii*) Vasava had the opportunity of knowing how noble-hearted her co-wife Padma was. (*iii*) She could hear the talk about her husband. (*iv*) She heard, with her own ears actually from the lips of her husband how passionately she was still loved by him though known to be dead.

3. सदाक्षिण्य etc.—This is a further instance of Padma's nobility of mind and her being free from jealousy which is a common feeling among co-wives. She rather admires the King for remembering his dead wife.

4. अभिजनस्य etc.—Vasava could not but praise such magnanimity of Padma's heart. Born in an illustrious family, you have a liberal mind and so you speak so magnanimously.

5. महाब्राह्मण:—महत् is used before some words to denote contempt, sarcasm and etc. महाब्राह्मण (lit. great Brahman) has come to mean a "contemptible Brahman" a Mahapatra, who officiates in death Ceremany. Similarly महानिद्रा=death, महारात्रि=महाप्रलय।

6. प्रत्युद्गच्छति—Greets me saying etc. In some editions, the word 'वासवदत्ता' is added after प्रत्युद्गच्छति which spoils the sense as given out by the context. The Vidusaka is praising Padma, the King has praised Vasava;

so the विदूषक must praise Vasava's rival Padma and he elicits the remark of Vasava "Very well Basantaka remember this word well. (स्मर इदानीम्). You shall have to pay dearly for this action of yours. You do not find virtue in me."

7. देव्यै—क्रियाग्रहणा मपि कर्त्तव्यम् इत्यनेन थर्थी ।

8. व्याक्षिप्तम्—Tossed, agitated ; My heart was so much agitated that I forgot all about the death of Vasava, and thought that I was living in the company of my beloved Vasava.

9. पूर्वाभ्यासेन—Owing to my previous wont, as I used to speak out during Vasava's lifetime.

10. कथायोग :—The course of narration, discourse. The King in his happy mood, would have spoken some thing more in praise of Vasava ; but this heartless fellow has spoiled the charming narrative.

11. अप्रत्यक्षम्—In absence, behind one's back. So this profession of his love for me is all sincere and true.

विदूषकः—धारेदु धारेदु भवं। अणदिक्कमणीओ हि विही। इदिसं दाणि एदं। [धारयतु धारयतु भवान् । अनतिक्रमणीयो हि विधिः । ईदृशम् इदानीम् एतत् ।]

Viduṣaka—Take heart, take heart, Your Honour For, intransgressible is Providence. It is so now.

राजा—वयस्य ! न जानाति भवानवस्थाम् । कुतः

दुःखं त्यक्तुं बद्धमूलोऽनुरागः
　　　　स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् ।
यात्रा त्वेषा, यद् विमुच्येह वाष्पं
　　　　प्राप्तानृण्या याति बुद्धिः प्रसादम् ॥ ७ ॥

these cases the nominative of स्नात्वा and स्थितस्य is नरः, similarly the nominative of कृत्वा and स्थितस्य is नरः This explains "स्त्रोतस्तन्प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्चतस्याः।" Shakuntala II, 9, and रथं न यानं दृष्ट्वा पुनर्जन्म न विद्यते। So we should construe the sentence "स्मृत्वा स्मृत्वा स्थितस्य मम दुःखं नवतां याति" Now the nominative of स्मृत्वा स्मृत्वा and स्थितस्य is अहम् indicated by मम. This ingenuous interpretation saves the situation and "समानकर्तृकयोः पूर्वकाले क्त्वा" is fully obeyed. Malli in his सञ्जीवनी on Raghu IV-2, says उपचारात् न एककर्तृत्वविरोधः, राजकर्तृकस्य निशमनस्य अप्रौ उपचारात् न एककर्तृत्वविरोधः इति मल्लिनाथः। राघवाचार्य in his com. on शाकुन्तलम् Act II, 9, धातुर्विभुत्वं etc., says that the nomi. of अनुचिन्त्य is अहम् included in "मे". "शिरोमणिपादाः has finally set at rest this controversy by enjoining." Supply here स्थितस्य and the construction is correct."

3. यात्रा—The way of life, go of the world.

4. विमुच्येत—This reading also is seen; it is more correct "this is the go of the world that tears should be shed."

5. प्रासानृणता—प्राप्तम् आनृण्यम् यया सा (ब० व्री०) न ऋणम् अनृणम् (नञ् तत्) तस्य भावः आनृण्यम् redemption from debt; प्रासानृणता, gets redeemed. Men are said to owe a debt of gratitude to their departed relatives. When they shed tears, that debt is paid off and then their mind, redeemed from the debt it owes to the departed souls, attains serenity and becomes composed. Says Bhava

Bhuti in Uttararamacharitam. सांप्रतिकमेवैतत् कर्त्तव्यानि दुःखितैर्दुःखनिर्वपणानि—

" पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते । "

As for the debt, compare the lines of " Loss of Royal George "

" Weigh the vessel up,
Once dreaded by our foe
And mingle with our cups
The tears that England owes ".

विदूषकः—अस्सुपादकिलिण्णं क्खु तत्तहोदो मुहं । जाव मुहोदअं आणेमि । (निष्क्रान्तः) [अश्रुपातक्लिन्नं खलु तत्रभवतो मुखम् । यावन्मुखोदकम् आनयामि ।]

Vidusaka—His Majesty's face is wet with the fall of tears. I will just bring water for washing his face. (Exit).

पद्मावती—अय्ये ! बप्फाउलपडन्तरिदं अय्यउत्तस्स मुहं । जाव णिक्कमम्ह । [आर्ये ! बाष्पाकुलपटान्तरितम् आर्यपुत्रस्य मुखम् । यावत् निष्क्रामामः ।]

Padma—Noble lady, the face of my lord is bedimmed with tears and covered with cloth In the meantime, we shall *get out, or escape.*

वासवदत्ता—एवं होदु । अहव चिट्ठ तुमं । उक्कण्ठिदं भत्तारं उज्झिअ अजुत्तं णिग्गमणं । अहं एव्व गमिस्सं । [एवं भवतु । अथवा तिष्ठ त्वम् । उत्कण्ठितं भर्त्तारं उज्झित्वा अयुक्तं निर्गमनम् । अहम् एव गमिष्यामि ।]

Vasav—Let it be so ; rather do yourself stay. It is not proper to go out leaving your husband in a disturbed state. I alone shall go away.

चेटी—सुट्ठु अय्या भणादि । उवसप्पदु दाव भट्टिदारिआ । [सुष्ठु आर्या भणति । उपसर्पतु तावत् भर्तृदारिका ।]

Maid—Well speaks the revered lady; let the princess approach.

पद्मावती—किं णु खु पविसामि। [किं नु खलु प्रविशामि?]

Padma—Shall I indeed, enter?

वासवदत्ता—हला! पविस। [हला, प्रविश।] (इत्युक्त्वा निष्क्रान्ता।)

Vasav—Yes, my dear, do enter. (saying so goes out).

(प्रविश्य)

(Entering)

विदूषकः—(नलिनी पत्रेण जलं गृहीत्वा) एसा तत्तहोदी पदुमावदी। [एषा तत्र भवती पद्मावती।]

Vidusaka—(Taking water in a lotus-leaf) Her ladyship Padmavati here!

पद्मावती—अय्य! वसन्तअ! किं एदं? [आर्य! वसन्तक! किम् एतत्?]

Padma—Noble Basantaka, what is this?

विदूषकः—एदं इदं। इदं एदं। [एतत् इदम्। इदम् एतत्।]

Vidusaka—It is this, this is this.

पद्मावती—भणादु भणादु अय्यो भणादु। [भणतु भणतु आर्यो भणतु।]

Padma—Say, say, noble sir, please say.

विदूषकः—भोदि! वादणीदेण कासकुसुमरेणुणा अक्खिणिपडिदेण सस्सुपादं खु तत्तहोदो मुहं। ता गह्णदु होदी इदं मुहोदअं। [भवति! वातनीतेन काशकुसुमरेणुना अक्षिनिपतितेन साश्रुपातं खलु अत्रभवतो मुखम्। तद् गृह्णातु भवती इदं मुखोदकम्।]

Vidusaka—Madam, as a pollen of a kasa-flower being wafted by the breeze, has fallen into his eyes, so His Majesty's face is full of shedding tears therefore let your ladyship hold this water for washing his face.

पद्मावती—(आत्मगतम्) अहो सदक्खिण्णस्स जणस्स परिजणो वि सदक्खिण्णो एव्व होदि। (उपेत्य) जेदु अय्यउत्तो। इदं मुहोदअं। [अहो सदाक्षिण्यस्य जनस्य परिजनः अपि सदाक्षिण्यः एव भवति। जयतु आर्यपुत्रः। इदं मुखोदकम्।]

Padmavati—Even the attendant of a man himself courteous is also courteous. (Approaching) Victory to my lord. Here is water for washing your face.

राजा—अये! पद्मावती। (अपवार्य) वसन्तक! किमिदम्?

King—Ah! Padmavati. (Aside). Basantaka, what is this?

विदूषकः—(कर्णे) एव्वं विअ। [एवम् इव।]

Vidusaka—(Into his ear.) Thus and thus.

राजा—साधु, वसन्तक! साधु। (आचम्य) पद्मावति! आस्यताम्।

King—Well done, Basantaka, well done. (Sipping.) Padmavati, take your seat please.

पद्मावती—जं अय्यउत्तो आणवेदि। (उपविशति) [यद् आर्यपुत्रः आज्ञापयति।]

Padma—As commands my lord. (Sits down.)

Notes—1. अश्रुपातक्लिन्नम्—अश्रूणां पातः (ष. त.) तेन क्लिन्नम् (३या तत्) qualifies मुखम्। पत् भ्वा. पर, पतति पपात अपतत्। क्लिद्+क्त, दिवा. पर., क्लियति, चिक्लेद, अक्लेदीत्।

2. बाष्पाकुलपटान्तरितम्—बाष्पैः आकुलम् बाष्पाकुलम् (३या तत्.); पटेन अन्तरितम् पटान्तरितम् (३या. तत्) मार्जनवस्त्राच्छादितम्। बाष्पाकुलम् च तत् पटान्तरितम् बाष्पाकुलपटान्तरितम् (विशेषणोभयपदकर्मधारय) like खञ्जकुब्जः। It has been translated variously by scholars, though the real sense is missed in all such interpretations. "Covered

with the veil of *tears ; or covered with a cloth wet with* tears, etc." When a particle falls into our eye, we feel very much troubled. We atonce take out our handkerchief, or the end of our dhoti, and put it in our mouth to blow warm breathings on it, so that it may become warm. Then we apply that warm cloth to our eye to poothe it, we go on repeating this process every time wiping our eyeball with the cloth till the particle comes out. *The sweet memory of his dead beloved Vasava had* moved him to tears. Tears were trickling down his cheeks, but as he was a grave man, he covered his face with kerchief so that his tears might not be noticed.

3. उत्कण्ठा+इतच् (जातार्थे) । "तदस्य संजातं तारकादिभ्यः इतच" ।

4. एतत् इदम्—This shows the confusion of विदूषक on seeing Padma unexpectedly there. He is confused *lest his conversation was overheard etc.* But, however, he soon recovers his self-possession. His readiness of wit helps him to explain away the matter by saying वातनीतेन काशकुसुमरेणुना etc.

5. मुखोदकम्—मुखप्रक्षालनार्थं उदकम् the water to wash the face. शाकपार्थिवादित्वात् मध्यपद. स.

6. अपवार्य—It is a dramatic technique meaning 'turning aside' to prevent others from hearing. It is technically called अपवारित in dramaturgy. "रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम्"—The King turning away from Padma, inclines towards Basantaka with a view to know the fact how Padma came with water for washing his face.

राजा—पद्मावति !

शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि !
कुशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥ ८ ॥

(आत्मगतम्)

इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत् ।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥ ९ ॥

King—Padmavati, O charming lady, this face of mine is shedding tears, due to pollen of a kasa-flower, white like the autumnal moon, being blown into my eye by the breeze.

(To himself) this young girl is newly-married, she will be pained to hear the truth. True it is that she is equanimous-minded, but by nature woman is timid.

अन्वय—हे भामिनि ! शरच्छशाङ्कगौरेण वाताविद्धेन कुशपुष्पलवेन इदम् मम मुखम् साश्रुपातम् अस्ति ।

इयम् नवोद्वाहा बाला सत्यम् श्रुत्वा व्यथाम् व्रजेत् । कामम् इयम् धीरस्वभावा तु स्त्रीस्वभावः कातरः ।

व्याख्या—हे भामिनि ! हे सुन्दरि ! शरच्छशाङ्कगौरेण शरच्चन्द्रः इव गौरः उज्ज्वलः धवलः तेन तादृशेन, वाताविद्धेन वातेन वायुना आविद्धेन आक्षिप्तेन, काशपुष्पलवेन काशकुसुमकणेन इदम् मम उदयनस्य मुखम् वदनम् साश्रुपातम् अश्रुपातसहितम् अश्रुपातं करोति इतिभावः ॥ ८ ॥

इयं बाला etc.—इयम् पद्मावती नवोद्वाहा नवः नवीनः उद्वाहः विवाहः यस्याः सा, नवोढा नव-परिणीता बाला षोडशी सत्यम् अश्रुपातस्य सत्यम् कारणम् श्रुत्वा आकर्ण्य व्यथां व्रजेत् दुःखं प्राप्नुयात् । कामम् यथार्थम् इदम् इयम् पद्मावती धीरस्वभावा धीरः धैर्ययुक्तः स्वभावः प्रकृतिः यस्याः सा धीरप्रकृतिः, स्वभावेन धीरा, न तु चञ्चला अस्ति, तु किन्तु स्त्रीस्वभावः स्त्रियाम् नारीणाम्

स्वभावः प्रकृतिः कातरः अधीरः अस्ति । प्रायः स्त्रियः स्वभावेन अधीराः सन्ति । अतएव पद्मावती अपि स्त्रीत्वात् स्वभावेन अधीरा एव भवेत् । अतः मया सत्यकारणम् न कथितव्यम् ।

Notes—1. शरच्छशाङ्कगौरेण—शरदः शशाङ्कः (ष० त०) स इव गौरः (उपमानतत्) तेन ।

2. वाताविद्धेन—वातेन आविद्धः आनीतः (३या तत्) तेन । वा+क्तः=वातः wind "आदिकर्मणि क्तः कर्त्तरि". आ + व्यध्+क्त (कर्मणि)=आविद्धः ।

3. काशपुष्पलवेन—काशस्य पुष्पम्, तस्य लवः तेन, हेतौ or करणे ३या ।

4. बाला—A young lady of tender age ; of near about 16 years. Being young, she has very little experience of life, and so she is not expected to use as much prudence and discretion to bear the shock patiently as a matured lady can do.

5. नवोद्वाहा—नवः उद्वाहः यस्याः सा (ब० व्रीः०); उत्+वह्+घञ् ।

6. कामम् धीरस्वभावा—कामम् is an अव्यय—meaning granted, true it is. 'अकामानुमतौ कामम् इत्यमरः ।, धीरः स्वभावः यस्याः (ब. व्री.). Granted that Padma is even-minded, but as ladies in general are shocked to hear their husbands loving them less than their co-wives, so it is not wise on my part to disclose to her my love for Vasava. She is after all a woman, and may feel pained, so it is wise not to tell her the true reason.

विदूषकः—उइदं तत्तहोदो मअधराअस्स अन्तरहुणकाले भवन्तं अग्गदो करिअ सुहिज्जणदंसणं । सखोरो हि जाव सखारेण पडिच्छिदो पीदिं उप्पादेदि । ता उट्ठेदु दाव भवं ।

[उचितं तत्रभवतो मगधराजस्य अपराह्णकाले भवन्तम् अग्रतः कृत्वा सुहृज्जनदर्शनम् । सत्कारो हि नाम सत्कारेण प्रतीष्टः प्रीतिम् उत्पादयति । तदुत्तिष्ठतु तावद् भवान् ।

Vidusaka—It is proper that His Majesty the King of Magadha placing you in front, should see his friends in the afternoon. For, honour, received with reciprocal honour, certainly begets affection. So let Your Honour get up.

राजा—बाढम् । प्रथमः कल्पः । (उत्थाय)

गुणानां वा विशालानां सत्काराणां च नित्यशः
कर्त्तारः सुलभाः लोके विज्ञातारस्तु दुर्लभाः ॥ १० ॥

(निष्क्रान्ताः सर्वे) इति चतुर्थोऽङ्कः

King—All right. A nice proposal. (Getting up). The doers of mighty deeds and the possessors of high merits are always easily obtainable in the world but the appreciators of these are rare. Or the doers of great good and doers of great honours are always easily found in the world but rare are their appreciators. (All exeunt). End of Act IV.

P. O.—विशालानाम् गुणानाम् वा (विशालानाम्) सत्काराणाम् च नित्यशः कर्त्तारः लोके सुलभाः सन्ति, तु विज्ञातारः दुर्लभाः सन्ति ।

व्याख्या—विशालानाम् उदाराणाम् महताम् गुणानाम् परोपकारादिनाम् सत्कर्मणाम् वा च सत्काराणाम् प्रियजनपूजानाम् च कर्त्तारः सम्पादयितारः लोके संसारे सुलभाः सुखलभ्याः सन्ति । तु परन्तु तेषां गुणानां सत्काराणां च विज्ञातारः गुणग्राहिणः सत्कारबहुमानिनः दुर्लभाः दुष्प्रापाः विरलाः सन्ति । गुणकर्तारः सत्कारकर्त्तारश्च जगति बहुलाः सन्ति । परन्तु परकृतगुणानाम् आदर्तारः परकृतसत्काराणाम् आदर्त्तारश्च अस्मिन् संसारे विरलाः सन्ति ।

चिरजाः जनाः परकृतोपकारं परकृतसत्कारं च स्वीकृत्य स्वकृतज्ञताम् प्रकाशयन्ति ।

Notes.

1. सत्कारो etc.—Vidusaka mean to say. As the King honours you by keeping you in front at the time of seeing his friends in the afternoon, so you should honour him by being at his side at that time. Thus honour, received with honour produces mutual affection.

2. अपराह्ने—अपरम् अह्नः, अपराह्णः, एकदेशितत् by "पूर्वापराधरोत्तरम् एकदेशिनैकाधिकरणे" । Now "राजाहः सखिभ्यष्टच्" applies । अह्नोऽह्नः एतेभ्यः says that अह्न is substitute of अहन् after एकदेश, संख्यावाचक, सर्व etc. Finally न changes to ण by अह्नोऽदन्तात्, so we have अपराह्नः like सर्वाह्नः Masculine, acc. to रात्राह्नाहाः पुंसि When no एकदेशिसमास then अपरम् अहः (other day) अपराहः by "राजाहः सखिभ्यष्टच्" ।

3. प्रथम—Excellent, कल्प—idea, proposal. This *expression occurs often in Sanskrit dramas.*

4. गुणानाम्—कर्त्तरि षष्ठी by कर्तृकर्मणोः कृतिषष्ठी in connection with कर्त्तरि । गुणाः means here excellent deeds welfare, benefits. Says Ganapati Shastri.

"गुणानाम् परोपकारजातीयानाम् सत्कर्मणाम्" । It may be taken in its general sense of merits, qualities also, then the meaning will be. "Possessors of great merits" etc.

5. वा शब्दः समुच्चये इति शास्त्री । वा means here "and, as well as."

6. सत्काराणाम्—Like गुणानाम्, it may also mean सत्कार्याणाम्।

7. विज्ञातारः—appreciators, admirers, those who can appreciate the good done or honour shown to them.

8. विशेषणं जानन्ति इति वि+ज्ञा+तृच् विज्ञातृ। We can't have तृन्, as that will debar षष्ठी according to नलोका etc.

N. B.—Mark the ingenuity of the Vidu. in extricating his master from an ugly situation. The King is much embarassed at the unexpected appearance of Padma, he could not have been long in her company with any good grace, so Basantaka rescues the King by reminding 'The day is much advanced, and you have appointment with the King of Magadha. He respect you and you also should respect him by receiving his respect greatfully. So let us go see his majesty.'

अथ पञ्चमोऽङ्कः

Act V.

(ततः प्रविशति पद्मिनिका)

(Then enter Padminika.)

पद्मिनिका—महुअरिए! महुअरिए! आअच्छ दाव सिग्घं। [मधुकरिके! मधुकरिके! आगच्छतावत् शीघ्रम्।]

Padminika—Modhukarika, Madhukarika, just come quickly.

(प्रविश्य)

मधुकरिका—हला! इअम्हि। किं करीअदु? [हला! इयमस्मि, किं क्रियताम्?]

Entering.

Madhukarika—Here am I, my dear, what is to be done?

पद्मिनिका—हला ! किं ण जाणासि तुवं भट्टिदारिआ पदुमावदी सीसवेदणाए दुक्खाविदेति । [हला ! किं न जानासि त्वम्, भर्तृदारिका पद्मावती शीर्षवेदनया दुःखिता इति]

Padminika—Friend, do you not know that princess Padmavati is suffering from headache ?

मधुकरिका—हद्धि ।

Madhukarika—Alas !

पद्मिनिका—हला ! गच्छ सिग्घं, अय्यं आवन्तिअं सद्दावेहि । केवलं भट्टिदारिआए सीसवेदणं एव्व णिवेदेहि । तदो सअं एव्व आगमिस्सदि । [हला ! गच्छ शीघ्रम्, आर्याम् आवन्तिकाम् शब्दापय । केवलं भर्तृदारिकायाः शीर्षवेदनाम् एव निवेदय । ततः स्वयम् एव आगमिष्यति ।]

Padmi—Hurry up, friend. Call Lady Avantika, simply inform her of the headache of the princess, then she will herself come.

मधुकरिका—हला ! किं सा करिस्सदि ? [हला ! किं सा करिष्यति ?]

Madhu—What will she do, my dear ?

पद्मिनिका—सा हु दाणिं महुराहिं कहाहिं भट्टिदारिआए सीसवेदणं विणोदेदि । [सा खलु इदानीम् मधुराभिः कथाभिः भर्तृदारिकायाः शीर्षवेदनाम् विनोदयति ।]

Padmi—She will indeed allay the headache of the princess by telling her sweet stories.

मधुकरिका—जुज्जइ । कहिं सअणीयं रइदं भट्टिदारिआए ? [युज्यते । कुत्र शयनीयं रचितं भर्तृदारिकायाः ?]

Madhu—That's right. Where is the bed of the princess arranged ?

पद्मिनिका—समुद्दगिहके किल सेज्जात्थिण्णा । गच्छ दाणिं तुवं । अहं वि भट्टिणो णिवेदणत्थं अय्यवसन्तअं अण्णेसामि ।

[समुद्रगृहके किल शय्यास्तीर्णा । गच्छ इदानीं त्वम् । अहम् अपि भर्त्रे निवेदनार्थम् आर्यवसन्तकम् अन्वेष्यामि ।]

Padmi—Her bed is spread, it is said, in the Sea-Palace. Go you now. I, too, shall search for noble Basantaka in order to inform His Majesty.

मधुकरिका—एव्वं होदु । (निष्क्रान्ता) [एवं भवतु ।]

Madhu—Let it be so. (Exit.)

पद्मिनिका—कहिं दाणीं अय्यवसन्तअं पेक्खामि ? [कुत्र इदानीम् आर्यवसन्तकम् पश्यामि ?]

Padmi—Where shall I see now noble Basantaka ?

(ततः प्रविशति विदूषकः)

(Then enter Vidusaka)

विदूषकः—अज्ज खु देवीविओअविहुरहिअअस्स तत्तहोदो वच्छराअस्स पदुमावदीपाणिग्गहण समीरिअस्स अच्चन्तसुहावहे मङ्गलोसवे मदणग्गिदाहो अहिअदरं वड्ढइ !(पद्मिनिकां विलोक्य) अयि पदुमिणिआ ! पदुमिणिए ! किं इह वत्तदि ? [अद्य देवीवियोगविधुरहृदयस्य तत्रभवतः वत्सराजस्य पद्मावती पाणिग्रहणसमीरितस्य अत्यन्त-सुखावहे मङ्गलोत्सवे मदनाग्निदाहः अधिकतरम् वर्द्धते । अयि पद्मिनिका ! पद्मिनिके ! किम् इह वर्त्तते ?]

Vidusaka—Today, indeed, on this greatly happy festive occasion, the burning of the fire of love of His Majesty, the King of Vatsa, whose heart is afflicted with the separation of his queen, waxes briskly, fanned by his marriage with Padmavati. (Looking at Padminika) Ah ! Padminika here. Padminika, what is the matter here ?

पद्मिनिका—अय्य ! वसन्तअ ! किं ण जाणासि तुवं भट्टिदारिआ पदुमावदी सीसवेदणाए दुःखिदेत्ति ! [आर्य्य ! वसन्तक ! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति ।]

Padminika—Noble Basantaka, do you not know. Princess Padmavati is suffering from headache?

विदूषकः—भोदि ! सच्चं ण आणामि । [भवति सत्यं न जानामि ।]

Vidu—Good lady, really I do not know.

पद्मिनिका—तेण हि भट्टिणो णिवेदेहि णं ! जाव अहं वि सीसाणुलेवणं तुवारेमि ! [तेन हि भर्त्रे निवेदय एनाम् ! यावत् अहम् अपि शीर्षानुलेपनं त्वरयामि ।]

Padminika—Then inform the King of her. Meanwhile I, too, hasten up ointment for her head.

विदूषकः—कहिं सअणीअं रइदं पदुमावदीए ? [कुत्र शयनीयं रचितं पद्मावत्याः ?]

Vidu—Where is Padmavati's bed arranged?

पद्मिनिका—समुद्दगिहके किल सेज्जात्थिण्णा । [समुद्रगृहके किल शय्यास्तीर्णा ।]

Padmi—The bed, it is said, is spread in the Sea-Palace.

विदूषकः—गच्छदु भोदी । जाव अहं वि तत्तहोदो णिवेदइस्सं । [गच्छतु भवती । यावत् अहम् अपि तत्रभवते निवेदयिष्यामि ।]

Vidu—Your ladyship may go. In the meantime I, too, shall inform His Majesty.

निष्क्रान्तौ

(Exeunt)

(प्रवेशकः)

(Prelude)

(ततः प्रविशति राजा)

राजा—

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः ।

लावाणके हुतवहेन हृताङ्गयष्टिं
तां पद्मिनीं हिमहतामिव चिन्तयामि ॥ १ ॥

King—With the burden of a wife again come upon me, in course of time, I consider the praise-worthy daughter of the King of Avanti, whose slender frame, was consumed by fire at Lavanaka, like a lotus-plant, smitten (suddenly) by frost.

अन्वय—कालक्रमेण पुनरागतदारभारः (अहम्) अवन्तिनृपतेः सदृशीम् श्लाघ्याम्, लावाणके हुतवहेन हृताङ्गयष्टिम्, ताम् तनुजाम्, हिमहताम् पद्मिनीम् इव चिन्तयामि ।

व्याख्या—कालक्रमेण कालस्य समयस्य क्रमः गतिः तया समयगत्या, पुनरागतदारभारः पुनः भूयः आगतः उपनीतः दाराणां पत्न्याः भारः यस्य सोऽहम् उदयनः । पुनरपि यः कालगत्या पद्मावत्या सह विवाहं कृतवान् (पत्नीपाशबद्धः) । अवन्तिनृपतेः अवन्तिराजस्य अवन्तीनां नृपतिः तस्य, सदृशीम् तुल्यगुणरूपाम्, पितुः अनुरूपाम्, श्लाघ्याम् श्लाघनीयाम् प्रशंसनीयाम्, लावाणके लावाणकनामके ग्रामविशेषे, हुतवहेन हुतस्य आहुतस्य वहः वहनकारी वाहकः इति हुतवहः अग्निः तेन, हृताङ्गयष्टिम् हृता दग्धा अंगयष्टिः अंगम् शरीरम् यष्टिः इव यस्याः सा ताम् दग्धदेहाम् ताम् प्रसिद्धाम् स्वगुणैः विख्याताम्, तनुजाम् दुहितरम् पुत्रीम् वासवदत्ताम् हिमहताम् हिमेन तुषारेण हताम् नष्टाम् तुषारनष्टाम्, पद्मिनीम् कमलिनीम् इव चिन्तयामि विभावयामि । यद्यपि कालगत्याहं पत्नीपरिग्रहं कृतवान् तथापि अहम् ताम् गुणमयीं लावाणके दग्धां, प्राणवल्लभां अनुक्षणम् चिन्तयामि एव । न तु ताम् विस्मर्तुम् शक्नोमि ।

Notes—कालक्रमेण—कालस्य क्रमः तेन (करणे ३या). It can't be हेतौ ३या, हेतुः of what ? The passage of time removes his sorrow, consolation comes, duty intervenes,

so he marries. So it helps in marrying. Hence करणे तृतीया.

2. पुनरागतदारभारः—दाराणां भारः (ष. तत्); पुनः आगतः पुनरागतः सुप्सुपा; पुनरागतः दारभारः यस्मिन् यस्य वा (ब. व्री.)। Qualifies अहम्। 'दार' is always masculine plural दाराः दारान् दारैः etc. This shows that the King had married Padma for reasons other than self-gratification. He consider this marriage verily a burden and not a source of pleasure. He was forced by the circumstances of time to marry Padma. Yaugandharayana has planned this marriage-alliance to crush down the king's enemy आरुणि with the military help of the King of Magadha. The King had not solicited Padma's hand. She was offered to him by her brother Darsaka. See Act II.

3. अवन्तिनृपतेः—अवन्तीनां नृपतिः, तस्य सदृशीयोग्या, षष्ठी by तुल्यार्थैरतुला etc.

4. सदृशीम्—तुल्यगुणाम्, worthy of her father in respect of qualities of head and heart.

5. श्लाघ्याम्—श्लाघ + यत् + स्त्रियाम् टाप्। praiseworthy.

6. हुतवहेन—अनुक्ते कर्त्तरि तृतीया हुत। वहति इति वहः वह+अच् (पचाद्यच्); हुतस्य वहः (षष्ठी तत्)। हुतवह is connected in sense with हुत in हुताङ्गयष्टिम् and as such should be compounded with हुत but not so; for the connection is clear (गमकत्वात्), we can easily find connection of हुतवह word with हुत so सापेक्षत्वेऽपि गमकत्वात् समासः applies.

हतांगयष्टिम्—अंगम् यष्टिः इव (उपमित कर्म) अंगरूपा यष्टिः (मध्यमपदलोपः) हता अंगयष्टिः यस्याः सा (बहु.)

ताम्—प्रसिद्धाम्, तत् is used here to denote प्रसिद्धि Vide "प्रकान्त प्रसिद्धानुभूतार्थ विषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते" Kavyaprakash VII. Therefore तत् is used even without the use of यत्।

तनूजाम्—तनू+जन्+ड+स्त्रियां टाप् (पञ्चम्यां जनेर्डः) तन्वाः जायते इति (उपपद समासः); कर्म of चिन्तयामि।

हिमहताम्—हिमेन हता, ताम (३या तत्); हन्+क्त (कर्मणि) हन् अदा. उभ. हन्ति जघान अवधीत् etc. हते etc.

पद्मिनीम्—पद्मम् अस्याः अस्ति इति पद्म+इनिन्+ङीप्। comp. "जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्" मेघदूतम्।

The picture here is very vivid. A lotus laughing in air scattering its perfume all around but suddenly the snow-fall destroys it, so the fate of the blooming lotus is very pathetic. Similarly Vasava was all hale and hearty. She was blooming in her youth, but cruel death snatched her away from among us. So I deem her like a blooming lotus-plant smitten by snow. Ah ! I feel much for her pathetic sudden end.

(प्रविश्य)

(Entering)

विदूषकः—तुवरदु तुवरदु दाव भवं। [त्वरतां त्वरतां तावत् भवान्।]

Vidusaka—Make haste, make haste, Your Honour.

राजा—किमर्थम् ?

King—Why ?

विदूषकः—तत्तहोदी पदुमावदी सीसवेदणाए दुक्खाविदा। [तत्रभवती पद्मावती शीर्षवेदनया दुःखिता।]

for Vasava.' But this interpretation seems simply pedantic. The King was just now brooding over the sad and sudden fate of Vasava तां पद्मिनीं हिमहतामिव चिन्तयामि, so when he was apprized of the ailment of Padma, he was very much shocked. He apprehended a similar sudden bereavement form this beloved too, who had soothed to some extent his lacerated heart, so he gives vent to his anxiety in these terms.

7. मन्दः इव—अभूत्, the grief was not little, it was, as if a bit less, a bit mitigated.

8. अनुभूतदुःखः—अनुभूतं दुःखम् येन सः (बहु०); qualifies अहम् । understood.

9. तथैव—तथा एव=exactly so; similarly, as Vasava has died, so she also shall perhaps die.

10. समर्थयामि—सम्+ अर्थ + णिच् + लट् मि ; I consider or suppose. I have already lost my wife Vasavadatta, hearing about Padma's headache, I fear lest I may lose her too. अपि means here समुच्चय ।

विदूषकः—समुद्दगिहके किल सेज्जात्थिण्णा । [समुद्रगृहके किल शय्यास्तीर्णा ।]

Vidusaka—Her bed is said to be spread in the Sea-Palace.

राजा—तेन हि तस्य मार्गमादेशय ।

King—Then lead the way to that.

विदूषकः—एदु एदु भवं । [एतु एतु भवान् ।] (उभौ परिक्रामतः)

Vidu—Come, come Your Honour. (Both walk on).

विदूषकः—इदं समुद्दगिहकं । पविसदु भवं । [इदं समुद्रगृहकम् । प्रविशतु भवान् ।]

Vidusaka—This is the Sea-Palace. May Your Honour enter.

राजा—पूर्वं प्रविश ।

King—Enter first.

विदूषकः— भो ! तह् । (प्रविश्य) अविहा चिट्ठदु चिट्ठदु दाव भवं । [भोः ! तथा । अविहा ! तिष्ठतु तिष्ठतु तावत् भवान् ।]

Vidusaka—Well, let it be so. (Entering) My God ! Stop, just stop Your Honour.

राजा—किमर्थम् ?

King—What for ?

विदूषकः—एसो खु दीवप्पभावसूइदरुवो वसुधातले परिवत्तमाणो अयं काओदरो । [एष खलु दीपप्रभावसूचितरूपो वसुधातले परिवर्त्तमानः अयं काकोदरः ।]

Vidusaka—Here is, indeed, a snake rolling on the ground, his form is revealed by the light of the lamp.

राजा—(प्रविश्यावलोक्य सस्मितम्) अहो सर्पव्यक्तिर्वैधेयस्य ।

ऋज्वायतां हि मुखतोरणलोलमालां
भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख ! सर्पम् ।
मन्दानिलेन निशि या परिवर्तमाना
किञ्चित् करोति भुजगस्य विचेष्टितानि ॥ ३ ॥

King—(Entering and seeing, with a smile), Oh ! the fool mistakes it to be a serpent. Fool, you consider this straight and long garland, hanging in the door-arch, now fallen on the ground, as a serpent, the garland, which rolling at might by the gentle breeze, somewhat imitates the movements of a serpent.

अन्वय—मूर्ख ! या निशि मन्दानिलेन परिवर्त्तमाना भुजगस्य विचेष्टितानि किञ्चित् करोति, (ताम्) ऋज्वायताम् क्षितौ भ्रष्टाम् मुखतोरणलोल मालाम् हि सर्पम् अवगच्छसि ।

व्याख्या—हे मूर्ख ! मूढ ! या माला निशि रात्रौ, मन्दानिलेन मन्दसमीरेण, परिवर्तमाना भूमौ लुठन्ती, भुजगस्य सर्पस्य, विचेष्टितानि चलनानि, किञ्चित् लेशतः अंशतः, करोति आचरति अनुकरोति इत्यर्थः, ताम्, ऋज्वायताम् ऋजुम् सरलाम् आयताम् दीर्घां, क्षितौ भूमौ भ्रष्टाम् पतिताम्, मुखतोरणलोलमालाम् मुखम् द्वारम् तत्र यत् तोरणम् मुखतोरणम् समुद्रगृहस्य निर्गमद्वारम्, तत्र लोला चञ्चला दोलायमाना माला पुष्पमाला ताम् हि एव सर्पम् अवगच्छसि सर्पः इति मन्यसे। मुखतोरणबद्धा काचित् ऋजुः दीर्घा च माला वायुवशेन केनापि कारणेन वा स्वस्थानात् स्खलिता भूमौ पतिता मन्दवायुवशेन तत्र इतस्ततः लुठन्ती रात्रौ सर्पगतिम् अनुकरोतिस्म। तामेव मालामवलोक्य मूढधियः तव सर्पभ्रान्तिः अभूत्। न तु अयं सर्पः, परन्तु भूमिपतिता माला इति भावः।

Notes—1. वैधेय—A fool, or block-head देवानां प्रियः। विधेयं विधानं तस्य अयम् अधिकारी इति विधेय+अण् one fit for executing orders or other's biddings.

मूर्ख—मुह+खः मुहः खो मूर्च, मुह्यति।

2. मन्दानिलेन—करणे ३या ; मन्दः अनिलः (कर्मधा०) तेन

3. भुजगस्य—षष्ठी by नपुंसके भाव उपसंख्यानम्, in connection of विचेष्टितानि—a word formed with क्त in भाव—sense. भुजं कुटिलं गच्छति इति भुज+गम् + डः; भुज+गम्+खच्=भुजंगमः भुजंगः वा। (खच्च डिद्वा वक्तव्यः)

4. विचेष्टितानि—कर्म of करोति; वि+चेष्ट+क्त (नपुंसके भावे क्तः) करोति means here अनुकरोति । It means आचरति also.

5. ऋज्वायताम्—ऋजुः चासौ आयता च (विशेषणोभयपद-कर्मधारयः) आ+यम्+क्त (कर्त्तरि)+स्त्रियां टाप्।

6. मुखतोरणलोलमालाम्—मुखे द्वारे तोरणम् इति (७मी तत्) लोला माला इति लोलमाला (कर्मधा०) मुखतोरणे लोलमाला (७मी तत्); तोरण—an arched-door, a gate-way.

7. सर्पम्—विधेय i. e. objective complement of मालाम्; Why difference in gender here ? The विधेय must agree in विभक्ति with the उद्देश्य but sometimes difference is seen in gender and number, e. g. विद्या धनं ज्ञेया, घटो द्रव्यः ।

"उद्देश्ये च विधेये च विभक्तिः सदृशी भवेत् ।
कदाचिज्जायते तत्र वैषम्यं लिङ्गसंख्ययोः ॥"

विदूषकः—(निरूप्य) सट्ठु भवान् भणाति । ण हु अअं काओदरो (प्रविश्यावलोक्य) तत्तहोदी पदुमावदी इह आअच्छिअ णिग्गदाभवे [सुष्ठु भवान् भणति । न खलु अयं काकोदरः । तत्रभवती पद्मावती इह आगत्य निर्गता भवेत् ।]

Vidusaka—(Closely observing) Your Honour says aright. This is not, indeed, a serpent. (Entering and seeing). Her ladyship Padmavati might have come here and gone away.

राजा—वयस्य ! अनागतया भवितव्यम् ।

King—She might not have come here, friend.

विदूषकः—कहं भवं जाणादि ? [कथं भवान् जानाति ?]

Vidusaka—How does Your Honour know ?

राजा—किमत्र ज्ञेयम् । पश्य,

शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा
न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः ।
रोगे दृष्टिविलोभनं जनयितुं शोभा न काचित् कृता ।
प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति ॥ ४ ॥

King—What is to be known here ? Behold—

The bed is not pressed down. It is as even as it was spread. The cover sheet is not ruffled.

The neat and clean pillow is not soiled with the medicines applied for allaying her head-ache. No decoration has been made to divert her sight during illness. A creature having gone to bed through illness, does not leave it soon of his own accord, or a person, getting sleep, owing to sickness, does not shake off sleep soon of his own accord.

अन्वय—शय्या न अवनता, तथा आस्तृतसमा, न व्याकुलप्रच्छदा, अमलम् शिरोपधानम् शीर्षाभिघातौषधैः नहि क्लिष्टम् (भवति)। रोगे (सति) दृष्टिविलोभनं जनयितुम् काचित् शोभा न कृता। प्राणी रुजा शयनम् प्राप्य पुनः स्वयम् शीघ्रम् (तत्) न मुञ्चति।

व्याख्या—शय्या समुद्रगृहके आस्तीर्णा पद्मावत्याः शय्या पल्यंकः, न अवनता उपवेशने शयने वा देहभारेण न अधस्तात् विनमिता। तथा यथा आस्तृता तथैव समा अवन्धुरा न ननाग्रता अस्ति। इयं तु नवास्तृता एव, न उपयुक्ता। न व्याकुलप्रच्छदा व्याकुलः यत्र तत्र सङ्कुचितः प्रच्छदः आस्तरणपटः प्रावरणपटः यस्याः सा; अमलम् स्वच्छम् निर्मलम्, शिरोपधानम् उपवर्हणम् शीर्षाभिघातौषधैः, शीर्षस्य मस्तकस्य अभिघातः पीडा शीर्षाभिघातः शिरःपीडा, शीर्षाभिघातनिवर्त्तकैः औषधैः शीर्षाभिघातौषधैः, न क्लिष्टम् मलिनीकृतम्। रोगे व्याधौ सति, दृष्टिविलोभनम् नयनाकर्षणं, जनयितुम् उत्पादयितुम्, काचित् कापि, शोभा सौन्दर्यम् अलङ्करणम् मनोहर चित्रादिविन्यासरूपा गृहसज्जा न कृता; प्राणी कोऽपि जीवः किं पुनः मनुष्यः, रुजा पीडया, पीडाक्रान्तः कुतोऽपि शयितुम् लालायितः सन्, शयनं शय्याम् प्राप्य लब्ध्वा, पुनः भूयः तत् शयनम् शीघ्रम् सत्वरम्, तदपि स्वयम् आत्मनैव न, मुञ्चति त्यजति।

सरलार्थ—देहभारेण शय्या न नताग्रता, अस्याः प्रच्छदः च न कुत्रापि संकुचितः। इयं पूर्ववत् हि आस्तीर्णा; न केनापि उपभुक्ता; तथैव समा अस्ति यथा इयं विस्तीर्णा। इदम् अमलम् उपवर्हः च मस्तकलिप्तैः औषधैः न मलिनीकृतम्। व्याधिकाले दृष्टिविनोदार्थम्

न किञ्चिदपि अलङ्करणम् कृतम् । एतानि दृष्ट्वा मन्येऽहं यत् पद्मावती नात्र आगता । यतः न कोऽपि जनः रोगग्रस्तः भूत्वा शय्यायाम् शयित्वा शीघ्रम् स्वयमेव तां रोगशय्यां विहाय अन्यत्र गच्छति ।

Notes—अवनता—अव+नम्+क्त (कर्त्तरि)+स्त्रियां टाप्; Pressed down by the weight of the body at the time of sitting or lying.

2. आस्तृतसमा—आस्तृता चासौ समा च ; Spread and even (कर्मधारयः) Qualifies शय्या ; आ+स्तृ+क्त (कर्मणि) +टाप्—स्तृ स्वादि स्तृणोति ; स्तृ is क्र्यादि स्तृणाति, स्तृ+क्त= स्तीर्ण ।

3. शीर्षाभिघातौषधैः—शीर्षस्य अभिघातः (ष. त.) तस्य औषधानि (तादर्थ्ये षष्ठी तत्. समास अश्वघासादिवत्) अनुक्ते कर्त्तरि ३या of क्लिष्टम् । अभि+हन्+घञ्=अभिघातः shock, blow here ailment

4. क्लिष्टम्—क्लिश्+क्त (कर्मणि) क्र्यादि क्लिश्नाति चिक्लेश अक्लेशीत्; क्लिश् दिवा आ. क्लिश्यते चिक्लिशे अक्लेशिष्ट ।

5. व्याकुलप्रच्छदा—व्याकुलः प्रच्छदः यस्याः सा (बहु.) प्र+छादि+घः करणे संज्ञायाम् । प्रच्छदः Sheet (चादर) "पुंसि संज्ञायां घः प्रायेण" इति घः । only "छादे र्घे अद्व्युपसर्गस्य" छादि becomes छदि when घ is added, provided it is not preceded by two or more उपसर्गs. Here there is only one उपसर्ग प्र; so प्रच्छदः ।

6. शिरोपधानम्—शिरस्य उपधानम् (ष. तत्) शिरस् is the common word, but sometimes शिर masculine like गज also is seen as, "पिण्डं दद्यात् गयाशिरे" "शिरोवाची शिरोऽदन्तो रजोवाची रजस्तथा ।" उपधानम्—उपबर्हम्, उपबर्हणम्—pillows.

7. रोगे—भावे ७मी; यस्य च भावेन भावलक्षणम्।
8. दृष्टिविलोभनम्—दृष्ट्योः विलोभनम् विनोदः (ष. तत्)
9. रुजा—हेतौ ३या; on account of illness.
10. शयनम्—शय्याम्, कर्मणि २या, कर्म of प्राप्य and मुञ्चति।
11. मुञ्चति—मुच् तुदा. उभय. मुञ्चति or ते; मुमोच, मुमुचे, अमुचत्—अमुक्त।

विदूषकः—तेण हि इमस्सिं सय्याए मुहुत्तअं उवविसिअ तत्तहोदीं पडिवालेदु भवं। [तेन हि अस्यां शय्यायां मुहूर्तकम् उपविश्य तत्रभवतीं प्रतिपालयतु भवान्।]

Vidusaka—Then Your Honour should sit for a while on this bed and wait for her ladyship.

राजा—बाढम्। (उपविश्य) वयस्य! निद्रा मां बाधते। कथ्यतां काचित् कथा।

King—Very well. (*sitting*) Friend, *sleep over-powers me.* Tell me some story.

विदूषकः—अहं कहइस्सं। हुं त्ति करेदु अत्तभवं। [अहं कथयिष्यामि। हुं इति करोतु अत्रभवान्।]

Vidusaka—I will tell, Your Honour should say, "Hon".

राजा—बाढम्।

King—Very well.

विदूषकः—अत्थि णअरी उज्जइणी णाम। तहिं अहिअरमणीआणि उदअह्णाणाणि वत्तन्ति किल। [अस्ति नगरी उज्जयिनी नाम। तत्र अधिकरमणीयानि उदकस्नानानि वर्तन्ते किल।]

Vidusaka—There is a city Ujjayini by name. It is said that there are very many delightful bathing-places there.

राजा—कथमुज्जयिनी नाम?

King—What! Ujjayini by name.

विदूषकः—जइ अणभिप्पेदा एसा कहा, अण्णं कहइस्सं ।
[यदि अनभिप्रेता एषा कथा, अन्यां कथयिष्यामि ।]

Vidusaka—If you donot like this story, I will tell another.

राजा—वयस्य ! न खलु नाभिप्रेतैषा कथा । किन्तु

स्मराम्यवन्त्याधिपतेः सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः ।
वाष्पं प्रवृत्तं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः ॥ ५ ॥

King—Friend, it is not, indeed, that I donot like the story. But

I call up to my mind the daughter of the King of Avanti, who remembering her kiths and kins at the time of her departure (with me), was shedding through love, on my own bosom, copious tears sticking to the corners of her eyes.

अन्वय—प्रस्थानकाले स्वजनम् स्मरन्त्याः, नयनान्तलग्नम् प्रवृत्तम् वाष्पम्, स्नेहात् मम एव उरसि पातयन्त्याः अवन्त्याधिपतेः सुतायाः स्मरामि ।

व्याख्या—प्रस्थानकाले यदाहं वासवदत्तामादाय उज्जयिन्याः रात्रौ पलायितः तदा तस्मिन् पलायनकाले, स्वजनम् स्वबन्धुवर्गम् मातरं पितरं भ्रातरं सख्यादीन् च स्मरन्त्याः स्नेहात् अनुध्यायन्त्याः, नयनान्तलग्नम् नयनयोः अन्तः तस्मिन् लग्नम् अपाङ्गसंसक्तम्, प्रवृत्तम् प्रवहन्तम्, वाष्पम् अश्रु, स्नेहात् प्रेमवशात्, मम एव न तु अन्यस्य कस्यापि अथवा न तु आत्मनः उरसि, वक्षःस्थले, पातयन्त्याः प्रवाहयन्त्याः विहान्त्याः, अवन्त्याधिपतेः अवन्तिराजस्य प्रद्योतस्य, सुतायाः तनयायाः वासवदत्तायाः स्मरामि अध्येमि उत्कण्ठापूर्वकम् अनुध्यायामि ।

वयस्य ! उज्जयिनीनामश्रवणमात्रेण तस्याः प्रस्थानकालस्य तत् मनोरमं दृश्यं मम दृष्टिगोचरं भवति । तदा सा गजारूढस्य मम उत्संगे उपविष्टा मम स्कन्धे स्वमस्तकं निधाय निजबन्धुवर्गं स्मृत्वा स्मृत्वा मम वक्षसि स्वमुखम् आच्छाद्य प्रहरिणां जागरणभयात् उच्चैः क्रन्दितुम् अशक्नुवती तूष्णीमेव मम उरसि अरुदत् । अनेन मूकरोदनेन तस्याः नयनयोः अश्रुधारा प्रास्रवत् । मम वक्षःस्थलं च क्लिन्नं कृतवती । अहो ईदृशोऽस्याः मयि अनुरागः !

Notes—1. मुहूर्तकम्—कालाध्वनोरत्यन्तसंयोगे २या मुहूर्त + स्वार्थे कः ।

2. हीं—When I am narrating, you should go on saying हुँ हुँ, so that I may think that you are appreciating my narrative.

3. उदकस्नानानि—उदके स्नानानि (स्नानागाराणि) इति (७मी तत्) स्नायते अस्मिन् जनैः इति स्नानम् स्नानस्थानम् स्नानतीर्थानि वा । स्ना+ल्युट् अधिकरणे (कृत्यल्युटो बहुलम्) ; very beautiful bathing-places ; charming bath-rooms ; whose cold and hot baths could be enjoyed. Mark the digression of विदूषक. He was narrating story but he began to describe bath-rooms.

N. B.—Mr. Bhide has adopted another reading उदयज्ञानानि (*a*) which means mark or signs (ज्ञानानि) keeping up the memory of Udayan, the hero. It is natural for Vidu. to describe the achievements of his master when at Ujjayini. Kalidasa mentions these in Meghaduta प्राप्यावन्तीनुदयनकथा etc. प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे; अत्रोद्भ्रान्तः किल नलगिरिः etc. 1. 3,4. (*b*) उदयज्ञानानि—may also refer to observatories, उदयस्य नक्षत्रताराग्रहादीनाम् उदयस्य ज्ञानानि ज्ञानदायकानि चिह्नानि signs

of knowing the rise etc. of the heavenly bodies. Ujjayini was famous for the culture of astronomy in ancient time. It was Green-wich of Hindi astronomers. There might have been observatories there. It was here that Sawai Gaya Sinha, the Raja of Jaipur set up the last observatory during Mahammad Shah's reign (1719-48 A.S).

4. अनभिप्रेता—न अभिप्रेता अनभिप्रेता (नञ् तत्) । अभि+प्र+इ+क्त कर्मणि+स्त्रियां टाप् । Two न's make the assertion very emphatic. Two negatives make one strong affirmative, "संभाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ" इति वामनः ।

5. प्रस्थानकाले—प्रस्थानस्य कालः (ष. तत्) तस्मिन् । मया सह पलायनकाले ।

6. स्वजनम्—स्वस्याःजनः (६ठी तत्) or स्वः जनः (कर्मधारयः) कर्म of स्मरन्त्याः । स्मृ+शतृ+स्त्रियां ङीप्=स्मरन्ती ; तस्याः qual. सुतायाः ।

7. नयनान्तलग्नम्—नयनयोः अन्तौ (षष्ठी तत्), तयोः लग्नम् संलग्नम् (७मी तत्)

8. प्रवृत्तम्—Flown, torrent of tears was flowing. प्रवृद्धम् also is read, then, increased, copious.

9. बाष्पम्—कर्मणि स्या, obj. of पातयन्त्याः ।

10. स्नेहात्—हेतौ पञ्चमी, स्निह्+घञ् । स्निह्यति सिष्णेह

11. अवन्त्याधिपतेः—अवन्त्याः अधिपतिः (षष्ठी तत्) आ तस्य । शेषे ६ठी । अवन्ती+अधिपतिः = अवन्त्यधिपतिः । Why in अवन्त्या ? It is a grammatical mistake. Mark such uses by eminent scholars like M. M. Harprasad Shastri भूम्याधिकारी etc. It can be explained.

(I) आङ् समन्तात् अधिपतिः इति आ + अधिपतिः आधिपतिः then अवन्ती+आधिपतिः ।

(II) अवन्त्या हेतुना अधिपतिः अवन्त्या + अधिपति = अवन्त्याधिपति like गवास्वामी, भुवास्वामी; अवन्त्या takes तृतीया by हेतौ ३या।

(III) अवन्त्याः+अधिपतिः=अवन्त्याः अधिपतिः after dropping विसर्ग। Then they are joined irregularly by Bhasa though not sanctioned by Panini, अवन्त्याधिपतिः then may be regarded as शिष्टप्रयोग of Bhasa.

12. सुतायाः—शेषविवक्षया षष्ठी on account of स्मरामि by अधीगर्थदयेशां कर्मणि Both द्वितीया and षष्ठी can be used in objects of roots meaning fondly remembering, pitying, being master of—optional form is सुताम् स्मरामि।

अपि च

बहुशोऽप्युपदेशेषु यया मामीक्षमाणया।
हस्तेन स्रस्तकोणेन कृतमाकाशवादितम् ॥ ६ ॥

Moreover

Many a time during instructions, gazing on me, she beat the air with her hand, from which plectrum had slipped out, or which let the plectrum slip out.

अन्वयः—उपदेशेषु माम् ईक्षमाणया यया (अनुक्तकर्त्री) स्रस्तकोणेन हस्तेन (करणेन) बहुशः अपि आकाशवादितम् कृतम् तस्याः अवन्तिराजसुतायाः स्मरामि इति पूर्वश्लोकेन सह संबन्धः)

व्याख्या—उपदेशेषु वीणावादनशिक्षणेषु, माम् उदयनम्, ईक्षमाणया एव दृष्ट्या पश्यन्त्या, यया वासवदत्तया, स्रस्तकोणेन च्युतकोणेन भ्रष्टवादन दण्डेन, स्रस्तः च्युतः कोणः वादनदण्डः, वीणावादनसाधनम् यस्मात् सः, तेन हस्तेन करेण, मद्गतचित्ततया स्रस्तमपि कोणम् अजानत्या वासवदत्तया आकाशवादितम् आकाशे शून्ये वादितम् वादनम् कृतम् तादृश्याः वासवदत्तायाः स्मरामि।

अहो ईदृशं तस्याः मयि प्रेम, यत् शिक्षणकाले सा एतादृशया एकाग्रचित्तया मां निर्ध्यायति स्म। यत् तस्या हस्तात् कोणः स्रस्तः तथापि सा नेदं जानाति स्म, मया प्रेरिता सती सा आवेशवशात् रिक्तेनैव हस्तेन वीणां वादयति स्म। वादनदण्डाभावात् न कश्चित् स्वरः कृतः, तथापि सा जानातिस्म यत् सा कोणमादाय वीणोपरि घर्षयन्ती आसीत्। अहो तस्याः मयि ईदृशी आसक्तिः यत् सा कोणः स्रस्तः इति न जानातिस्म। न तया ज्ञातम् यत् वीणाध्वनिं न करोति।

Notes—1. उपदेशेषु—अधिकरणे ७मी; during the time of instruction.

2. ईक्षमाणया—ईक्ष+शानच्+स्त्रियां टाप् qualifies यया अनुक्ते कर्त्तरि ३या।

3. स्रस्तकोणेन—स्रस्तः कोणः यस्मात् सः, तेन, (बहु०) qualifies, हस्तेन (करणे ३या) कोण—plectrum, a fiddle-stick used in playing on violins, सारङ्गी etc. popularly knows as सारिका।

While engaged in looking steadfastly at the charming appearance of Vatsaraja, Vasav, was so much absorbed in thoughts about him that she did not notice when and how the fiddle-stick (कोण) had dropped down from her hand; so she being quite unmindful of this fact moved her empty hand in the air as though she was playing on the lute with the fiddle-stick, when she was asked by Udayana to mind her lesson. Even the absence of lute sound could not be noticed by her, so absorbed, indeed, she had become in looking at Udayana.

आकाशवादितम्—आकाशे वादितम् इति (७मी तत्।) वादितम्=वादनम् तालं दत्तम्। उक्ते कर्मणि प्रथमा, उक्तकर्म of कृतम् Air-beating. Hand was moved in air without producing any sound on the lute as the fiddle-stick had slipped down.

N. B.—शकुन्तला also, like Vasava being absorbed i thought about her lover could not notice the arrival c Sage दुर्वासस्, nay she could not even hear the lou pronouncement of the great curse.

विदूषकः—भोदु, अवरां कहइस्सं । अत्थि णअरं ब्रह्मदत्तं णाम तहिं किल राआ कंपिल्लो णाम । [भवतु, अन्यां कथयिष्यामि अस्ति नगरं ब्रह्मदत्तं नाम । तत्र किल राजा काम्पिल्यो नाम ।]

Vidusaka—Very well, I shall tell another. There i a town Brahmadutta by name. There lived at King named Kampilya.

राजा—किमिति किमिति ?

King—What is it, what is it ?

विदूषकः—(पुनस्तदेव पठति)

Vidusaka—(Repeats the same.)

राजा—मूर्ख ! राजा ब्रह्मदत्तः, नगरं काम्पिल्यमित्यभिधीयताम् ।

King—Fool, say King Brahmadutta, and the city Kampilya.

विदूषकः—किं राआ ब्रह्मदत्तो, णअरं कांपिल्लं ?

Vidusaka—What ? the King Brahmadutta, and the city Kampilya ?

राजा—एवमेतत् ।

King—So it is.

विदूषकः—तेण हि मुहुत्तअं पडिवालेदु भवं, जाव ओट्ठगअं करिस्सं । राआ ब्रह्मदत्तो, णअरं कंपिल्लं । (इति बहुशस्तदेव पठित्वा) इदाणिं सुणादु भवं । अयि सुत्तो अत्तभवं अदिसीदला इअं वेला । अत्तणो पावरअं गहिअ आअमिस्सं । (निष्क्रान्तः) [तेन हि मुहूर्तकं प्रतिपालयतु भवान्, यावत् ओष्ठगतं करिष्यामि । राजा ब्रह्मदत्तः नगरं काम्पिल्यम् । इदानीं शृणोतु भवान् । अयि सुप्तोऽत्रभवान् । अतिशीतला इयं वेला । आत्मनः प्रावारकं गृहीत्वा आगमिष्यामि ।]

Vidusaka—Then please wait a while, Your Honour, till I commit it to memory. (He repeats several times.) King Brahmadutta, city Kampilya. Now Your Honour may hear. Oh ! His Majesty has fallen asleep. This time is very cold ; I will fetch my wrapper (exit.)

Notes—1. नगरं ब्रह्मदत्तं नाम—Vidusaka confounds the name of the King with that of the town. He utters them topsyturvey. This apparent confusion may be due to his characteristic forgetfulness or might have been made purposely to beguile the King. One Brahmadutta, a King of Baranasi is very famous in Budhistic Jataka-stories. But this Brahmadutta is a different man from a King of Kampilya ; the capital of Panchala-Country, where Draupadi's Swayamber was held by her father Drupada. Kampilya is identified with modern Kampila in the Doab on the old Ganges between Badaun and Farukhabad.

2. मुहूर्तकम्—कालाध्वनोरत्यन्तसंयोगे द्वितीया ।

3. ओष्ठगतम्—Deep seated on lips, so that the lips being used to them, may utter the names correctly even if memory fails. In idiomatic Eng. committed to memory, एतत् ओष्ठगतं करिष्यामि ।

4. प्रावारकम्—प्रावारः—प्र + आ + वृ + घञ् (करणे); प्रावियते आच्छाद्यते अनेन a garment, a wrapper, a mantle. It was night and so it was very cold. (ii) प्र+वृ+घञ्=प्रवार or प्रावारक according to उपसर्गस्य घञि अमनुष्ये बहुलम् । प्रावारः एव इति प्रावारकः (स्वार्थे कन्) । "वृणोतेराच्छादने घञ्" घञ् is added to वृ to denote आच्छादनम् (garment); then comes "विभाषा प्रे: इत्येव" so-

प्र+वृ+घञ्=प्रवारः, प्र+वृ+अप्=प्रवरः । प्रवरो गोः, प्रशस्तः इत्यर्थः ।

(ततः प्रविशति वासवदत्ता आवन्तिकावेषेण, चेटी च)

(Then enter Vasavadatta in the guise of an Avantika lady, and a maid)

चेटी—एदु एदु अय्या ! दिढं खु भट्टिदारिआ सीसवेदणाए दुक्खविदा । [एतु एतु आर्या ! दृढं खलु भर्तृदारिका शीर्षवेदनया दुःखिता ।]

Maid—Come Madam, come. The princess is suffering severely from head-ache.

वासवदत्ता—हद्धि, कहिं सअणीअं रइदं पदुमावदीए ? [हा धिक् ! कुत्र शयनीयं रचितं पद्मावत्याः ?]

Vasav—Alas ! where is Padmavati's bed arranged ?

चेटी—समुद्दगिहके किल सेज्जात्थिण्णा । [समुद्रगृहके किल शय्या आस्तीर्णा ।]

Maid—The bed is spread in the Sea-Palace.

वासवदत्ता—तेण हि अग्गदो याहि । [तेन हि अग्रतो याहि ।]

Vasav—Then lead the way.

(उभे परिक्रामतः)

(Both walk on)

चेटी—इदं समुद्दगिहकं । पविसदु अय्या । जाव अहं वि सीसाणुलेवणं तुवारेमि । (निष्क्रान्ता) [इदं समुद्रगृहकम् । प्रविशतु आर्या । यावत् अहम् अपि शीर्षानुलेपनं त्वरयामि ।]

Maid—It is the Sea-Pavilion, Your ladyship may *enter. In the mean time,* I am hastening up the ointment for her head. (Exit).

Notes—1. दृढम्—क्रियाविशेषणे २या ; दृढं यथा तथा, severely, violently.

2. दुःखिता—(1) दुःखं संजातम् अस्याः इति दुःख+जातार्थे इतच्+स्त्रियां टाप्, (2) दुःखयति दुःखं करोति दुःखम् अनुभवति इति दुःख+णिच्+क्त (कर्तरि) + स्त्रियां टाप्। "सुख दुःख तत्क्रियायाम्"—शीर्षवेदनया has हेतौ ३या। 3. It may be दुःखापिता; according to शाकटायन the roots of the कथादि group (in which सुख, दुःख are also included), take पुक् in the causative forms. So कथयति or कथापयति, गणयति or गणापयति, similarly दुःखयति or दुःखापयति, सुखयति or सुखापयति। "शाकटायनस्तु कथादीनां सर्वेषां पुकमाह—कथापयति गणापयति इत्यादि।" सि. कौ. So we get शीर्षवेदना भर्तृदारिकां दुःखापयति or दुखापितवती. In passive voice शीर्षवेदनया भर्तृदारिका दुःखापिता, thereby अनुक्ते कर्त्तरि ३या in शीर्षवेदनया। From this we can directly have दुक्खाविदा—in Prakrita.

4. समुद्रगृहके—अधिकरणे ७मी। समुद्रगृहक—means a palace, a fine pavilion facing big tank or lake. Big lakes or tanks were and are often called in Hindi word सागर or समुद्र। For example, we have famous गंगासागर at वैद्यनाथधाम, जयसागर in Jaipur उदयसागर in Mewar etc. But our Sans. dictionaries say that समुद्रगृहम् means a house fitted with shower-baths समुद्रगृहम् इत्युक्तं जलयंत्र निकेतनम् इति तारावली। जलयंत्र गृहमिति त्रिकाण्डशेषः।

5. शय्या—शीङ्+क्यप्+स्त्रियां टाप्=शय्या शय्यते सुप्यते अस्याम् इति।

6. शयनीयम्—शङ्+अनीयर् अधिकरणे बाहुलकात्—i. e. bed (शय्या) "कृत्यल्युटो बहुलम्।" कृत्य affixes and ल्युट् are used in various senses.

वासवदत्ता—अहो अकरुणा खु इस्सरा मे। विरहपय्युस्सुअस्स अय्यउत्तस्स विस्समत्थाणभूदा इअं वि णाम पदुमावदी अस्सत्था जाता। जाव पविशामि। [अहो अकरुणाः खलु ईश्वराः मे। विरहपर्युत्सुकस्य आर्य्यपुत्रस्य विश्रमस्थानभूता इयम् अपि नाम पद्मावती अस्वस्था जाता। यावत् प्रविशामि।] (प्रविश्यावलोक्य) अहो परिजणस्स पमादो। अस्सत्थं पदुमावदिं केवलं दीवसहाअं करिअ परित्तजदि। इअं पदुमावदी ओसुत्ता। जाव उवविसामि। अहवा अण्णासणपरिग्गहेण अप्पो विअ सिणेहो पडिभादि। ता इमस्सिं सअणिए उवविसामि। [अहो परिजनस्य प्रमादः। अस्वस्थां पद्मावतीं केवलं दीपसहायां कृत्वा परित्यजति। इयं पद्मावती अवसुप्ता। यावत् उपविशामि।] (उपविश्य) किं णु हु एदाए सह उवविसन्तीए अज्ज पह्लादिदं विअ मे हिअअं। दिट्ठिआ, अविच्छिण्ण-सुहणिस्सासा। णिव्वुत्तरोआए होदव्वं। अहव एअ-देस-संविभाअदाए सअणीअस्स सूएदि मं आलिङ्गेहि त्ति। जाव सइस्सं। (शयनं नाटयति।) [किं नु खलु एतया सह उपविशन्त्याः अद्य प्रह्लादितम् इव मे हृदयम्। दिष्ट्या अविच्छिन्नसुखनिःश्वासा। निवृत्तरोगया भवितव्यम्। अथवा एकदेशसंविभागतया शयनीयस्य सूचयति माम् आलिङ्ग इति। यावत् शयिष्ये।]

Vasavadatta—Oh! Gods are, indeed, very cruel to me. Even this Padmavati, who was the source of solace to my husband, suffering from separation, has fallen ill I will just enter. (*Entering and looking round*). Oh! the negligence of the attendants. They have left ailing Padmavati in the company of a solitary lamp. Here is Padmavati fast asleep. I will, then, sit down here. Otherwise, if I sit on a separate seat my affection for her will appear to be slight. So I will sit on this very bed. (*Sitting down*). *How is it that, as I sit with her to-day* my heart feels enraptured? Luckily her breathing is easy and regular. She must be free from ailment (or she must have come round). Or by keeping apart (unoccupied)

one part of the bed, she means to indicate "Embrace me." So I will lie down. (She acts lying down).

Notes—1. अकरुणा—अविद्यमाना करुणा येषां ते अकरुणाः अविद्यमानकरुणाः (बहुव्रीहि) नञोऽस्त्यर्थानां वाच्यो वा उत्तर पदलोपः।

2. ईश्वराः—इष्टानिष्टकरणे समर्थाः देवा। ईश्+वरच्। मे has सम्बन्धेषष्ठी

3. विश्रमस्थानभूता—वि+श्रम्+घञ्= विश्रम, श्रम् does not become श्राम् by वृद्धि according to "नोदात्तोपदेशस्य मान्तस्य अनाचमेः" How then विश्रामः? (i) अपाणिनीयोऽयम्। इति दीक्षितपादः There were some justifications as well. (ii) वृत्तिकार has remarked on the above sutra, केचिदत्र 'वा' इत्यनुवर्त्तयन्ति, सा चा व्यवस्थितविभाषा। तेन उत्कामयति संक्रामयति इत्येवमादि सिद्धं भवति। Mallinath trusts on this in defending विश्रामय, विश्रामयन्, etc.

(i) विश्रमस्य स्थानम् विश्रमस्थानम् (ष. तत्) विश्रमस्थानेन तुल्या इति विश्रमस्थानभूता, (अस्वपदविग्रहः नित्यसमासः) "भूतं क्ष्मादौ...प्राप्ते वित्ते समे सत्ये" इति मेदिनी; सम means तुल्य।

(ii) विश्रमस्थानम् इव इति विश्रमस्थानभूता (नित्यसमासः) "इवार्थे भूतशब्दः" Mr. S. Roy.

(iii) विश्रमस्थानेन भूता (समा तुल्या) इति (सुप्सुपा समासः)

(iv) विश्रमस्थानभूता like ललामभूता and शरीरभूता of Kalidasa is a शिष्टप्रयोग।

4. दीपसहायाम्—दीप एव सहायः सहचरः यस्याः सा (ब. व्री.) ताम्, Lamp was her only mate, accompanied by a lamp only.

5. अन्यासनपरिग्रहेण—अन्यत् आसनम् (कर्म०) तस्य

परिग्रहः तेन (हेतौ ३या) अन्यस्मिन् आसने उपवेशनेन । Equals should sit equally.

6. प्रह्लादितम्—प्र+ ह्लाद् + णिच् स्वार्थे+क्त (कर्तरि), predi. of हृदयम् । Without णिच्, ह्लाद्+क्त=ह्लन्न, with ह्रस्व by ह्लादो निष्ठायाम् । "

Although Vasava did not know about Udayana's presence there, still she suddenly felt delighted owing to the secret working of her mind that was linked to her lord. Says Kalidasa,

मनो हि जन्मान्तरसंगतिज्ञम् Raghu. VII, 12. "तच्चेतसा स्मरति नूनमबोध पूर्वंभावस्थिराणि जननान्तरसौहृदानि"—Shakun., Act V.

7. दिष्ट्या—अव्ययपदम्, fortunately, दिष्टि—luck, तया। हेतौ ३या।

8. अविच्छिन्नसुखनिःश्वासा—नविच्छिन्नः अविच्छिन्नः (नञ् तत्) अविच्छिन्नः चासौ सुखः च इति अविच्छिन्नसुखः (विशेषणोभयपद कर्मधारय), अविच्छिन्नसुखः निश्वासः यस्याः सा (ब. व्री.) सुखः easy, अविच्छिन्न—normal, regular. सुखयति इति सुखः=सुख+अच् पचादित्वात् ।

9. निवृत्तरोगया—निवृत्तः रोगः यस्याः सा (ब. व्री.), अनुक्ते कर्त्तरि ३या ।

10. एकदेश etc. एकः देशः एकदेशः (कर्म०) पार्श्वभागः एकदेशस्य संविभागः (षष्ठी तत्); तस्य भावः, तया, हेतौ ३या ।

(1) But this makes ता in एकदेशसंविभागता superfluous. For विभाग, is an abstract noun, then why another abstract noun is formed by adding ता to it ? It is something like सौन्दर्यता. Ans. Bhasa is a great poet and so कवीनां निरंकुशत्वात् सिद्धम् ।

(2) संविभागः means सम्यक् विभागः यस्य सः (ब. व्री.

well-divided. Being ब_व्रो. it can be used as a predicate of एकदेश, so we have एकदेशः संविभागः यस्य तत्, एकदेश-संविभागम् शयनायम्, तस्य भावः, एकदेशसंविभागता, तया हेतौ ३या। "शय्यायाः एकदेशं प्रियजनशयनपर्याप्तम् उपकल्प्य एकदेशान्तरे स्वयंशयनात् इति तात्पर्यम्" इति गणपतिशास्त्री।

Vasava, means to say that Padma is asleep in one part of the bed and she has left the other part unoccupied, so she has allotted this unoccupied part to her beloved friend to lie down. She seems to invite me to embrace her, during her illness by lying down near her.

N. B.—The best traits in Vasavadatta's character are revealed in this monologue of hers. In the third and the fourth Acts we find Vasava very anxious, on account of Udayana's second marriage, "आर्यपुत्रोऽपि परकीयो संवृत्तः" This thought was always haunting her mind. But here we see Vasava does not regard Padma as her rival cowife सपत्नी. She regards Padma as a source of solace to her aggrieved husband and so she grows extremely uneasy to hear Padma's illness. The sacrifice and love of Vasava for the sake of her husband's well-being, befits a true Hindu lady. Such an ideal life may be an object of pride for any nation. This raises Vasava to the rank of Sita or Savitri.

राजा—(स्वप्नायते) हा वासवदत्ते !

King—(Dreams) Alas! Vasavadatta!

वासवदत्ता—(सहसोत्थाय) हं अय्यउत्तो, ण हु पदुमावदी। किं ण खु दिट्ठम्हि। महन्तो खु अय्यजोअन्धरायणस्स पडिण्णाहारो मम दंसणेन णिप्फलो संवुत्तो। [हम् आर्यपुत्रः। न खलु पद्मावती।

किं नु खलु दृष्टा अस्मि । महान् खलु आर्य्ययौगन्धरायणस्य प्रतिज्ञाभारो दर्शनेन निष्फलः संवृत्तः ।]

Vasav—(Suddenly rising up). Oh! my dear husband, and not, indeed, Padmavati! Am I possibly seen by him? Surely the great vow of Yaugandharayana has been frustrated by my being seen.

राजा—हा अवन्तिराजपुत्रि!

King—Oh! the daughter of the King of Avanti!

वासवदत्ता—दिट्ठिआ सिविणाअदि खु अय्यउत्तो । ण एत्थ कोच्चि जणो । जाव मुहुत्तअं चिट्ठिअ दिट्ठिं हिअअं अ तोसेमि । [दिष्ट्या स्वप्नायते खलु आर्य्यपुत्रः । न अत्र कश्चित् जनः । यावत् मुहूर्त्तकं स्थित्वा दृष्टिं च तोषयामि ।]

Vasava—Luckily my lord is talking in a dream. There is no one here. So staying here for a while, I shall satisfy my eyes and heart.

राजा—हा प्रिये! हा प्रियशिष्ये! देहि मे प्रतिवचनम्।

King—Ah! darling! Ah my dear disciple! give me a reply.

वासवदत्ता—आलवामि भट्टा! आलवामि । [आलपामि भर्तः! आलपामि ।]

Vasav—I will speak, my lord, I will speak.

राजा—किं कुपितासि?

King—Are you angry?

वासवदत्ता—णहि णहि, दुक्खिदह्मि । [नहि नहि, दुःखितास्मि।]

Vasav—No, No I am miserable.

राजा—यद्यकुपिता, किमर्थं नालङ्कृतासि?

King—If you are not angry, why then are you unadorned?

वासवदत्ता—इदो परं किं? [इतः परं किम्?]

Vasava—What next?

राजा—किं विरचिकां स्मरसि ?

King—Do you remember Virachika ?

वासवदत्ता—(सरोषम्) आ अवेहि । इहावि विरचिआ । [आ ! अपेहि ! इहापि विरचिका ।]

Vasava—(Angrily) Ah ! be gone ! Here also Virachika ?

राजा—तेन हि विरचिकार्थं भवतीं प्रसादयामि । (हस्तौ प्रसारयति ।)

King—Then I propitiate you for the sake of Virachika, (Stretches out his hands).

वासवदत्ता—चिरं ठिदह्मि । को वि मं पेक्खे । ता गमिस्सं । अथवा, सयणपलम्बिअं अय्यउत्तस्स हत्थं सअणीए आरोविअ गमिस्सं । (तथा कृत्वा निष्क्रान्ता) [चिरस्थिता कोऽपि मां पश्येत् । तत् गमिष्यामि । अथवा शयनप्रलम्बितमार्यपुत्रस्य हस्तं शयनीये आरोप्य गमिष्यामि ।]

Vasava—I have stayed long. Some one may see me. So I will or, I will go replacing on the bed the hand of my lord, hanging down the couch.

Notes—1. हम्—अव्ययम्, expresses surprise.

2. प्रतिज्ञाभार :—The Vow of Yaugandharayana was to recover the lost Kingdom of Udayana by securing the military help of the King of Magadha after forming a matrimonial relation with him by marrying King Udayana to the sister of Darshaka the King of Magadha after concealing Vasavadatta. The plan had succeeded so far, Vasava was concealed, Udayana was married to Padmavati but the Kingdom is not yet regained. The discovery of the identify of Vasava at this stage would upset Yaug's plan. For Darshaka would be angry to know the big fraud played on him and would refuse to give any military help to Vatsa-King. So Vasava's

incognto life for some time more was absolutely necessary so that enemy might be vanquished and Kingdom regained.

3. दृश्यि हृदयं etc.—This shows the hankering of Vasava's heart. She has not seen him long since. So she is pining for his sight. She wants to soothe her longing heart by looking at him.

4. श्रात्तपामि etc.—This she says possibly to herself (स्वगत) or in low tone. She could not but speak out though the king, being asleep, does not hear her talk.

5. इतः परं किम्—(i) What next? (ii) What is a greater ornament than this i. e. yourself? Husband being the real ornament of a woman.

6. विरचिका—Kathasaritsagar says (II. 6-65-68) that विरचिका was a female attendant of the royal harem with whom Udayana had a love-intrigue. One day, by mistake, he addressed Vasava by her name. So she became very angry with him. For this he had to propitiate Vasava by falling at her feet. The king remembers the same scene in his dream and so Vasava says "Be gone! Virachika, here also Virachika". This is most natural interpretation "विरचिता" reading simply suggests white washing Udayana's character. Moreover Vasava's remark. श्रा श्रपेहि, इहापि विरचिता then won't fit in here. Who shall be gone? Whom does she not like to see?

7. शय्यालम्बितम्—Udayana's hand being stretched out, was hanging out from the bed, which Vasava wants to put, in proper order on the bed.

राजा—(सहसोत्थाय) वासवदत्ते ! तिष्ठ, तिष्ठ । हा धिक् ।

निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः ।
ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः ॥ ७ ॥

King—(Rising up suddenly) Vasavadatta, stay, stay, please stay. Alas !

Dashing out (of the room) in haste, I have been struck by the panel of the door. Therefore, I do not know clearly whether this desire of mine is a reality or not.

अन्वयः—सम्भ्रमेण निष्क्रामन् अहम् द्वारपक्षेण ताडितः ; ततः अयम् मनोरथः भूतार्थः (इति) व्यक्तम् न जानामि ।

व्याख्या—सम्भ्रमेण वेगेन आवेशेन, निष्क्रामन् बहिर्गच्छन् अहम् उदयनः, द्वारपक्षेण द्वारस्य पक्षेण पार्श्वे कपाटेन, ताडितः आहतः । ततः तस्मात् कारणात्, अयम् मनोरथः वासवदत्तादर्शनरूपा कामना, भूतार्थः यथार्थः इति अहम्, व्यक्तम् स्फुटम्, न जानामि अवधारयामि । वासवदत्तादर्शनस्यअनुभवः, सत्यः असत्यः वा ; यथार्थः काल्पनिकमात्रः वा इति अहम् न अवधार यामि ।

Notes—1. संभ्रमेण—प्रकृत्यादिभ्यः तृतीया or हेतौ ३या । निस्+क्रम+शतृ ।

2. मनोरथः—मानसः रथः यस्य (ब. व्री.); वासवदत्तायाः दर्शनस्य अनुभवः ।

3. भूतार्थः—भूतः अर्थः यस्य (ब. व्री.) ; Actual fact, a reality.

4. व्यक्तम्—अव्ययम्—क्रियाविशेषणे २या, clearly.

(प्रविश्य)

(Entering)

विदूषकः—अइ पडिबुद्धो अत्तभवं । [अयि ! प्रतिबुद्धोऽत्रभवान्]
Vidusaka—Oh ! Your Majesty has waked ?

राजा—वयस्य ! प्रियमावेदये, धरते खलु वासवदत्ता ।

King—Friend, I give you a sweet information Vasavadatta is, forsooth, living.

विदूषकः—अविहा वासवदत्ता ! कहिं वासवदत्ता ? चिरा खु उवरदा वासवदत्ता । [अविहा वासवदत्ता ! कुत्र वासवदत्ता ? चिरात् खलूपरता वासवदत्ता ।]

Vidusaka—Alas! Vasavadatta, where is Vasavadatta? Vasavadatta died, indeed, long ago.

Notes—1. प्रियम्—Object of आवेदये कर्मणि २या or it is क्रियाविशेषणे २या meaning agreeably.

2. धरते—It is a favourite expression of Bhasa.

(१) धरते खलु वासवदत्ता (स्वप्ननाटकम्) (२) हतेषु देहेषु गुणाः धरन्ते (कर्णभारनाटक) (३) नष्टाः शरीरैः क्रतुभिर्धरन्ते ।

(i) धृञ् धारणे—भ्वादि सकर्मक उभयपदी धरति or धरते प्राणान्, there must be object as it is सकर्मक ; let us supply आत्मानम् or प्राणान् here.

(ii) धृञ् अवबन्धने भ्वादि धरते—means अवबन्धन and not existing.

(iii) धृङ् अवस्थाने (existing) ध्रियते (exists) see ध्रिये आर्यपुत्र ! ध्रिये (उत्तररचरितम् Act III) ध्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुखम् (शिशुपालवधम् 2, 35.) ध्रियते स्वेदलवोद्गमाऽपि ते (रघु० 8, 51)

If used in first sense, there must be an object, we can supply प्राणान् or आत्मानम् ।

If used in second sense, it does not fit in here. So wrong meaning.

If used in third sense of existing or surviving the form is wrong it should be ध्रियते and not धरते ।

कुत्र वासवदत्ता—Vidusaka pities the delusion of the

mind of the King and reminds him of the actual state of thing that Vasava died long long ago.

राजा—वयस्य ! मा मैवं,

> शय्यायामवसुप्तं मां बोधयित्वा सखे ! गता ।
> दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता ॥ ८ ॥

King—Friend donot, oh! donot say so. Having awakened me while I was lying asleep on my bed, she went away, my friend. I was surely deceived by Rumanavan who told me formerly that she was burnt.

अन्वय—सखे ! शय्यायाम् अवसुप्तम् माम् बोधयित्वा सा गता । (सा) दग्धा इति पूर्वम् ब्रुवता रुमण्वता अहम् वञ्चितः अस्मि ।

व्याख्या—सखे ! हे वयस्य ! शय्यायाम् पल्यङ्के शयनीये ; अवसुप्तम् गाढं निद्रितं माम् बोधयित्वा जागरयित्वा सा वासवदत्ता गता । सा वासवदत्ता दग्धा अग्निदग्धा सती मृता इति ब्रुवता मह्यम् निवेदयता रुमण्वता सेनापतिना रुमण्वता वञ्चितः प्रतारितः छलितः अहम् अस्मि ।

हे सखे ! नूनमेव मम प्रियतमा वासवदत्ता जीवति । इदानीमेव निद्रामग्नं मां जागरयित्वा सा अस्मात् स्थानात् पलायिता । जाने मम मंत्री रुमण्वान् माम् पूर्वम् असत्यम् उक्तवान् यत् सा अग्निदाहेन दग्धा ।

Notes—1. बोधयित्वा—बुध्+णिच्+क्त्वा ।

2. पूर्वम्—Formerly, an adv. refers to ब्रुवता ।

3. अस्मि—An अव्यय, implying "myself"- अस्ति, अस्मि are तिङन्त प्रतिरूपकम् अव्ययम् पतत् ।

4. वञ्चितः—वञ्च्+क्त (कर्मणि) वञ्च्यते ।

5. मा मा वयम्—संभ्रमे (आवेगे) द्विरुक्तिः । कथय should be supplied here.

विदूषकः—अविहा असम्भावणीअं पदं ण। आः! उदअण्हाण-सङ्कित्तणेण तत्तहोदिं चिन्तअन्तेण सा सिविणे दिट्ठा भवे। [अविहा! असम्भावनीयम् एतद् न। आ उदकस्नानसंकीर्तनेन तत्रभवतीं चिन्तयता सा स्वप्ने दृष्टा भवेत्।]

Vidusaka—It is not inconceivable. Ah! she might have been seen in a dream by Your Honour thinking of her ladyship at my mention of the bath-rooms.

Notes—असंभावनीय-etc.—There are two readings

(i) एतत् असम्भावनीयम्—This is impossible. What is impossible? Vasava's going away after rousing you is impossible. There is no 'न' here.

(ii) एतत् तव वासवदत्तादर्शनम् असंभावनीयम् inconceivable न not, i.e. संभावनीयम् is conceivable. Your seeing Vasava is not inconceivable, i. e. is not impossible. You might have seen her in dream. While narrating story I had made mention of उदकस्नानानि at Ujjayini. You then possibly began to brood over the idea of Vasava and so she was seen by you in dream.

Pandit Shastri has explained this reading differently, एतत् रुमण्वद्वञ्चनम् असम्भाव्यम् न, Rumanvan's deceiving you is not impossible i. e. it is possible that Rumanvan might have deceived you. By काकु it means. 'Is it not impossible that Rumanvan should deceive you? or can it be possible for R. to have deceived you'.

राजा—एवं, मया स्वप्नो दृष्टः।

यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्

अथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे सदा॥ ९॥

King—Is it so? A dream was seen by me!

If it was a dream, then blessed was my nonawakening, or if it be an illusion, let me have such illusion for ever.

अन्वय—यदि तावत् अयम् स्वप्नः (भवेत्) (तर्हि) अप्रतिबोधनम् धन्यम् । अथ अयम् विभ्रमः वा स्यात्, (तर्हि) विभ्रमः मे चिरम् हि अस्तु ।

व्याख्या—यदि तावत् अयम् वासवदत्ता दर्शनम् स्वप्नः, न तु यथार्थः भवेत्, तर्हि अप्रतिबोधनम् अजागरणम् । धन्यम् इष्टतमम् काङ्क्षणीयम् । येन स्वप्ने तस्याः समागमसुखम् अनुभवामि । अथ अयम् विभ्रमः मतिभ्रमः वा स्यात् तर्हि मे मम विभ्रमः मनसः भ्रान्तिः चिरम् दीर्घकालपर्यन्तम् अस्तु भवतु । येन तथा सति चिरं वासवदत्तासमागमः स्यात् इति भावः ।

Notes—1. स्वप्नः—स्वप्+नन् (स्वपो नन्) अदादिः परस्मै, स्वपिति, सुष्वाप, अस्वाप्सीत् ।

2. अप्रतिबोधनम्—प्रति+बुध्+णिच्+ल्युट् (भावे), न प्रतिबोधनम् इति (नञ् तत्)

3. धन्यम् - धन+यत्=धन्यःधनं लब्धा इति (धनगणं लब्धा यत्) ; One who is in the habit of getting wealth but the meaning is elevated धन्य means "blessed". The King wants to remain asleep as he will then see his beloved in dream. It will be a blessing not to be roused from sleep.

4. विभ्रमः—Illusion of mind; वि+भ्रम् +घञ्. No वृद्धि in भ्रम् by नोदात्तोपदेशस्य मान्तस्य अनाचमेः । In Shakuntala Act VI King Dusyanta has a similar delusion, स्वप्नो नु माया नु etc. If it is a delusion, King wants it to be long so that he may have a union with his beloved Vasava. In either case (in case of स्वप्न or विभ्रम) he shall long enjoy Vasava's Company.

विदूषकः—भो ! वअस्स ! एदस्सि णअरे अवन्तिसुन्दरी णाम जक्खिणी पडिवसदि । सा तुए दिट्ठा भवे । [भो ! वयस्य ! एतस्मिन् नगरे अवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति । सा त्वया दृष्टा भवेत् ।]

Viduṣaka—Friend, there lives a fairy Avantisundari by name in this city. She might have been seen by you.

Notes—1. नाम—An अव्यय meaning 'by name', or 'namely' यक्षिणी—यक्षस्य स्त्री यक्षी or यक्षिणी Both forms are seen, यक्षिणी ordinarily means a female fiend attendant on Durga or a fairy ; S. Ray derives it यक्षः यक्षं वा अस्ति अस्य इति मत्वर्थीय इनि प्रत्ययः, ततः स्त्रियां ङीप् ! यक्ष means पूजा according to Sayana, यक्ष+इन्+ङीप्= यक्षिणी।

राजा—न नं ;

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम् ।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥ १० ॥

अपि च वयस्य ! पश्य पश्य ;

योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः ।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ॥ ११ ॥

King—No, no. As I woke up at the end of my sleep, I saw the face, with long locks of hair and with eyes shorn ocollyrium, of that lady who still preserved her character. Moreover, my friend, see, see, this arm of mine which was pressed by that flurried alarmed queen, does not give up its joy of horripilation though it felt her touch in sleep.

अन्वय—स्वप्नस्य अन्ते विबुद्धेन मया चारित्रमपि रक्षन्त्याः (वासवदत्तायाः) नेत्रविप्रोषिताञ्जनम् दीर्घालकम् मुखम् दृष्टम् ।

व्याख्या—स्वप्नस्य निद्रायाः, अन्ते अवसाने, विबुद्धेन जागरितेन, मया चारित्रम् स्वशीलं पातिव्रतम् अपि, न केवलं स्वजीवनम् अपि तु स्वचरित्रम् अपि, रक्षन्त्याः पालयन्त्याः वासवदत्तायाः नेत्रविप्रोषिताञ्जनम् नेत्राभ्यां विप्रोषितम् निर्गतम् अञ्जनम् यस्मिन् तथा भूतंदीर्घालकम् लम्बवेणिकम् मुखं वदनम्, दृष्टम् अवलोकितम्। निद्राभंगे सति अहं वासवदत्तायाः मुखं दृष्टवान्, तस्याः नेत्रे विरहवशात् अञ्जनरहिते, कुन्तलाश्च आननोपरि लम्बन्ते स्मः। अतः अहं मन्ये यतः सा न केवलं जीवति एव वरञ्च स्वचरित्रमपि रक्षति। अतः वासवदत्ता एव सा, न तु त्वत्कथिता यक्षिणी इति निश्चयः।

अन्वय—यः अयम् (मम) बाहुः सन्त्रस्तया तया देव्या निपीडितः (सः) स्वप्ने उत्पन्नसंस्पर्शः अपि रोमहर्षम् न मुञ्चति।

व्याख्या—यः अयम् पुरोवर्त्ती मे बाहुः हस्तः, सन्त्रस्तया भीतया तया देव्या राज्ञ्या वासवदत्तया, निपीडितः अगाढंगृहीतः सः बाहुः, स्वप्ने निद्राकाले, उत्पन्नसंस्पर्शः लब्धसम्पर्कः सन् अद्यापि रोमहर्षम् रोमाञ्चं न मुञ्चति त्यजति। अद्यावधि रोमाञ्चितः एव तिष्ठति। निद्रायां तया मम बाहुः धृतः, तेन अद्यापि मे बाहुः रोमाञ्चितः वर्त्तते, अतोऽहं मन्ये वासवदत्ता नूनं जीवति एव, न तु कदापि सा मृता।

Notes—1. विबुद्धेन—Qualifies मया, understood, [वि+बुध्+क्तः (कर्त्तरि) तेन "विशेषणमात्रप्रयोगो विशेष्य प्रतिपत्तौ" Vamana 1-10. When विशेष्य can be understood easily, then the use of विशेष्य only may be sufficient.

2. नेत्र etc.—नेत्राभ्यां विप्रोषितम् (३या or ५मी तत्); नेत्रविप्रोषितम् अञ्जनम् यस्मिन् मुखे तत् मुखम् (ब. व्री.) अनलङ्कृतम् मुखम् मया दृष्टम्।

3. दीर्घालकम्—दीर्घा अलकाः यस्मिन् तत् मुखम् (ब. व्री). A devoted wife does not decorate herself nor does she

dress her hairs during separation from her husband. See Shaityadarpan.

4. चारित्रम् अपि—चरित्रम् एव इति चरित्र+अण् (स्वार्थे) "प्रज्ञादिभ्यश्च इति अण्" (स्वार्थे), कर्मणि २या, obj. of रक्षन्त्याः ।

5. रक्षन्त्याः—रक्ष् + शतृ + स्त्रियां ङीप्=रक्षन्ती, तस्याः (वासवदत्तायाः) understood see, विघुद्देन ।

श्लोक 1. etc. 1 सन्त्रस्तया—Adj. to देव्या, सम्+त्रस्+क्त (कर्त्तरि)+स्त्रियां टाप्+सन्त्रस्ता, तया. While replacing Udayana's hand, Vasava was alarmed or flurried at the thought of being detected. (कोऽपि मां पश्येत्) देव्या—अनुक्ते कर्त्तरि ३या of निपीडितः ।

2. निपीडितः—नि + पीड् + क्त (कर्मणि) Pressed, *seized lightly* अगाढं गृहीतः । शङ्कितो हि अगाढं गृह्णाति । पाणिः बाल्ये पाणेन पीडितः (उ० च० VII 5.) The touch during sleep caused horripilation of the king which was continuing even after sleep. The king shows to Vidusaka his arm still bristling with joy he felt at the touch of his beloved's hand. Compare this tame description of Bhasa, with the grand description of the touch of Sita's hand on Rama in Uttara Ramacharitam Act. III.

3. उत्पन्नसंस्पर्शः—उत्पन्नः संस्पर्शः यस्य स (ब. व्री.) बाहुः सम्+स्पृश्+घञ् ।

4. रोमहर्षम्—रोम्णां हर्षः तम् (षष्ठी तत्) Bristling up of hairs *obj.* of मुंचति । It is one of the eight सात्त्विक भाव of शृंगाररसः ।

5. मुञ्चति—मुच् लट् III. S. तुदा. उभयपदी. मुञ्चति मुमोच अमुञ्चत or मुच्यते, मुमुचे, अमुक्त ।

N. B.—It is due to this beautiful scene of dream. That the drama is named after this "स्वप्नवासवदत्तम्" ।

विदूषकः—मा दाणिं भवं अणत्थं चिन्तिअ । एदु एदु भवं । चउस्सालं पविसामो । [मा इदानीम् भवान् अनर्थम् चिन्तयित्वा । एतु एतु भवान् । चतुःशालं प्रविशावः ।]

Vidusaka—Your Honour should not think of a useless thing. Come, come Your Honour. Let us enter the inner quadrangle.

(प्रविश्य)

(Entering)

काञ्चुकीयः—जयत्वार्यपुत्रः । अस्माकं महाराजो दर्शको भवन्तमाह—एष खलु भवतोऽमात्यो रुमण्वान् महता बलसमुदयेनोपयातः खल्वारुणिमभिघातयितुम् । तथा हस्त्यश्वरथपदातीनि मामकानि विजयाङ्गानि सन्नद्धानि तदुत्तिष्ठतु भवान् । अपि च ।

The Chamberlain—Victory to my lord. Our King Darsaka says to Your Honour. "Here has come Your Honour's war minister Rumanvan with a large army to smash Aruni. Similarly the divisions of our army, elephants, horses, chariots and soldiers, the means of our victory are well arrayed for the battle. So please arise Your Honour. Moreover.

Notes—1. मा इदानीम्—क्त्वा has been used in चिन्तयित्वा in connection with मा which is wrong according to Panini. It is used on the analogy of अलम् of the sutra अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा—where अलम् and खलु are used with क्त्वाप्रत्ययान्त words in the prohibitive sense. There are many such archaisms in Bhasa. This use of मा taking क्त्वा has occurred in this book मा इदानीमन्यत्

चिन्तयित्वा A. III. इला । मा मा भूयोऽवचित्य A. IV. This seems to be a regular idiom of his time.

2. अनर्थम्—It may mean here 'misfortune' or नास्ति अर्थः यस्मिन् तत् इति, what is without purpose; vain, useless.

3. जयतु जयतु—सम्भ्रमे द्विरुक्तिः जयति, जिगाय, अजैषीत्।

4. आर्यपुत्र !—It is a term generally used by the wife for her husband. It means here simply. 'Son of an honourable man, or it is an honourific designation of a prince used by his general. Or it was the etiquette for *the काञ्चुकीय to address the king as such for he was the* husband of his princess स्वराजदारिकायाः भर्ता इति कृत्वा काञ्चुकीयस्य उपचारः।

5. महाराजः—महान् चासौ राजा च इति महाराजन्+टच्, महाराजः by "राजाहः सखिभ्यष्टच्" । महत् becomes महा by "आन्महतः समानाधिकरणजातीययोः" ।

6. अमात्यः--War-minister, समरसचिवः, अमा सह वर्तते इति अमा+त्यप् (अव्ययात् त्यप्); अमा is an अव्यय meaning सह together.

7. बलसमुदयेन—बलानि, forces. तेषां समुदयेन (षष्ठी तत्) अनुक्ते कर्मणि ३या of उपयातः, "accompanied by followed by huge forces."

8. अभिघातयितुम्—अभि+हन्+णिच् (स्वार्थे)+तुमुन् to exterpate; to root out.

9. आरुणि—Kathasaritsagar does mention neither this enemy of Udayana nor the loss of his Vatsa-Kingdom. This incident, being an event of short duration was not probably recorded in बृहत्कथा and so we don't find it in

कथासरित्सागर। This story must have been current in Bhasa's time, so properly utilised by him.

As आरुणि is mentioned here twice, so he seems to be a real and constant foe of Udayana. He had possibly usurped a large portion of Vatsa-kingdom. Kausambi the capital alone being left to Udayana to govern, so the Minister wanted to recover the lost Vatsa-kingdom from the hands of आरुणि, through the Military help of the King of Magadha.

10. हस्त्यश्वरथपदातीनि—Qualifies विजयाङ्गानि। (i) हस्तिनश्च अश्वाश्च रथाश्च तेषां समाहारः हस्त्यश्वरथम् (समाहार-द्वन्द्वः) हस्त्यश्वरथानुगताः पदातयः येषु तानि (ब. व्री.) Here we have a बहुव्रीहि with अनुगत occurring in the middle. Says Mr. G. Shastri, "अनुगतपदान्तर्भावेन बहुव्रीहिः"। (ii) हस्तिनश्च अश्वाश्च रथाश्च पदातयश्च हस्त्यश्वरथपदातयः ते सन्ति येषाम्, तानि हस्त्यश्वरथपदातीनि। Decline हस्त्यश्वरथपदाति like शुचि, in neuter Nominative plural, it is हस्त्यश्वरथ-पदातीनि as it qualifies विजयाङ्गानि a neuter word; पदातिन् meaning having foot, soldiers, or going on foot—a foot soldier also occurs in dictionary. In this case, the words are taken distributively and not collectively and so no समाहारद्वन्द्वसमास। पदातिः=पादाभ्याम् अतति गच्छति इति पद्+आति=पदातिः, पाद् becomes पद् by "पादस्य पदाज्यातिगोपहतेषु"—पाद् is shortened into पद् before आजि, आति, ग and उपहत. How आति? अज्यतिभ्यां पादे च इण्; पद्+अत्+इण्=पदातिः, (masculine). (iii) हस्तिनश्च अश्वाश्च रथाश्च तेषां समाहारः (द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्) हस्त्यश्वरथपदाति, ततः हस्त्यश्वरथपदाति च इति हस्त्यश्वरथ-पदातीनि, एकशेषवृत्त्या। बहुजदजविभक्तयात्, तेषां बहुत्वम्।

So says S. Roy : Many divisions of army consisting *of elephants etc......the means of our victory are* arrayed.

11. मामकानि—मम इदम् इति मामकम् or मामकीनम् or मदीयम् "*तवकममकावेकवचने*" *By this ममक is enjoined* for अस्मद् singular." "अस्मद् (sing.) + अण् = ममक + अण् = मामकम्, अस्मद् + खञ् = ममक + खञ् = मामकीनम्, अस्मद् + छः = मद + छः = मदीयम् ।

12. विजयाङ्गानि—(a) विजयस्य अंगानि = (ष. तत्); means of victory or (b) विजयावहानि अङ्गानि, (मध्यमपदलोपी) ।

13. सन्नद्धानि—Arrayed, well equipped सम् + नह् + क्त (कर्त्तरि); नह् दिवा-उभ. नह्यति or ते ; ननाह or नेहे; अनात्सीत् अनद्ध ।

N.B.—This exciting passage is introduced to rouse the King to action. Read the Ghost-scene in Shakuntala Act VI. "*प्रायः स्वमहिमानं क्षोभात् प्रतिपद्यते हि जनः*"— Act VI. 31.

अपिच—

भिन्नास्ते रिपवो भवद्‌गुणरताः पौराः समाश्वासिताः
पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम् ।
यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव ॥ १२ ॥

Moreover.

Divided are your foes. Well-assured are the citizens devoted to you for your merits. Arrangement has been made for protecting the rear of your army during your military expedition. Whatever is to be done for smashing

your, enemy has been all done by me. Even the river Ganges. (Three-streamed river) has been crossed by your forces. The Vatsa-country is (almost) in your hands.

अन्वयः—ते रिपवः भिन्नाः, भवद्गुणरताः पौराः समाश्वासिताः। भवत्प्रयाणसमये या अपि पार्ष्णी (रक्षणीया) तस्याः विधानम् कृतम्। अरिप्रमाथजननम् यत् यत् साध्यम् तत् तत् मया अनुष्ठितम्। बलैः च त्रिपथगा नदी अपि तीर्णा, वत्साः तव हस्ते (वर्त्तन्ते)।

व्याख्या—हे देव ! ते तव, रिपवः शत्रवः भिन्नाः भेदोपायेन परस्परासंहताः परस्परविभक्ताः कृताः। भवद्गुणरताः भवतः गुणाः दयादाक्षिण्यादिगुणाः, तेषु रताः अनुरक्ताः पौराः नागरिकाः समाश्वासिताः "शीघ्रं वो राजा शत्रुं जेष्यति इति दत्ताश्वासनाः वर्त्तन्ते। भवत्प्रयाणसमये भवतः प्रयाणसमये युद्धयात्राकाले या अपि पार्ष्णी सैन्यपृष्ठं शत्रुभ्यो रक्षणीयम्, तस्याः सैन्यपृष्ठस्य विधानम् व्यवस्था कृतम् सम्पादितम्। अरिप्रमाथजननम् शत्रुविध्वंसकारकम् यत् यत् कर्म साध्यम् करणीयम्, तत् तत् कर्म मया अनुष्ठितम् आचरितम् कृतम् वा। बलैः च भवतः सेनाभिः च त्रिपथगा त्रिमार्गगा गंगानदी अपि तीर्णा लङ्घिता। वत्साः वत्सराज्यम् तव हस्ते स्थिताः एव मन्तव्याः।

सर्वे भवतः शत्रवः ये पूर्वं मिलिताः आसन्, ते अत्रान्तरे अस्माकं भेदनीत्या अधुना असंहताः परस्परं विभक्ताः कृताः। न तेऽधुना पूर्ववत् शक्तिशालिनः। भवतः नागरिकाः च सर्वे भवद्गुणेषु अनुरक्ताः सन्ति। न काऽपि भवतः प्रजासु राजद्रोही शत्रुपक्षपाती वा। सर्वे अधुना आश्वासिताः यत् "शीघ्रं वः नृपः शत्रुं जित्वा आगमिष्यति"। युद्धयात्राकाले सैन्यस्य पृष्ठभागस्य रक्षा कर्त्तव्या, तस्याः अपि उपायः कृतः। शत्रूणां मूलच्छेदनाय यानि यानि कर्माणि अपेक्षणीयानि तानि सर्वाणि कृतानि पूर्वमेव। सेना

च पुरः गत्वा गंगानदीं तीर्णा। अतोऽहं मन्ये तत् अचिरमेव विजयः त्वाम् आलिङ्गिष्यति, शत्रुजयः तव करगतः एव भविष्यति।

Notes—1. भिन्ना—भिद्+क्त (कर्मणि) रुधादि भिनत्ति; बिभेद अभिदत् अभैत्सीत्। By applying "Policy of Divide and Rule." These enemies have been divided among themselves. So they must fall. "United you stand, divided you fall."

2. भवद्गुणरताः—भवतः गुणाः (ष. तत्) तेषु रताः (७मी तत्)—Qualifies पौराः, पुरि भवाः इति पौराः, पुर्+अण्।

3. समाश्वासिताः--सम्+आ+श्वस्+णिच्+क्त (कर्मणि)

N. B.—So it is a very good time for you to attack. Enemies are divided among themselves and your own people are loyal to you.

"स्फीतं यदानुरक्तं च भवेत्प्रकृतिमण्डलम्।
परस्य विपरीतं च तदा विग्रहमाचरेत्" कामन्दकनीतिशास्त्रम् X. 28 and 30.

4. पार्ष्णी—the rear of the army. पार्ष्णिः स्यादुन्मदस्त्रियाम् स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च इति मेदिनीदर्शनात् स्त्रीलिङ्गः। The usual form is पार्ष्णि in feminine. We may have पार्ष्णि+ङीप् by कृदिकारादक्तिनः like श्रेणि or श्रेणी, हानि or हानी, रात्रि or रात्री। By लक्षणावृत्ति the word पार्ष्णी means here पार्ष्णी-रक्षा। Malli in his commentary on Raghu. IV. 26 says. शुद्धपार्ष्णिः उद्धृतपृष्ठशत्रुः or सेनया रक्षितपृष्ठभागः। So पार्ष्णि means "Enemies coming from behind or the rear of the army."

5. तस्या विधानं कृतम्—All protective measures are taken. यथा कामन्दकीयम्—

"पुरश्च पश्चाच्च यदा समर्थस्तदाभियायान्महते फलाय।
पुरः प्रसर्पन्नविशुद्धपृष्ठः प्राप्नोति तीव्रं खलु पार्ष्णिभेदम्"।

An invading king must see that proper arrangements are made to protect his own country from attack by the enemy army in his absence or to protect his own army from being attacked from behind by the army of the enemy.

6. भवत्प्रयाणसमये—भवतः प्रयाणम् इति षष्ठी तत्। तस्य समयः षष्ठी तत्। तस्मिन् अधिकरणे ७मी। प्रयाण—military march or expedition.

7. यत् यत् तत् तत्—वीप्सायां द्विरुक्तिः। "नित्यवीप्सयोः द्वित्वम्"।

8. अरिप्रमाथजननम्—Causing destruction of the enemy. अरेः प्रमाथः (षष्ठी तत्) अरिप्रमाथः, तस्य जननम् उत्पादकम् (षष्ठी तत्), प्र+मथ्+(श्ना)+घञ् =प्रमाथः—churning, crushing, destruction जनयति इति जननम्, जन्+णिच्+ल्युट् (कर्त्तरि in the sense of agent). 'कृत्यल्युटो बहुलम्' बहुलग्रहणात् कर्त्तरि ल्युट्।

9. त्रिपथगा—आकाश-भूमि-पाताल-गामिनी गंगा। The गंगा flows in three streams in three worlds, the sky, the earth and the nether region. The courses in the three worlds are मंदाकिनी, गंगा, and भोगवती respectively (a) त्रयाणाम् पथां समाहारः त्रिपथम् तेन गच्छति इति त्रिपथ+गम+ड+स्त्रियां टाप्। Or (b) त्र्यवयवः पन्थाः इति त्रिपथः। मध्यमपदलोपी समासः; त्रिपथिन्+अः by ऋक्पूरब्धूःपथाम् आनक्षे। त्रिपथेन गच्छति इति। Remember "क्षितौ तारयते मर्त्यान् नागान् तारयतेऽप्यधः, दिवि तारयते देवान् तेन त्रिपथगा स्मृता।" Geographically the three tiny streams मन्दाकिनी, जाह्नवी and अलकनन्दा combine together to form the river गंगा in Himalayan region.

10. वत्साः—वत्सविषयः, वत्सदेशः। वत्स is the name of a

क्षत्रिय जाति । वत्सानां निवासः जनपदः इति वत्साः, वत्स+अण् by "तस्य निवासः"—After that, अण् disappears by जनपदे लुप्—Then वत्साः only remains but in Plural number. The metre is शार्दूलविक्रीडितम् ।

राजा—(उत्थाय) बाढम् । अयमिदानीम्

उपेत्य नागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्मदक्षम् ।
विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि नाशयामि ॥ १३ ॥

(निष्क्रान्ताः सर्वे)

इति पञ्चमोऽङ्कः ।

King—(Rising) Very well. Here now, having met that Aruni, expert in perpetrating atrocious deeds, in the ocean-like battle, crossed by lordly elephants and horses and strewn with the fierce waves of scattered arrows, I will deal him to death.

(Exeunt all.)

End of Act V.

अन्वय—अयम् (अहम्) इदानीम् दारुणकर्मदक्षम् आरुणिम् उपेत्य नागेन्द्रतुरङ्गतीर्णे विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि (तम्) नाशयामि ।

व्याख्या—अयम् एषोऽहम् इदानीम् अधुनैव, दारुणकर्मदक्षम् भीषणकर्मकुशलम् दारुणे कर्मणि दक्षम् क्रूरकर्माणम्, आरुणिम् आरुणिनामकं रिपुम्, उपेत्य अभिगम्य, नागेन्द्रतुरङ्गतीर्णे नागेषु इन्द्राः श्रेष्ठा नागेन्द्राः गजवराः च, तुरङ्गाः अश्वाः च, नागेन्द्रतुरङ्गाः तीर्णाः कृतसंचाराः यस्मिन् सः (बहुव्रो.) तस्मिन्, विकीर्णबाणोग्रतरङ्गभङ्गे, उग्राः तरङ्गाः इति उग्रतरङ्गाः भीषणोर्म्मयः, तेषां भङ्गाः खण्डाः उग्रतरङ्गभङ्गाः, बाणाः शराः उग्रतरङ्गा इव बाणोग्रतरङ्गभङ्गाः, (उपमितकर्मधा०) विकीर्णाः निक्षिप्ताः बाणोग्रतरङ्गभङ्गाः यस्मिन् सः (ब. व्री.) तस्मिन्, महार्णवाभे महान् अर्णवः समुद्रः इति महार्णवः महासमुद्रः तस्य आभा शोभा इव

आभा यस्य सः तस्मिन् महार्णवाभे महासमुद्रतुल्ये युधि संग्रामे नाशयामि हन्मि । शीघ्रमेव हनिष्यामि । उदयनः मृते—अहम् अधुनैव क्रूरकर्माणम् आरुणिम् अभियास्यामि । शीघ्रमेव तं तस्मिन् युद्धे हनिष्यामि । यत्र गजाः अश्वाः च सञ्चरन्ति, भीषणाः बाणाः च प्रक्षिप्ताः । उपमालङ्कार उपेन्द्रवज्रा छन्दः ।

Notes—1. उपेत्य—उप+इ+ल्यप्, going to, or meeting, इति, इयाय, अगात् ।

2. दारुणकर्मदक्षम्—Adj. to आरुणिम्, दारुणानि कर्माणि (कर्मधा०) तेषु दक्षः (७मी तत्), तम् ।

3. नागेन्द्रतुरङ्गतीर्णे—ब. व्री. Qualifying युधि । नागेषु इन्द्राः (श्रेष्ठाः) इति नागेन्द्राः, or नागाः इन्द्राः इव (उपमितस.) or नागानाम् इन्द्राः (राजानः) (षष्ठी तत्) (a) नागेन्द्राश्च तुरङ्गाश्च नागेन्द्रतुरङ्गाः (इतरेतर द्वन्द) or (b) नागेन्द्राणां तुरङ्गाणां च समाहारः नागेन्द्रतुरङ्गम् by "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" ।

नागेन्द्रतुरङ्गैः or नागेन्द्रतुरङ्गेन तीर्णः (३या तत्) तस्मिन् । तॄ+क्तः (कर्मणि) crossed or क्त (आदि कर्मणि) entered all over, overrun with horses and elephants.—कीर्णे also is seen in some editions but it is not proper. (i) Crossed by means of huge elephants and horses (ii) In which move sea-elephants and hippopotamuses.

4. विकीर्णबाणोग्रतरङ्गभङ्गे—ब. व्री. an adjec. qualifying युधि । उग्राः तरङ्गाः इति उग्रतरङ्गाः (कर्मधारयः), तेषाम् भङ्गाः खण्डाः इति उग्रतरङ्गभङ्गाः (षष्ठी तत्) बाणाःउग्रतरङ्गभङ्गाः इव इति बाणोग्रतरङ्गभङ्गाः (उपमितकर्मधारय०) विकीर्णाः बाणोग्रतरङ्गभङ्गाः यस्मिन् सः विकीर्णबाणोग्रतरङ्गभङ्गः (ब. व्री.) तस्मिन्, where the terrible waves of the arrows shot were swelling. The Volleys of arrows shot by different warriors and flying at different heights were resembling the surging waves.

5. महार्णवाभे—Adj. to युधि । महान् अर्णवः महार्णवः (आन्महतः समानाधिकरणजातीययोः) महार्णवस्य आभा इव आभा यस्य सः महार्णवाभः (ब. व्रो.) according to "सप्तम्युपमानपूर्वपदस्य उत्तरपदलोपश्च वक्तव्यः"। The battle-field appeared like a vast ocean.

6. युधि-युध्+ क्विप् = युध्, तस्मिन् । The word युध् is feminine, but Bhasa use it in masculine. "अस्मादेव प्रयोगात् पुंस्यापि द्रष्टव्यः संयत्कुञ्जवत्" इति गणपतिशास्त्री।

7. नाशयामि—नश् + णिच् + लट् मि I shall slay. "वर्त्तमानसामीप्ये वर्त्तमानवद्वा"—वर्त्तमान is used for near future.

N. B.—The battle-field is compared to an ocean. The battle-field is full of elephants and horses. The ocean is full of sea-elephants and hippopotamuses. In the battle-field arrows are flying at different levels, in the ocean, terrible waves are surging at different heights. So the comparison is complete.

अथ षष्ठोऽङ्कः ।

(ततः प्रविशति काञ्चुकीयः।)

(Enter chamberlain)

काञ्चुकीयः—क इह भोः। काञ्चनतोरणद्वारमशून्यं कुरुते।

Hallo! who is here attending at the 'Golden Gate.

(प्रविश्य)

(Entering)

प्रतीहारी—अय्य। अहं विजआ। किं करीअदु। [आर्य! अहं विजया। किं क्रियताम्?]

Portress—Sir, I am Vijaya, what is to be done?

काञ्चुकीयः—भवति! निवेद्यतां निवेद्यतां महाराजाय वत्सराजलाभप्रवृद्धोदयायोदयनाय—एष खलु महासेनस्य सकाशात्

रैभ्यसगोत्रः काञ्चुकीयः प्राप्तः, तत्रभवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च, प्रतिहारमुपस्थिताविति ।

Chamberlain—Lady, inform, please, inform His Majesty King Udayana, whose prosperity has enhanced on account of his recovery of the kingdom of Vatsas—Here has come from Mahasena a chamberlain of Raibhya-Clan and also a nurse of Vasavadatta, Vasundhara by name, sent by the venerable Angarvati, and both are waiting at the gate.

प्रतीहारी—अय्य ! अदेसकालो पडिहारस्स । [आर्य ! अदेशकालः प्रतीहारस्य ।]

Portress—Sir, this is neither the proper time nor proper place for the message.

काञ्चुकीयः—कथमदेशकालो नाम ।

Chamberlain—Why not the proper place or time ?

प्रतीहारी—सुणादु अय्यो । अज्ज भट्टिणो सुय्यामुहप्पासादगदेण केण वि वीणा वादिता । तं च सुणिअ भट्टिणा भणिअं—घोसवदीए सद्दो विअ सुणीअदि त्ति । [शृणोतु आर्यः । अद्य भर्तुः सूर्यामुखप्रासादगतेन केनापि वीणा वादिता । तां च श्रुत्वा भर्त्रा भणितम्—घोषवत्याः शब्दः इव श्रूयते इति ।]

Portress—Please listen to, Sir, today some one, going to the Suryamukha-Palace of our lord, played upon a lute. On hearing this, Sire said,—the sound like that of Ghosavati is heard.

काञ्चुकीयः—ततस्ततः ।

Chamberlain—Then, then ?

प्रतीहारी—तदो तहिं गच्छिअ पुच्छिदो—कुदो इमाए वीणाए आगमो त्ति । तेण भणिदं—अम्हेहिं णम्मदातीरे कुय्यगुम्मलग्गा दिट्ठा । जइ प्पओअणं इमाए, उवणीअदु भट्टिणो त्ति । तं च उवणीदं अङ्के करिअ मोहं गदो भट्टा । तदो मोहप्पच्चागदेण बप्फपप्पाउलेण मुहेण भट्टिणा भणिदं—दिट्ठासि घोसवदि ! साहु ण

दिस्सदि त्ति । अय्य ! ईदिसो अणवसरो । कहं णिवेदमि [ततस्तत्र गत्वा पृष्टः—कुतोऽस्याः वीणायाः आगमः इति । तेन भणितम्—अस्माभिर्नर्मदातीरे कूर्चगुल्मलग्ना दृष्टा । यदि प्रयोजनमनया, उपनीयतां भर्त्रे इति । तां चोपनीतामङ्के कृत्वा मोहं गतो भर्ता । ततो मोहप्रत्यागतेन वाष्पपर्याकुलेन मुखेन भर्त्रा भणितम्—दृष्टासि घोषवति ! सा खलु न दृश्यते इति । आर्य ! ईदृशोऽनवसरः । कथं निवेदयामि ।]

Portress—Then the lord went there and asked—Whence have you got this lute ? He said—" It was found by us on the bank of the river Narmada ; entangled in the clump of the Kusa-grass. If, it is needed, it can be presented to the lord. When it was presented, the lord placed it on his lap and fell into a fainting fit. Then, when he recovered from his swoon, he said, with his face bathed in tears.—" You have been found Ghosavati, but she, indeed, is not found." Sir so inopportune is the time. How shall I inform ?

काञ्चुकीयः—भवति ! निवेद्यताम्'। इदमपि तदाश्रयमेव ।

Chamberlain—Please inform him, lady. This is a also in connection with that.

प्रतीहारी—अय्य ! इअं णिवेदेमि । एसो भट्टा सुय्यामुहप्पासादादो ओदरइ । ता इह एव्व णिवेदिइस्सं । [आर्य ! इयं निवेदयामि । एष भर्ता सूर्यामुखप्रासादात् अवतरति । तत् इह एव निवेदयिष्यामि ।]

Portress—Sir, here I do inform him. The lord is coming down from the Suryamukha-Palace. So I will inform just here.

काञ्चुकीयः—भवति तथा ।

Chamberlain—Let it be so, Madam.

उभौ निष्क्रान्तौ
(Exeunt both)
मिश्रविष्कम्भकः
End of the mixed Prelude.

Notes—1. काञ्चनतोरणद्वारम्—काञ्चनं तोरणं काञ्चनतोरणम् (कर्मधा.) तस्य द्वारम् (षष्ठी तत्)—The door of the "Golden Gate." The gate of the royal palace was probably overlaid with gold plates—So it was called "Golden Gate".

तोरण means the outer gate of the palace.

2. अशून्यं कुरुते—It is idiomatic use. Who is here on duty at this "Golden Gate"; अशून्यं is predicate.

3. प्रतीहारी—(i) प्रति+हृ+घञ्=प्रतिहारः or प्रतीहारः =द्वारम् दीर्घत्वम् by उपसर्गस्य घञि "अमनुष्ये बहुलम्" । "द्वारि द्वाः स्थे प्रतिहारः" इत्यमरः । प्रतीहारः अस्यास्ति इति अर्श आदित्वात् अच् = प्रतीहारः" One who has the door to protect "door keeper" प्रतीहारः + ङीप् = प्रतीहारी गौरादित्वात् ङीप्. A female who has to protect the door i. e. door-keepress. शब्दकल्पद्रुम Quotes प्रतीहारोऽस्या अस्तीति "अच् । अर्श आदित्वात् अच् । अस्य आकृतिगणत्वात्, ततः गौरादित्वात् ङीप् । द्वाःस्थिता इति मेदिनी" ।

(ii) प्रतिहृयते स्वामिसमीपं नीयते संदेशः अनेन इति प्रति +हृ+घञ् (करणे) प्रतिहारः+स्त्रियाम् । प्रतीहारी ।

4. निवेद्यताम्—सम्भ्रमे द्विरुक्तिः । नि+विद्+णिच्+कर्मणि यक्+लोट् ताम् ।

5. महाराजाय—महान् राजा इति महाराजः by राजाहः सखिभ्यष्टच् । महत् becomes महा by आन्महतः etc. सम्प्रदाने ४र्थी । "क्रियया यमभिप्रैति सोऽपि संप्रदानम्" ।

6. वत्सराज्यलाभप्रवृद्धोदयाय—वत्सानां राज्यम् (ष. तत्), तस्य लाभः (ष. तत्), तेन प्रवृद्धः, ३या. तत् वत्सराज्यलाभप्रवृद्धः उदयः यस्य स, (ब. व्री.) तस्मै, qualifying उदयनाय। We read here that Udayana is well-established on his throne by this time. राज्ञः कर्म इति राज्यम्—राजन्+यक्; न is dropped by ये चाभावकर्मणोः। लभ्+घञ्=लाभः, उत्+इण् +अच्=उदयः।

7. रैभ्यसगोत्रः—समानं गोत्रं यस्य स सगोत्रः (ब. व्री.) समान has becomes स by "ज्योतिर्जनपदरात्रिनाभिनाम गोत्र रूप स्थान-वर्ण-वयो वचन बन्धुषु"—षु समानस्य सः स्यात् रैभ्यस्य सगोत्रः (षष्ठी तत्)। रेभस्य गोत्रापत्यं पुमान् इति रैभ्यः =रेभ+यञ् (गर्गादिभ्यो यञ्) रेभ occurs in the गर्गादि group. He seems to be a famous sage of olden time. Who was this रैभ्य whose kinsman the chamberlain claims to be? We know nothing of this रैभ्य। He might be a trusty Kanchuki of king Mahasena when Udayana was at Ujaini, so he introduced himself by mentioning the name of रैभ्य probably well known to Udayana. There is a legend in छान्दोग्योपनिषद् about रैभ्य who appears there as a great ब्रह्मवादी a philosopher. He may be referred to here.

8. *प्रेषिता—प्र+इष्+णिच्+क्त (कर्मणि) + स्त्रियां टाप्* Despatched by अंगारवती the mother of Vasavadatta.

9. अदेशकालः—देशयुक्तः कालः देशकालः (मध्यमपदलोपी) अप्रशस्तः अयोग्यः वा देशकालः इति अदेशकालः (नञ् तत्) नञ् in पर्युदास sense has six meanings.

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता,
अप्राशस्त्यं विरोधश्च नञर्थाः षट्प्रकीर्तिताः।

In these capacities only नञ् can be compounded, but if नञ् has prohibitive force and comes with a क्रिया then it is not usually compounded. If compounded, the अविधेयविमर्शदोष arises. Here नञ् means "अप्राशस्त्य" i.e. not proper. It is not proper time nor place for conveying the message to His Majesty. We find here अविधेयविमर्शदोष—as negative is not kept separate. प्रतीहारः means here by लक्षणावृत्तिः प्रतीहारकर्म, दौत्यं संदेशवाहनम् संदेशनिवेदनम् वा।

10. प्रतीहारमुपस्थितौ—Arrived at the gate. उपस्थितश्च उपस्थिता च इति उपस्थितौ एकशेषवृत्तिः by पुमान् स्त्रिया।

11. सूर्यामुखप्रासादगतेन—The text is very corrupt here Mr. Shastri adopts सुय्यामुहप्पासादगदेण (सूर्यामुखप्रासादगतेन) and explains (i) सूर्यायाः नवोढायाः अर्थात् पद्मावत्याः मुखप्रासादं, प्रासादपुरोभागं गतेन—'देवक्या सूर्यया सार्धं' (भाग. पु. स्क. १० अ. १.) इति श्लोक व्याख्यायां सूर्यया नवोढया इति श्रीधरः। He says that सूर्या means नवोढा newly married as श्रीधर has remarked while explaining the verse 'देवक्या सूर्यया सार्धं' of Bhagavat Purana (सूर्यया नवोढया इति)। (ii) Secondly Mr. Shastri explain it as. "सूर्या विवाहदेवता सा मङ्गलार्थं गजलक्ष्म्यादिदेवतावत् दारुशिलादुत्कीर्णा मुखे यस्य प्रासादस्य स सूर्यामुखप्रासादः तं गतेन" i.e. सूर्या (विवाहदेवता) मुखे यस्य सः सूर्यामुखः (व. व्री.) सूर्यामुखः प्रासादः सूर्यामुखप्रासादः (कर्मधारयः) तम् गतः (२या तत्), तेन।" The palace having the image of सूर्या carved on wood or stone and placed in front of the palace, as is done by the religious minded Hindus by placing the image of लक्ष्मी or गणपति in the front part of their houses. The word सूर्या means विवाहदेवता। He supports

by citing the authority of हरदत्तमिश्र. Says he "एकाग्निकाण्डभाष्ये हि सूर्या यः प्रत्यक्षं विद्यात् एतद् प्रतिगृह्णीयात्" (का० १८-१) इति मंत्रं व्याकुर्वन् हरदत्तमिश्रः सूर्या नाम विवाहदेवता इत्याह ।

(B) Some Mss. read (as says Prof. Devadhar.) सुयामुणप्पासादादो or सुआमुणप्पासादादो which can be rendered into Sanskrit as सुयामुनप्रासादात् ।

11. Then यमुनायाः अयम् इति यामुनः यमुना + अण्, यामुनः प्रासादः यामुनप्रासादः (कर्मधा.) शोभनः यामुनप्रासाद इति सुयामुनप्रासादः (क.धा.) तस्मात्--From the grand palace on the Yamuna. The capital city of कौशाम्बी stands in its ruins on the bank of the Jamuna. Some 25 miles, to the west of modern Allahabad, so the royal palace must be on the bank of that river, facing that river itself.

(C) Some read शय्यामुखप्रासादगतेन—शय्यां प्रतिमुखं यस्य स शय्यामुखः (ब.व्रो.) तादृशःप्रासादः (कर्म.) A palace which faced the bed-chamber (शय्यां शयनगृहम्) of the King.

Of all these, Mr. Shastri's explanations are convincing and hence preferable.

12. घोषवती—घोषः (प्रशस्तः घोषः) अस्याः अस्ति इति घोषवती—Having an enchanting sound. It was a magic-lute given to Udayana by वसुनेमि the brother of वासुकि whom he had saved from a Sabar when yet a boy. See Kathasaritsagar II 1-78-81. Udayana used to charm elephants by playing on this and in the end used to subdue them. Two more gifts were given to him (1) the art of weaving an unfading garland, (2) the art of

decorating forehead with paint-mark that never faded. Probably Udayana had taught all these three arts of his to his wife Vasava, who plays nicely on lute, weaves garland and puts unfading mark on Padma's forehead. We read about the last in कथासरित् घोषवती was given by Udayana to Vasava. After Vasava's death, the lute also had mysteriously disappeared. Now it has appeared again. The King recognises the sound of this lyer and fondly remembers his sweet beloved.

13. अनया प्रयोजनम्—अनया वीणया (करणे ३या) अनया प्रयोजनं साध्यते—where साध्यते is understood. अनया takes करणे ३या by "क्वचित्गम्यमानापिक्रिया कारकविभक्तौ प्रयोजिका" Mark गम्यमानाक्रिया—(an understood—Verb)

14. मोहं गतः—Fainted, fell into a swoon. Memories of Vasava were aroused in the king's mind on seeing the lute and so he fainted.

15. कुब्जगुल्मलग्ना—कुब्जानाम् दर्माणां गुल्माः (ष. तत्) तेषु लग्ना (७मी तत्), Variant कुचगुल्मलग्ना । प्रमात् लेखकः धकारं ब्यकारं लिखितवान् "There is similarity of these two conjunct syllables in Keral language", opines Mr. Shastri.

16. मोहप्रत्यागतेन—मोहात् प्रत्यागतः (५मी तत्) तेन quali. भर्त्रा

17. बाष्पपर्याकुलेन—Quali. मुखेन, बाष्पैः पर्याकुलं परिव्याप्तम् इति (३या तत्) There is variant reading बष्फष्पय्याउलोच्छूणमुहेण—बाष्पपर्याकुलोच्छूनमुखेन the बाष्पपर्याकुलं च उच्छून च (कर्मधा.)—तादृशं मुखं, तेन ।

N. B.—मिश्रविष्कम्भकः—Is a short Prelude, stating the connection of minor events, past and future.

वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः
संक्षिप्तार्थस्तु विष्कम्भः आदावङ्कस्य दर्शितः ॥
मध्यमेन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः
शुद्धः स्यात् स तु संकीर्णो नीचमध्यमगोचरः ।

(सा. द.)

विष्कम्भः is of two kinds, शुद्ध and संकीर्ण। It is शुद्ध when acted by one or two actors of middle rank and संकीर्ण when both मध्यम and नीच actors play their parts. Here कंचुकी is a मध्यमपात्र a character of middle rank, and प्रतीहारी is a नीचपात्र a character of low order. The language, therefore is mixed, Sans. and Prakrit and not pure Sans. प्रवेशक differs from विष्कम्भक in language and position, otherwise they are alike.

(ततः प्रविशति राजा विदूषकश्च)

Then enter the king and Vidusaka.

राजा—

श्रुतिसुखनिनदे ! कथं नु देव्याः
स्तनयुगले जघनस्थले च सुप्ता ।
विहगगणरजोविकीर्णदण्डा
प्रतिभयमध्युषिता स्यरण्यवासम् ॥ १ ॥

King—O lute ! whose sound is *gratifying to the ear* ! Having reposed on the pair of breasts and on the lips of my beloved queen, how could you take up your residence in a dreadful forest with your body all covered with the excrete or dungs of birds ?

अन्वयः—हे श्रुतिसुखनिनदे ! देव्याः स्तनयुगले जघनस्थले च सुप्ता (त्वम् अधुना) कथम् नु विहगगणरजोविकीर्णदण्डा (सती) प्रतिभयम् अरण्यवासम् अध्युषिता असि ।

व्याख्या—हे श्रुतिसुखनिनदे ! कर्णानन्दकरनादे वीणे ! पुरा देव्याः वासवदत्तायाः, स्तनयुगले कुचयुगे, जघनस्थले श्रोणि—पुरोभागे च, सुप्ता सुखस्थिता, सती कथम् नु केन प्रकारेण, विहगगणरजोविकीर्णदण्डा पक्षिवृन्दमलव्याप्तप्रवाला प्रतिभयम् भयङ्करम् अरण्यवासम् वनालयम् वनवासम् वा, अध्युषिता असि अवात्सीः। हे कर्णमधुरे वीणे ! पूर्वं त्वम् वादनश्रमनिद्रावसरे मम प्रियायाः वासवदत्तायाः कुचकमलोपरि जघनस्थले च सुखस्थिता विश्रामसुखमनुभूतवती। अधुना त्वं किमर्थम् भीषणे वनालये अवात्सीः, तव प्रवालश्च (दण्डश्च) पक्षिगणस्य मलेन आच्छादितः अस्ति। अहो ईदृशम् परिवर्त्तनं त्वयि घटितम्। पुष्पिताग्रावृत्तम्।

Notes.—1. श्रुतिसुखनिनदे !—श्रुत्यै सुखः pleasing to hear, or श्रुतिभ्यां सुखः pleasing to ears, (४र्थी तत्) by "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" श्रुतिसुखः निनदः यस्याः सा श्रुतिसुखनिनदा, (ब. व्री.) तत्सम्बोधने। श्रु+क्तिन् (करणे) =श्रुतिः, नि+नद्+अप्=निनदः, पक्षे घञ्, निनादः by नौ गद् नद् पठ स्वनः।

2. स्तनयुगले—स्तनयोः युगलम् (ष. तत्) तस्मिन्, अधिकरणे ७मी।

जघनस्थले—प्रशस्तं जघनं इति जघनस्थलम्, स्थल being a प्रशंसावचन word of मतल्लिका group; "प्रशंसावचनैश्च"—regulates the पूर्वनिपात of जघन। Or जघनस्य स्थलम् स्थानम्, (ष. तत्) तस्मिन्।

3. विहगगणरजोविकीर्णदण्डा—विहगानां गणः (ष. तत्) तस्य रजः मलः (ष. तत्) तेन विकीर्णः, (३या तत्), विहगगणरजोविकीर्णः दण्डः प्रवालः यस्याः सा (ब. व्री.)

विहग=विहायसा आकाशेन गच्छति इति विहायस्+गम्+ड=विहगः 'विहायसो विह इति वाच्यम्'—changes विहायस् into विह ; विहायस्+गम्+खच्=विहङ्गमः, or विहङ्गः (खच्

डित्वा वक्तव्यः)। दण्ड is the neck of the Indian lute known as प्रवाल—in our संगीतशास्त्रम्।

N. B.—The word रजस् has been wrongly translated by many as dust (raised dy the birds) रजस् means here विट्, excretion, dung.

4. (a) प्रतिभयम्—Qual. अरण्यवासम्। प्रतिगतम् भयम् इति प्रतिभयम् (प्रादितत्पु०)=fearful, "वनं प्रतिभयाकारं" सावित्र्युपाख्याने "वनं प्रतिभयं शून्यम्" नलोपाख्याने in Mahabharat.

(b) Some take it as an adverb meaning "fearfully" modifying अध्युषितासि dwelt fearfully in the forest.

(c) Prof. Bhide reads अप्रतिभयम् and explains as "fearlessly" अविद्यमानं प्रतिभयं यस्य, तत् यथा स्यात् तथा: making it क्रियाविशेषणे २या—used as an adverb here. *But this reading is not suitable and correct.*

Mark the contrast in the state of the lute, "Once you took repose on the lap of the queen, and now you are dwelling in a fearful forest" thus the king addresses the Vina.

5. अरण्यवासम्—अरण्ये वासः इति (७मी तत्) or अरण्यरूपः वासः आलयः इति (मध्यमपदलो०) or अरण्यम् एव वासः इति "मयूरव्यंसकादित्वात् समासः" न च रूपकरूपः इति शेखरे नागेशः अरण्यवासः, तम्—obj. of अध्युषिता—by उपान्वध्याङ्वसः। वास—means here house, abode. निकाय्य वासावसथनिकाय्यनिलयालयाः इति यादवः। प्रतिभयं qual अरण्यवासम् *the house in form of forest or residence in the forest and not* अरण्य alone.

N. B.—Our king Dusyanta also rebukes the recovered ring similarly "अये ! इदं तावत् असुलभस्थानभ्रंशि शोच

नीयम् ! तव सुचरितमगुंनोय" etc. As for the contrast of the two different states we have a fine verse in किरात can. I. "पुराधिरूढं शयनं" etc.

अपि च, अस्निग्धासि घोषवति ! या तपस्विन्याः न स्मरसि,

श्रोणीसमुद्वहनपार्श्वनिपीडितानि
खेदस्तनान्तरसुखान्युपगूहितानि ।
उद्दिश्य मां च विरहे परिदेवतानि
वाद्यान्तरेषु कथितानि च सस्मितानि ॥ २ ॥

More over, you are very heartless, O Ghosavati ! as you donot remember of that poor lady.

You donot remember her carrying you on her hips, her pressing you with her sides, her pleasantly embracing you (sweetly) between her breasts during fatigue, her wailings about me during separation (from me), and her smiling chattings during the intervals of music.

अन्वयः—(तस्याः) श्रोणीसमुद्वहन पार्श्वनिपीडितानि खेद-स्तनान्तरसुखानि उपगूहितानि, विरहे माम् च उद्दिश्य परिदेवतानि वाद्यान्तरेषु सस्मितानि कथितानि च (न त्वम् स्मरसि)

व्याख्या—श्रोणीसमुद्वहनपार्श्वनिपीडितानि श्रोण्या कटिभागेन वादनकाले समुद्वहनानि च पार्श्वेन निजपक्षेण, निजपार्श्वभागेन निपीडितानि मर्दनानि च कटिभागवहनानि च स्वपार्श्वमर्दनानि च, खेदस्तनान्तरसुखानि खेदेषु संगीतश्रमेषु सत्सु स्तनयोरन्तरे मध्यभागे कुचान्तराले खेदस्तनान्तरे सुखानि सुखदानि उपगूहितानि आलिङ्ग-नानि, विरहे वियोगे मत्तः वियोगकाले माम् उद्दिश्य लक्ष्यीकृत्य, परिदेवतानि विलापान्, वाद्यान्तरेषु वाद्यानाम् संगीतानाम् अन्तरेषु विरामेषु, सस्मितानि हास्ययुक्तानि, कथितानि भाषणानि तस्याः वासवदत्तायाः किं त्वं न स्मरसि। वसन्ततिलकं वृत्तम्। घोषवति ! नूनं त्वम् अकरुणा असि, यतः त्वम् तपस्विन्याः वासवदत्तायाः

किञ्चिदपि न स्मरसि। सा वादनकाले श्रोणीभागे त्वाम् आरोप्य स्वपार्श्वभागेन निपीडितवती, वादनश्रमावसरेषु विश्रमार्थं स्वकुचकलशयोः मध्यदेशे त्वां संस्थाप्य दृढमालिङ्गितवती च। मत्तः विरहिता सा करुणं विलपिता, यदा वाद्यानाम् विरामाः अभवन् तदा सा मया सह सहासं भाषितवती। इत्येतानि सर्वाणि तस्याः ललितकर्माणि न त्वं स्मरसि, अहो दुर्भाग्यम्!

Notes.—1. अस्निग्धा—न स्निग्धा इति नञ् तत्। स्निह+क्त (कर्तरि) स्निग्ध or स्नीढ स्निह् दिवा. पर. स्निह्यति सिष्णेह अस्निहत्।

2. तपस्विन्याः—शेषे षष्ठी—connected with नीपिडितानि, उपगूहितानि, परिदेवितानि कथितानि—or षष्ठी by "अधीगर्थदयेशां कर्मणि षष्ठी"—on account of स्मरसि।

3. श्रोणी etc.—श्रोण्या कटिप्रदेशेन समुद्वहनानि (३या तत्) like (कन्धेन भारंवहति। or श्रोण्यां समुद्वहनानि इति (७मी तत्) पार्श्वेन निजपार्श्वभागेन निपीडितानि मर्दनानि इति (३या तत्) श्रोणीसमुद्वहनानि च पार्श्वनिपीडितानि च इति द्वन्द्वः (कर्मणि २या) कर्म of स्मरसि. During playing on lyre in sitting or standing posture; the तम्बूरा portion is placed on the right thigh or by the side of the right hip and the प्रवाल i.e., the neck-portion rests on the left shoulder, the middle of the neck-portion is pressed by the right side and the right arm.

4. खेद etc.—स्तनयोः अन्तरम् (ष. तत्) स्तनमध्यभागः, तस्मिन् सुखानि सुखकराणि; खेदेषु or खेदे स्तनान्तरसुखानि इति (७मी तत्) "सुखदुखःतक्रियायाम् णिच्" allows णिच् to सुख and दुःख, so सुख in णिच् सुखयति; सुख+णिच्+कर्तरि अच्=सुखः (सुखदः) खेदे should be better reading in symmetry with विरहे in the next line.

5. उपगूहितानि—उप+गुह्+क्त (नपुंसके भावे क्तः) कर्म of स्मरसि; भ्वा. उ. गूहति जुगोह, अगुहीत् etc.

6. विरहे—यस्य च भावेन भावलक्षणम्; भावे ७मी।

7. परिदेवितानि—परि+देव्+क्त (नपुंसके भावे क्तः); कर्म of स्मरसि। देव् भ्वा. आ. परिदेवते He laments.

8. वाद्यान्तरेषु—वाद्यानाम् अन्तरेषु इति (षष्ठी तत्); अधिकरणे ७मी। अन्तरेषु=at intervals. Or अन्यानि वाद्यानि वाद्यान्तराणि (मयूरव्यंसकादित्वात् नित्यस.) during the intervals of musical notes.

9. सस्मितानि—स्मितेन सह वर्त्तमानानि यानि तानि (तुल्य-योगे ब. व्री.) Qual. कथितानि। स्मिङ्+क्त (भावे) = स्मितम्।

10. कथितानि—कर्मणि २या; कर्म of स्मरसि।

विदूषकः—अलं दाणिं भवं अदिमत्तं सन्तप्पिअ। [अलम् इदानीं भवान् अतिमात्रं संतप्य।]

Vidu—Away with your excessive grieving now. (or may Your Honour not grieve now much).

राजा—वयस्य! मामैवम्,

चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः।
तां तु देवीं न पश्यामि यस्या घोषवती प्रिया ॥ ३ ॥

वसन्तक! शिल्पिजनसकाशात्प्रयोगां घोषवतीं कृत्वा शीघ्र-मानय।

King—Friend, no, not so.

My passion that was lying dormant for long, has been awakened by the lute, I do not see that goddess whose beloved was this lute Ghosavati.

Basantaka, get this Ghosavoti repaired by some artisan and bring it soon.

विदूषकः—जं भवं आणवेदि। [यद् भवान् आज्ञापयति।] (वीणां गृहीत्वा निष्क्रान्तः।)

Vidu—As commands Your Honour.

अन्वय—चिरप्रसुप्तः मे कामः वीणया प्रतिबोधितः। यस्याः घोषवती प्रिया (आसीत्) ताम् देवीम् तु न पश्यामि।

व्याख्या—चिरप्रसुप्तः चिरं बहुकालं प्रसुप्तः शयितः हृदि निलीय स्थितः, मे कामः अनुरागः, वीणया वासवदत्तायाः प्रियया घोषवत्या, प्रतिबोधितः जागरितः उत्तेजितः वा, यस्याः वासवदत्तायाः, घोषवती वीणा प्रिया दयिता, आसीत् तां देवीं राज्ञीं वा न पश्यामि। वासवदत्तामरणोपरान्तं मम कामः हृदि निलीय स्थितः, न कदापि प्रकाशितः, परन्तु अद्य इयं वीणा मे अनुरागं जागरितवती। परन्तु अहो मे दुर्भाग्यम्! इयं वीणा तु लब्धा परन्तु अस्याः स्वामिनी मया अद्यापि न दृश्यते। अनुष्टुभ वृत्तम्।

Notes—1. अलं सन्तप्य—"अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" अनेन अलंयोगे क्त्वाप्रयोगः। सम्+तप्+ल्यप् in place of क्त्वा by "समासेऽनञ् पूर्वे क्त्वो ल्यप्"। अतिक्रान्तं मात्राम् इति अतिमात्रम् (प्रादितत्) by अत्यादयः क्रान्त्याद्यर्थे द्वितीया।

2. चिरप्रसुप्तः—चिरं प्रसुप्तः (२या तत्), प्र+स्वप्+क्त (कर्त्तरि) Qual. कामः। My love lay dormant in my heart in Vasava's absence कम् + घञ् = कामः। कामयते, चकमे कामयाञ्चक्रे, अचीकमत or अचकमत।

3. प्रिया—प्री+क+स्त्रियां टाप्। इगुपधज्ञाप्रीकिरः कः।

4. प्रतिबोधितः—प्रति+बुध्+णिच्+क्त (कर्मणि)।

5. शिल्पिजनसकाशात्—शिल्पी चासौ जनश्च इति शिल्पिजनः (कर्मधा.) तस्य सकाशम् (ष. तत्) तस्मात् अपादाने ५मी।

6. नवयोगाम्—नवः योगः यस्याः सा ताम् (ब० व्री०) योग =construction, repairs; addition.

प्रविश्य

(Entering)

प्रतीहारी—जेदु भट्टा। एसो खु महासेणस्स सकासादो

रेभसगोत्तो कञ्चुईओ देवीए अंगारवदीए पेसिदा अय्या वसुन्धरा णाम वासवदत्ताधत्ती अ पडिहारं उवट्ठिदा। [जयतु भर्त्ता। एष खलु महासेनस्य सकाशात् रैभ्यसगोत्रः काञ्चुकीयो देव्या अंगारवत्या प्रेषिता आर्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतिहारम् उपस्थितौ।]

Portress—Victory to my lord! Here has come a chamberlain of the Raibhya family from Mahasena along with Vasundhara, a nurse of Vasavadatta, despatched by queen Angarvati They have arrived at the gate.

राजा—तेन हि पद्मावती तावद्, आहूयताम्।

King—Then, let Padmavati be first called.

प्रतीहारी—जं भट्टा आणवेदि। [यत् भर्त्ता आज्ञापयति।]

(निष्क्रान्ता)

Portress—As commands Sire.

(Exit)

राजा—किं नु खलु शीघ्रमिदानीमयं वृत्तान्तो महासेनेन विदितः।

King—How is it possible that this news has been so soon known by Mahasena?

Notes—1. उपस्थितौ—Two nominatives, काञ्चुकीयः and वसुन्धरा, उपस्थितः च उपस्थिता च, उपस्थितौ, एकशेषवृत्तिः by "पुमान् स्त्रिया" शिष्यते। प्रतीहारः=द्वारदेशः।

2. तेन—हेतौ ३या। तेन हेतुना इत्यर्थः।

3. विदित—विद्+क्त+(कर्मणि) Its अनुक्त कर्त्ता is महासेनेन. Note विद् has the following senses and are conjugated differently, सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे, विन्दते विन्दति लाभे श्यन्-लुक्-श्नम्-शेष्विदं क्रमात्" (1) विद् दिवा to exist विद्यते (2) अदा to know (as here)

वेत्ति (3) to think, to ponder वद्यादि (4) to get भ्यादि उभयपदी।

In a simpler way—

वेत्ति वेद विदो ज्ञाने, विन्ते विदो विचारणे,
विद्यते विदः सत्तायां, लाभे विन्दति विन्दते।

(ततः प्रविशति पद्मावती प्रतिहारी च)

(Then enter Padmavati and the portress)

प्रतीहारी—एदु एदु भट्टिदारिआ। [एतु एतु भर्तृदारिका।]

Portress—Come, Princes, come.

पद्मावती—जेदु अय्यउत्तो। [जयतु आर्यपुत्रः।]

Padma—Victory to my lord.

राजा—पद्मावति ! किं श्रुतं महासेनस्य सकाशात् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तः, तत्रभवत्या चाङ्गारवत्या प्रेषिताऽऽर्या वसुन्धरा नाम वासवदत्ताधात्री च, प्रतिहारमुपस्थिताविति।

King—Padmavati, have you heard that a chamberlain of Raibhya-clan, has come from Mahasena, and also Vasundhara, Vasavadatta's nurse sent by Her Majesty Angarvati, and that they are waiting at the gate ?

पद्मावती—अय्यउत्त ! पिअं मे आदिकुलस्स कुसल-वुत्तन्तं सोदुं। [आर्यपुत्र ! प्रियं मे ज्ञातिकुलस्य कुशलवृत्तान्तं श्रोतुम्।]

Padma—My lord, it is pleasant to me to hear the news of the well-being of the family of my Kinsmen.

राजा—अनुरूपमेतद्भवत्याभिहितं—वासवदत्तास्वजनो मे स्वजनः इति। पद्मावति ! आस्यताम्, किमिदानीं नास्यते ?

King—It is befittingly said by your ladyship—Vasavadatta's relatives are my own relatives. Padmavati, please take your seat, why do you not sit down ?

पद्मावती—अय्यउत्त ! किं मए सह उपविट्ठो एदं जणं पेक्खिस्सदि। [आर्यपुत्र ! किं मया सह उपविष्टः एतं जनं प्रेक्षिष्यते।]

Padma—My lord, will you see this man, seated alone with me?

राजा—कोऽत्र दोषः ?

King—What harm in it ?

पद्मावती—अय्यउत्तस्स अवरो परिग्गहो त्ति उदासीणं विअ होदि। [आर्यपुत्रस्य अपरः परिग्रहः इति उदासीनम् इव भवति।]

Padma—I am the second wife of my lord, so it looks something awkward or indifferent (to the feelings of others).

राजा—कलत्रदर्शनार्हं जनं कलत्रदर्शनात् परिहरतीति बहुदोषमुत्पादयति। तस्मादास्यताम्।

King—To deprive a man of seeing one's wife, though he deserves to see her, begets many evils. Therefore please sit down.

पद्मावती—जं अय्यउत्तो आणवेदि। (उपविश्य) अय्यउत्त ! तादो वा अम्बा वा किं णु खु भणिस्सदि त्ति आविग्गा विअ संवुत्ता। [यद् आर्यपुत्रः आज्ञापयति। आर्यपुत्र ! तातो वा अम्बा वा किं नु खलु भणिष्यति इति आविग्ना इव संवृत्ता।]

Padma—As commands my lord, (Sitting down). My lord, I feel anxious as to what my father or mother will say.

Notes—1. प्रियं मे—One more instance of the nobility of Padma's mind and utter absence of Jealousy on her part, (a) प्रियं means इष्टं—So समानकर्तृकेषु तुमुन् applies as कर्ता of इष्टं (प्रियं) and श्रोतुं is the same ; "इच्छार्थेषु एककर्तृकेषु उपपदेषु धातोः तुमुन् स्यात्"। Or (b) श्रोतुं (स्थितस्य) मे प्रियम् अस्ति 'स्थित' पदस्य अध्याहारात् इति शिरोमणिपादाः।

2 ज्ञातिकुलस्य—ज्ञातीनां कुलं (ष. तत्) तस्य, सम्बन्धे षष्ठी। ज्ञा+क्तिच्=ज्ञातिः (mascu.) like मुनिः। No क्तिन्

here,—Padma considers Vasava's ज्ञातिकुल her own ज्ञातिकुल। How noble her character is !

3. कुशलवृत्तान्तम्—कुशलस्य वृत्तान्तः (ष. तत्) कुशलमयः वृत्तान्तः (मध्यमपदलोपी)।

4. अनुरूपम्—(i) रूपस्य योग्यम् इति (योग्यतार्थे अव्ययीभावः) (ii) अनुगतं रूपम् इति (प्रादितत्); अनुरूपं तत् यथा स्यात् तथा—क्रियाविशेषणे २या। Modifies अभिहितम्। You have spoken worthy of you. The king infers from the word ज्ञातिकुलस्य (स्वजनस्य) used by Padma that she regards Vasava's relations as her own.

5. परिग्रहः—परिगृह्यते अयम् इति परि+ग्रह्+अप् परिग्रहः =पत्नी:

6. उदासीन इव—It appears something like indifference on your part to the feelings of messengers, or it looks awkward that you have second wife. The whole sentence आर्य······इति is the nomi. of उदासीनम् इव भवति। The sense is that the messengers seeing you with me, your second wife, may be pained and they might pine for Vasava's absence. There is a variant, न सिलाह णीअं (न श्लाघनीयम्)—It is not laudable.

7. कलत्रदर्शनार्हम्—कलत्रस्य दर्शनम् (ष. तत्.), तस्य अर्हः (ष. तत्.) तम्। कलेन मधुरवचनेन त्रायते इति कलत्रम् भार्या। अर्हति इति अर्हः अर्ह्+अच् (पचादित्वात्)। कलत्रम् is neuter though meaning wife. It is usual with Hindu parents to regard the second wife of his son-in-law as their own daughter and vice-versa. So the relatives of the wife of a man are entitled to see his other wife.

8. बहुदोषम्—बहुः दोषः (कर्मधा.) तम्; कर्म of उत्पादयति।

Because it bespeaks vanity, distrust, disrespect, and want of etiquette on the part of the man and brings scandal to him.

9. कलत्रदर्शनात्—अपादाने पञ्चमी "ध्रुवमपायेऽपादानम्"—परिहरति means वारयति yet the sutra वारणार्थानामीप्सितः does not apply as the कलत्रदर्शन is not the ईप्सित of कर्त्ता "यथाह भाष्यकारः यच्च मनसा सम्प्राप्य निवर्त्तते तच्च ध्रुवमपाये अपादानम् इति प्रसिद्धम्" quoted from Mallinath's commentary on मुनिव्रतात् in Kumar. V. 3.

N. B.—The noble traits in Padma's character are well portrayed here. She is free from jealousy of a co-wife, considers her co-wife's relations as her own and tries to avoid wounding the feelings of the chamberlain and the nurse by absenting herself from the royal interview granted to them.

10. तातः वा अम्बा वा—She accepts Vasava's parents to be her own parents. किं भणिष्यति प्रियम् अप्रियम् वा—She is anxious to hear what they will say whether some pleasant words or unpleasant ones.

राजा—पद्मावति ! एवमेतत् ।

किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता नि च रक्षिता सा ।
भाग्यैश्चलैर्महदवाप्त गुणोपघातः
पुत्रःपितुर्जनितरोप इवास्मि भीतः ॥ ४ ॥

King—Padmavati, so it is.

My heart is apprehensive as to what he will say. His daughter though kidnapped yet was not protected by me. Fickle fortunes having utterly destroyed all my virtues, I am now afraid of him as an offending son is afraid of his offended father.

अन्वय—किम् वक्ष्यति इति मे हृदयम् परिशङ्कितम् । मया (तस्य) सा कन्या अपहृता अपि न च रक्षिता । चलैः भाग्यैः महद्वाप्तगुणोपघातः अहम्, पितुः जनितरोषः पुत्रः इव, भीतः अस्मि ।

व्याख्या—किं वक्ष्यति कं संदेशं प्रेषयिष्यति इति हेतोः मे हृदयम् अन्तःकरणम् परिशङ्कितम् सशङ्कम् अस्ति । यतः तस्य सा कन्या वासवदत्ता, मया अपहृता अपनीता, अपि च न रक्षिता पालिता अकालमृत्योः न त्राता । यतः सा अग्निदग्धा । चलैः चञ्चलैः भाग्यैः अदृष्टैः, महद्वाप्तगुणोपघातः, महत् अतिशयम् अवाप्तः प्राप्तः गुणोपघातः सदाचारादिगुणनाशः येन सः अतिभ्रष्टसदाचारः, पितुः जनकात् जनितरोषः उत्पादितक्रोधः, पुत्रः तनयः इव भीतः त्रस्तः अस्मि । प्रिये ! तातो वा अम्बा वा कीदृशं संदेशं प्रियमप्रियं वा प्रेषितवान् इति विचिन्त्य मे हृदयं चिन्ताकुलम् अस्ति । तस्य विश्वासभाजनमपि अहं तस्य कन्यां वासवदत्तां बलात् अपहृतवान् परन्तु तां अकालमरणात् न रक्षितवान् । अयुक्तमपि तस्याः अपहरणम् सम्यक्पालने कृते कथमपि क्षमणीयम् आसीत् । नहि अत्र मयापराद्धम् । दुर्दैवविलासात् अहमधुना नष्टगुणः सन् तस्मात् तथा भीतोऽस्मि यथा कश्चित् अपराधी पुत्रः स्वकोपितजनकात् भीतः भवति । वसन्ततिलकं वृत्तम् । उपमालङ्कारः ।

Note.—1. वक्ष्यति—ब्रू or वच्+लट् स्यति । Mark the conjugations of these roots.

2. परिशङ्कितम्—परि+शङ्क+क्त (कर्त्तरि) भ्वा. आ. शंकते, शशङ्के अशङ्किष्ट ।

3. कन्या etc.—(a) महासेनकन्या—मया अपहृता अपि च सा न रक्षिता or (b) अपि can be construed with मया कन्या मया अपि अपहृता, च न रक्षिता His daughter was carried away even by me, who was trusted and loved by him so much. 'च' means here "but" or yet. For

this sense of च remember "शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य" ।

4. चलैः—Adjective to भाग्यैः; भाग्यैः has हेतौ३या

5. (i) महद्दवाप्तगुणोपघातः—Fickle fortunes having greatly blighted my merits, Adj. to अहम् । गुणानाम् उपघातः विनाशः इति गुणोपघातः destruction of merits. महत् (यथा स्यात् तथा) अवाप्तः greatly secured (सुप्सुपा) महद्दवाप्तः गुणोपघातः येन सः I, whose merits have been *greatly destroyed by my fickle fortunes.* i.e. I, with all my virtues utterly destroyed by fickle fortunes, am now afraid of him etc.

(ii) महद् etc. has got one more interpretation महति पूजार्हे गुरुजने विषये अवाप्तः इति महद्दवाप्तः गुणोपघातः सदाचारभङ्गः येन सः, *who has violated good manners* towards his elders. The king thinks that it was owing to his fickle fate that he had shown discourtesy to his elders and had run away with their daughter.

चलति इति इति चलः, चल्+अच् (पचादित्वात्); उपे+हन्+घञ्=उपघातः ।

6. जनितरोष—Qual. पुत्रः, जनितः रोषः येन सः (ब. व्री.) जनितः जन्+णिच्+क्त (कर्मणि), रुष्+घञ्=रोषः ।

पुन्नामनरकात् त्रायते इति पुत्+त्रै+कः=पुत्रः ।

7. पितुः—अपादाने पञ्चमी by भीत्रार्थानां भयहेतुः । पा+तृच्=पितृ ।

8. भीत—भी+क्त (कर्त्तरि) बिभेति, विभीतः बिभ्यति etc.

N. B.—In पितुः जनितरोषः, रोष really is connected with पितुः and so the compound should have been पितुः रोषः पितृरोषः, then जनितः पितृरोषः येन सः "जनितपितृरोषः"— But not so here, by the dictum "सापेक्षत्वेऽपि गमकत्वात्

समासः" which says that though the words inter-connected in sense (सापेक्षत्वेऽपि) should have been compounded together ; still some one is kept outside the compound and a समास is allowed with other words as the sense is clear (गमकत्वात् समास) ।

पद्मावती—ण किं सक्कं रक्खिदुं पत्तकाले । [न किं शक्यं रक्षितुं प्राप्तकाले ।]

Padma—Nothing, indeed, can be saved when its time (of destruction) has arrived.

प्रतीहारी—एसो कञ्चुईओ धत्ती अ पडिहारं उवट्ठिदा ।
[एष काञ्चुकीयो धात्री च प्रतिहारम् उपस्थितौ ।]

Portress—Here are the chamberlain and the nurse waiting at the gate.

राजा—शीघ्रं प्रवेश्यताम् ।

King—Let them be introduced at once.

प्रतीहारी—जं भट्टा आणवेदि । (निष्क्रान्ता) [यद् भर्ता आज्ञापयति ।]

Portress—As commands Your lordship.

Notes—1. शक्यम्—शकिसहोश्च यत्, शक्+यत् ।

2. प्राप्तकाले—भावे ७मी, प्राप्तः पूर्णः कालः इति प्राप्तकालः (कर्मधा.) तस्मिन् प्राप्तकाले सति पूर्णकाले सति । Or कालं प्राप्तः इति प्राप्तकालः तस्मिन् भावे ७मी । प्राप्त goes first by "प्राप्तापन्ने च द्वितीयया" ।

3. प्रवेश्यताम्—प्र + विश + णिच् + कर्मणि लोट् ताम् । काञ्चुकीयः प्रवेश्यताम् ।

(ततः प्रविशति काञ्चुकीयो धात्री प्रतिहारी च)

(Then enter the chamberlain, the nurse and the portress)

काञ्चुकीय—भोः !

सम्बन्धिराज्यमेत्य महान् प्रहर्षः
स्मृत्वा नृपसुतानिधनं विषादः ।
किं नाम दैव ! भवता न कृतं स्याद्
राज्यं परैरपहृतं कुशलं च देव्याः ॥ ५ ॥

Chamberlain—Oh ! Great is my joy on coming to the kingdom ot our relation, but I feel much grieved when I remember the death of our princess. O Fate ! what possibly would not have been done by you ; had the kingdom, snatched by the enemies, been regained, and had there been the well-being of the queen ?

अन्वय—इदम् सम्बन्धिराज्यम् एत्य (मम) महान् प्रहर्षः भवति, पुनः नृपसुतानिधनम् स्मृत्वा विषादः भवति । दैव ! यदि परैः अपहृतम् राज्यम् (लब्धम्) स्यात् देव्याः कुशलम् च स्यात् (तर्हि) भवता किम् न कृतम् स्यात् ।

व्याख्या—इदम् सम्बन्धिनः अन्योः उदयनस्य, राज्यम् वत्सदेशम्, एत्य आगत्य, मम महान् सातिशयः प्रहर्षः आनन्दः, भवति इति शेषः, पुनः भूयः, नृपसुतानिधनम् नृपस्य प्रद्योतस्य सुता तनया, तस्याः निधनं मरणम्, स्मृत्वा मनसि कृत्वा, विषादः दुःखम् प्रादुर्भवति । हे दैव ! हे भागधेय ! हे नियते !, यदि परैः शत्रुभिः अपहृतम् बलात् गृहीतम्, राज्यम् वत्सदेशः, स्यात् पुनर्लब्धं स्यात्, देव्याः वासवदत्तायाः च कुशलं क्षेमं स्यात्, तर्हि भवता त्वया, किं न कृतम् अनुष्ठितं सम्पादितं स्यात् भवेत् । तर्हि सर्वम् नो हितम् आचरितम् स्यात् ।

सरलार्थः—स्वनृपस्य जामातुः राज्यमागत्य अहम् अत्यानन्दमनुभवामि परन्तु तस्य दुहितुः मरणं स्मृत्वा विषादमपि प्राप्नोमि । हे दैव ! शत्रुहृतम् राज्यं तु त्वया उदयनाय प्रत्यर्पितम्, परन्तु तेन राज्येन सह यदि वासवदत्ता अपि रक्षिता प्रत्यर्पिता स्यात् तर्हि

सर्वमेव हितं प्रद्योतोदयनयोः भवता आचरितं स्यात्। अधुना तु। असमग्रमेव मंगलं त्वया संपादितम्। वसन्ततिलकं वृत्तम्।

Notes.—1. सम्बन्धिराज्यम्—सम्बन्धिनः राज्यम् इति (ष. तत्), कर्म of प्राप्य; सम्+बन्ध्+घञ् = सम्बन्धः, सम्बन्ध + अस्यास्ति इति इनिः=सम्बन्धिन् like गुणिन्। राज्ञः कर्म इति राज्यम्=राजन्+यक्; न is not dropped by ये चाभावकर्मणोः। आ+इण्+ल्यप्—Why क्त्वा in प्राप्य? समान कर्तृकयोः पूर्वकाले क्त्वा *says that* क्त्वा *can be used in the previous verb* when the कर्ता of that previous verb and the finite verb is the same. And (a) Shastri says "इह अयनहर्षयोः स्मृतिविषादयोः समानकर्तृकत्वात् उभयत्र क्त्वाप्रत्यययोरुपपत्तिः" In this *sentence* प्राप्य विषादः भवति, कर्ता *of* प्राप्य *is* " अहम् *and* कर्ता of भवति is विषादः and so समानकर्तृता is not to be found here then why क्त्वा? (b) The best solution is to supply 'स्थितस्य as प्राप्य स्थितस्य मे प्रहर्षः, *similarly* स्मृत्वा स्थितस्य मे विषादः' अत्राहुः शिरोमणिपादाः "स्नात्वा सुखं भवति, पापं कृत्वानुतापः" इत्यादौ स्थितस्येति पदाध्याहारात् एककर्तृकता सम्पाद्या इति। The nominative of प्राप्य and स्थितस्य is the same, similarly of स्मृत्वा and स्थितस्य the same (अहं included in मे) *See note on* दुःखं त्यक्तुं *etc. Act IV 6.*

2. नृपसुतानिधनम्—नृपस्य सुता (ष. तत्), तस्याः निधनम् (तत्. तु) कर्मणि २या, कर्म of स्मृत्वा। वि+सद्+घञ्=विषादः।

3. नाम—Possibly सम्भावनायामव्ययम्; mark नाम *प्रकाश्यसंभाव्य क्रोधोपगम-कुत्सने इत्यमरः।*

4. यदि स्यात् etc.—The sense is. "O Fate! you would have rendered all services to us; if the kingdom seized by the enemies, had been restored and if along with its restoration, the queen also would have restored to us safe and sound! You have as yet done only half

the services to us ". (B) There is one more interpretation of this line. O Fate, what possibly had not been done by you if the kingdom would have remained lost to us but the princess would have been restored. But the first meaning is preferable, as the chamberlain wishes for both the recovery of the lost kingdom and the restoration of the princess.

4. स्यात्—अस्+विधिलिङ् यात् लिङ् comes here by इच्छार्थेषुलिङ्लोटौ काञ्चुकीय wishes "May providence do these two things simultaneously."

5. देव्याः—षष्ठी in connection with कुशलम् ।

प्रतीहारी—एसो भट्टा, उवसप्पदु अय्यो । [एष भर्त्ता, उपसर्पतु आर्यः ।]

Portress—Here is the lord, you may approach, Sir.

काञ्चुकीयः—(उपेत्य) जयत्वार्यपुत्रः ।

Chamber—(Advancing) Victory to the noble lord.

धात्री—जेदु भट्टा । [जयतु भर्त्ता ।]

Nurse—Victory to the lord.

राजा (सबहुमानम्) आर्य !

पृथिव्यां राजवंश्यानामुदयास्तमयप्रभुः ।
अपि राजा स कुशली मया कांक्षितबान्धवः ॥ ६ ॥

King—(With great respect).

Sir, is it all well with the king, whose relationship I coveted, and who is capable of bringing about the rise and fall of the descendants of the royal families of the world ?

अन्वय—अपि स राजा, कुशली ? (यः) पृथिव्याम् राजवंश्यानाम् उदयास्तमयप्रभुः, (यः) मया कांक्षितबान्धवः ।

व्याख्या—अपि स राजा कुशली, अपि तस्य नृपस्य कुशलं वर्त्तते, यः महासेनः पृथिव्याम् धरणीतले, राजवंश्यानाम् राज्ञां वंश्याः वंशोद्भवाः, तेषाम् उदयः उत्कर्षः, अस्त मयः विनाशश्च तयोः प्रभुः तत्करणसमर्थः उदयप्रलयकरणसमर्थः, यः मया काङ्क्षितः चासौ बान्धवः च इति कांक्षितबान्धवः अथवा कांक्षितं बान्धवं बन्धुत्वं यस्य सः अभिलषितसंबन्धः यः अवन्तिराजः पृथिव्यां स्थितानां सर्वेषां राजवंशीयानाम् उदयं प्रलयं च कर्त्तुं समर्थः मया च येन सह सम्बन्धः काङ्क्षितः किं तस्य राज्ञः कुशलं वर्त्तते।— अनुष्टुभ् वृत्तम्।

Notes.—1. आर्यपुत्र—आर्यपुत्रेति भर्तृदारिकेतिपक्तदेशोचितः नृपं प्रत्युपचारः काञ्चुकीयस्य। Or it does not mean husband here but mere lord.

2. राजवंश्यानाम्—वंशे भवाः इति वंश + यत्=वंश्या, वंशोद्भवाः, दिगादिभ्यः यत्, राज्ञां वंश्याः राजवंश्याः, (ष. त.) तेषाम्। वामन derives राजवंश्य from राजवंश by adding यत् in the sense of साधु; राजवंशे साधुः इति राजवंश+यत= राजवंश्य। "राजवंश्यादयः साध्वर्थे यति भवन्ति" Vam. 2, 52. यत् according to दिगादिभ्यः यत् can be added to वंश but not to any compound ending in वंश, and so the necessity for Vaman's dictum.

3. उदयास्त—Qual. राजा। उत् + इण् + अच् = उदयः अस्तम्+इण्+अच्=अस्तमयः, उदयश्च अस्तमयश्च उदयास्तमयौ, (द्वन्द) तयोः प्रभुः (ष. तत्), प्र+भू+डु=प्रभु। Similar thought occurs—उदयास्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः। Raghu. IX 9.

Pradyota was really a powerful king, so powerful that even King Bimbisar of Magadha, had fortified Rajagriha for fear of his invasion. According to Majjhima

Nikaya, even Ajatashatru, the father of Darsaka and Padmavati, had refortified Rajagriha for fear of Pradyota's invasion.

4. कुशली—कुशल+इनिः=कुशलिन् like गुणिन् । अपि has the force of interrogation and as such must be used in the beginning of a sentence, अपि स राजा कुशली, अपि तपो वर्द्धते ! (Shak. I.) "गर्हासमुच्चय-प्रश्न-शंकासंभावनासु अपि" इत्यमरः ।

5. कांक्षितबान्धवः—Qual. राजा । बन्धोः भावः इति बान्धवम् बन्धुता (relationship, friendship); काङ्क्षित= काङ्क्ष+क्त (कर्मणि); (i) काङ्क्षितं बान्धवं येन इति; by whom relationship was desired (with me मया सह) काङ्क्षितं बान्धवं यस्य इति; whose relationship was desired by me (मया) All this is said in praise of प्रद्योत ।

(ii) काङ्क्षितश्चासौ बान्धवश्च (कर्मधा०) who was desired by me to be my kinsman; बान्धवम् in the sense of kinship is rarely seen.

काञ्चुकीयः—अथकिम् । कुशली महासेनः । इहापि सर्वगतं कुशलं पृच्छति ।

Chamberlain—O yes, Mahasena is all right. He asks the well-being of every thing here.

राजा—(आसनादुत्थाय) किमाज्ञापयति महासेनः ?

King—(Rising from his seat) What does Mehasena Command ?

काञ्चुकीयः—सदृशमेतत् वैदेहीपुत्रस्य । ननु आसनस्थेनैव भवता श्रोतव्यो महासेनस्य संदेशः ।

Chamber—This is worthy of the son of Vaidehi, Your Honour should hear Mahasena's message, seated on your seat.

राजा—यथाज्ञापयति महासेनः । (उपविशति)

King—As commands Mahasena (through you). (Sits down).

काञ्चुकीयः—दिष्ट्या परैरपहृतं राज्यं पुनः प्रत्यानीतम्। कुतः,

कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते ॥ ७ ॥

Chamberlain—Luckily you have recovered the kingdom, wrested away by the enemies. For, enthusiam does not spring up in (the hearts of) the timid or the weak. Enthusiasts, alone, generally enjoy royal fortune

अन्वय—ये कातराः, अपि वा अशक्ताः, तेषु उत्साहः न जायते। प्रायेण हि सोत्साहैः एव नरेन्द्रश्रीः भुज्यते।

व्याख्या—ये नृपाः कातराः भीरवः अधीराः, अपि वा अथवा, अशक्ताः दुर्बलाः वा तेषु कातरेषु अशक्तेषु नृपेषु उत्साहः साहसम् अध्यवसायः, उद्यमः वा न जायते उत्पद्यते। हि प्रायेण प्रायशः सोत्साहैः उत्साहयुक्तैः नरैः, नरेन्द्रश्रीः राजलक्ष्मीः, भुज्यते उपभुज्यते अनुभूयते। सरलार्थः—हे राजन्! भवान् स्वयत्नेन एव नष्टराज्यं पुनः प्राप्तवान्, अनेन भवतः उत्साहः एव प्रकटीभवति। ये भीरवः, ये च दुर्बलाः नृपाः, ते कदापि उत्साहिनः न भवन्ति उत्साहेन विना कथं तेषु वीररसस्य संचारः संभवेत्। ते सर्वदा दैन्योपहताः वीर्यविहीनाः सन्तः शत्रुभिः तिरस्क्रियन्ते। उत्साहिनः पुरुषाः खलु राजलक्ष्मीम् उपभुञ्जते। अप्रस्तुतप्रशंसालङ्कारः, अर्थान्तरन्यासोऽपि च। अनुष्टुम् वृत्तम्।

Notes—1. सर्वगतम्—Qual. कुशलम् (२या तत्); all embracing; pertaining to everything.

2. वैदेहीपुत्रस्य—षष्ठी by तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्; पक्षे तृतीया अपि भवेत्। वैदेह्याः पुत्रः (षष्ठी तत्)। वैदेही a princess of विदेह country (modern Mithila) was the mother of उदयन. The culture of Mithila was then

famous in India and so the chamberlain praises Udayana for his rising up from his seat; saying it befits his (Udayan's) maternal race (i) विदेहानाम् क्षत्रियविशेषाणां राजा इति विदेह+अञ्=वैदेहः (तस्यराजनि अपत्यवत्) वैदेहस्य कन्या इति वैदेह+ङीप्=वैदेही; (पुंयोगात् आख्यायाम्) We should not persist that this rule allows ङीप् to denote only "wife of". It denotes 'daughter' also कैकयी, दैवकी, मैथिली, वैदेही etc. are explained thus. "स चेह दम्पतिभावः एव इति न आग्रहः, किन्तु जन्यजनकभावोऽपि गृह्यते" तत्त्वबोधिनी।

(ii) विदेहस्य अपत्यं पुमान् विदेह+इञ् (अतः इञ्)=वैदेहिः like द्रौणि दाशरथि etc., then वैदेहि+ङीप् स्त्रियाम्=वैदेही। We do not know who this princess of Mithila was. This reference to Udayana's mother's name shows that she must be very famous in her time. Bhasa has peculiar hobby of mentioning one's mother's name. गान्धारीमातः कौसल्यामातः, याद्वीपुत्रः (Panch.).

3. आसनस्थेन—आसने तिष्ठति इति आसन+स्था+कः; तेन (सुपिस्थः कः)। आस्यते अस्मिन् इति आस्+ल्युट्। Q. भवता।

4. दिष्ट्या—Luckily, अव्ययम् or दिष्टि=luck; तया हेतौ इया। "तृतीयान्तप्रतिरूपकमव्ययमेतत्"।

5. उत्साहः—उत्+सह्+घञ् Zeal, enthusiasm.

6. नरेन्द्रश्रीः—नराणाम् इन्द्रः (राजा)=नरेन्द्रः तस्य श्रीः लक्ष्मीः उक्ते कर्मणि प्रथमा। इदि+रक्=इन्द्+रक् इन्द्रः।

7. सोत्साहैः—उत्साहेन सह वर्तमानाः इति सोत्साहाः (तेनसहेति तुल्ययोगे ब. व्री.) तैः qual. नरै (understood) or it stands itself for a substantive. विशेषणमात्रप्रयोगः विशेष्यप्रतिपत्तौ इति वामनः।

Mr. Shastri says that nominative of श्रुत्वा and स्वता (स्नेह) is the same and so—समानकर्तृकयोः पूर्वकाले क्त्वा applies. But I should like to supply here स्थितस्य, as "निधनं श्रुत्वा स्थितस्य तस्य मयि स्वता" See notes on Act VI. 5.

5. उचितान्—Qual. वत्सान्; legitimate; rightful which rightfully belonged to me. उच् समवाये दिवा परस्मै; उच्यति, उवोच, औचत्। उच् + क्त (कर्मणि); वत्सान्=वत्सराज्यम्।

6. (i) प्राप्तुम् आसीत्—तुमुन् comes in connection with अस्ति (Understood) by "शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्"। Read the sentence उचितान् वत्सान् प्राप्तुम् यत् आसीत् when यत् is the nomi. of आसीत्।

(ii) Supply अशक्यम् or उपकारकम् अभूत् after यत्, say उचितान् वत्सान् प्राप्तुम् यत् अशक्यम् यत् उपकारकम् अभूत् etc.

7. ननु—अव्ययम्; Surely certainly, प्रश्नावधारणानुज्ञानुनयामंत्रणे ननु। Here अवधारणा. हि=अव्ययम्; "एव" हि हेतावधारणे।

8. कारणम्—विधेय of नृपः, नृपः कारणम् अस्ति। अजहल्लिङ्गम् एतत्। "उद्देशे च विधेये च विभक्तिः सदृशीभवेत्। क्वचित्तु न जायते तत्र वैषम्यं लिङ्ग संख्ययोः"।

N. B.—"ननु यदुचितं वत्सान् प्राप्तुम्" This reading might have been wrongly written by the scribe as उचितान्। In that case प्राप्तुम् यत् उचितम् अस्ति पर्याप्तम् अस्ति; then तुमुन् by "पर्याप्तिवचनेषु अलमर्थेषु"।

काञ्चुकीयः—एष महासेनस्य संदेशः। देव्याः संदेशमिहात्रभवती कथयिष्यति।

Chamberlain—This is the message of Mahasena. This noble lady will deliver the message of the queen.

राजा—हा अम्ब !

पोडशान्तःपुरज्येष्ठा पुण्यानगरदेवता ।
मम प्रवासदुःखार्ता माता कुशलिनी ननु ? ॥ ६ ॥

King—Alas ! mother !

Is my mother all well, the seniormost of the sixteen queens, the holy goddess of the (whole) town, and who is aggrieved at my departure from the city ?

अन्वयं—ननु षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता मम प्रवास-दुःखार्ता माता कुशलिनी ?

व्याख्या—ननु (प्रश्ने अव्ययम्) किम्, षोडशसु षोडशसंख्यकेषु, अन्तःपुरेषु अवरोधस्त्रीषु राजपत्नीषु, ज्येष्ठा श्रेष्ठा प्रधानभूता, पुण्या पावनचरित्रा, नगरदेवता नगरवासिभिः देवता इव मान्या, मम प्रवासदुःखार्ता प्रवासः उज्जयिनीतः प्रस्थानम् देशान्तरवासः तस्य दुःखम् कष्टम् तेन आर्ता पीडिता इति परदेशवासकष्टपीडिता, माता श्वश्रूः प्रधानपत्नी देवी अङ्गारवती कुशलिनी क्षेमवती अस्ति ? राजा सादरं कथयति "अपि मे श्वश्रूः अवन्तिराजपत्नी सकुशला वर्त्तते ? सा तु अन्तःपुरेषु षोडशसंख्यकानां राजमहिषीनां मध्ये श्रेष्ठा, स्वदयादाक्षिण्यादि गुणहेतोः सर्वैः नागरिकैः देवता इव पूज्यते ! सा न केवलं स्वदुहितृप्रणाशेन दुःखिनी परन्तु मम प्रवासदुःखेनापि दुःखिनी अस्ति !" अनुष्टुभ् वृत्तम् ।

Notes—अम्ब !—अम्बा in संबुद्धौ; अम्बा, अक्का, अल्ला, become अम्ब, अक्क, अल्ल, in संबोधन । "अम्बार्थनद्योर्ह्रस्वः" Udayana addresses his mother-in-law as mother.

2. (i) षोडशान्तःपुरज्येष्ठा—षोडशसंख्यकानि अन्तःपुराणि (भोग्यस्त्रियः) इति शाकपार्थिवादित्वात् समासः, षोडशान्तःपुराणि, तेषु ज्येष्ठा (७मी तत्) न " निर्धारणे षष्ठी सप्तमीतु समस्यते ।"

समाननियमम् अनुवर्त्तन्ते । ते यथाकालम् जायन्ते, यथाकालम् म्रियन्ते च कालोल्लंघनं न कदापि कुर्वन्ति यथा वृक्षाः समये आगते रोहन्ति काले प्रसरन्ति शुष्यन्ति म्रियन्तेच तथैव लोकाः अपि यथाकाले जायन्ते यथाकाले म्रियन्ते च । पूर्वार्धे दृष्टान्तः अलङ्कारः उत्तरार्धे तु उपमा, शालिनी वृत्तम् ।

Notes.—1. अरोगा—Adj. to भट्टिनी; अविद्यमानः रोगः यस्याः सा अरोगा or अविद्यमानरोगः ; "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" रुज्यते अनेन पीड्यते अनेन इति रोगः, रुज्+घञ् (करणे); रुज् तुदा पर-रुजति, अरोज अरुजत् ।

2. मा...सन्तप्तुम्—"इह माङि तुमुन् न पाणिनीयः" इति ग. प. शास्त्री The use of मा or माङ् with तुमुन् is against Panini. मा seems to be used exactly like अलं of "अलमुपहतासु स्त्रीषुद्विपु स्वमार्जवम् उपनिक्षेप्तुम्" प्रतिमानाटकम् I. Some commentators read सन्तप्य, which shows that मा is used in the sense of अलम् according to अलं खल्वौ: etc. Cf. sutra मेदानीमनर्थे निमन्त्रिता Act V. Bhasa deviates here and there from Panini's rules. Such deviations are wrong according to Panini's school but may be correct according to older grammarians (now lost to us), or it is an आर्ष-प्रयोग ।

3 धारयतु—आत्मानं धारयतु, समाश्वसितु ।

4. मृत्युकाले—मृत्योः कालः (षष्ठी तत्), कालाधिकरणे ७मी or भावे ७मी मृत्युकाले आगते सति इति भावः ।

5. रज्जुच्छेदे—रज्ज्वाः छेदः (षष्ठी तत्) गुणभङ्गः, तस्मिन् भावे ७मी रज्जु+छेदे=रज्जुच्छेदे, च is come by the सन्धि rule "छे च" छिद्+घञ् (भावे)= छेदः ।

6. तुल्यधर्मः—तुल्यः धर्मः यस्य स तुल्यधर्मः तुल्यधर्मा is better. According to "धर्मात् अनिच् केवलात्"—अनिच्

should have come here, but not so here. For the समासान्त affixes are not compulsory. "समासान्तविधेरनित्यत्वात्—इति मल्लिनाथः भट्टिटीकायाम् (1. 24.)

7. वनानां तुल्यधर्मः—धर्म is connected with वन and so compounding should have been तुल्यवनधर्मः by first compounding वनानां धर्मः, but not so here by the great dictum. सापेक्षत्वेऽपि गमकत्वात् समासः। वनानाम् takes षष्ठी by तुल्यशब्दयोगे by तुल्यार्थैरतुलो etc.

8. काले काले—वीप्सायां द्विरुक्तिः कालाधिकरणे ७मी।

9. छिद्यते—छिद् लट् ते (कर्मकर्तरिवाच्यम्) Reflexive Passive like ओदनः पच्यते, काष्ठं भिद्यते।

10. रुह्यते—रुह् लट् ते (कर्मकर्तरिवाच्य) as छिद्यते। or it is used irregularly for रोहति । compare "जातस्य ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च" गीता Chap. II.

राजा—आर्य ! मा मैवं—

महासेनस्य दुहिता शिष्या देवी च मे प्रिया
कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि ॥ ११ ॥

King—Sir, do not say so.

Mahasena's daughter was my favourite disciple and beloved queen.—How can she not be remembered by me even in my next births ?

अन्वय—महासेनस्य दुहिता मे शिष्या, प्रिया देवी च आसीत्। कथम् देहान्तरेषु अपि सा मया स्मर्तुम् न शक्या ?

व्याख्या—महासेनस्य प्रद्योतस्य दुहिता तनया वासवदत्ता मे शिष्या छात्रा, प्रिया प्राणवल्लभा देवी महिषी च आसीत् कथम् केन हेतुना, देहान्तरेषु अपि जन्मान्तरेषु अन्येषु जन्मसु अपि सा मया स्मर्तुम् अनुध्यातुम् न शक्या योग्या ? अपितु स्मर्तुं शक्या एव। जन्मजन्मान्तरेषु अपि अहं प्राणवल्लभां वासवदत्तां विस्मर्तुं न शक्नोमि। अनुष्टुभ् वृत्तम्। परिकरालङ्कारः। साभिप्रायविशेषणत्वात् परिकरालङ्कारो मतः।

Notes—1. शिष्या—शास् + क्यप् + स्त्रियां टाप्; प्री+क +टाप्=प्रिया। दिव्यति इति दिव्+अच् (पचादित्वात्) = देवः, देवस्य स्त्री-देव+ ङीप् (पुंयोगात् आख्यायाम्)=देवी।

2. देहान्तरेषु—अन्ये देहाः, देहान्तराणि (मयूरव्यंसकादित्वात् नित्यसमासः तेषु । अस्वपदविग्रहोऽविग्रहो वानित्यसमासः (i) Here नित्यसमास is of अस्वपद विग्रह class । देहान्तराणि is expounded with the help of अन्ये a foreign word, not found in the compound itself. (ii) अविग्रहा नित्यसमासः can not be expounded as कृष्णसर्पः खट्वारूढः । If these are expounded, as कृष्णश्चासौ सर्पश्च, खट्वाम् आरूढः इति then the meanings will be 'black serpent and a bed-ridden man' and not a poisonous cobra, and a ruffian respectively. So the original sense is lost in expounding.

N. B.—In this verse महासेनस्य दुहिता, शिष्या देवी च मे प्रिया all these epithets have been used with a purpose of making her fit to be remembered by all means. So the figure of speech is परिकर see व्याख्या।

धात्री—आह भट्टिणी—उवरदा वासवदत्ता। मम वा महासेणस्स वा जादिसा गोवालअपालआ, तादिसो एव्व तुमं पुढमं एव्व अभिप्पेदो जामादुअत्ति। एदणिमित्तं उज्जइणिं आणीदो। अणग्गिसक्खिअं वीणाववदेसेण दिण्णा। अत्तणो चवलदाए अणिव्वुत्तविवाहमङ्गलो एव्व गदो। अह्म पुणो दे तव अ वासवदत्ताए अ पडिकिदिं चित्तफलआए आलिहिअ विवाहो णिव्वुत्तो। एसा चित्तफलआ तव सआसं पेसिदा। एदं पेक्खिअ [illegible] होदि। [आह भट्टिनी—उपरता वासवदत्ता। मम वा [illegible]नस्य वा यादृशौ गोपालकपालकौ, तादृश एव त्वं प्रथम[illegible] जामातेति। एतन्निमित्तमुज्जयिनीमानीतः। अनग्नि-

साक्षिकं वीणाव्यपदेशेन दत्ता । आत्मनश्चपलतयानिर्वृत्तविवाह-मङ्गल एव गतः । अथ च आवाभ्यां तव च वासवदत्तायाः च प्रतिकृतिं चित्रफलकायामालिख्य विवाहो निर्वृत्तः । एषा चित्रफलका तव सकाशं प्रेषिता । एतां दृष्ट्वा निर्वृत्तो भव ।]

Nurse—Says the queen—" Vasavadatta is dead. You are to me as well as to Mahasena, as dear as our Gopalaka and Palaka, being already chosen to be our son-in-law. For this very purpose, you were brought to Ujjayini, she was given to you under the pretext of learning lute-playing without making fire a witness (to this act). Owing to your own fickleness, you fled away without the performance of your auspicious marriage. Thereafter, we got your as well as Vasavadatta's portraits painted on a picture-board and performed your wedding. Here is the picture-plate sent to you, console yourself by looking at it. Be consoled to look at it.

व्याख्या—गोपालपालकौ प्रद्योताङ्गारवत्योः सुतौ । अभिप्रेतः मनसा संकल्पितः वरितः वा । एतन्निमित्तम् जामातृकरणार्थम् । अनग्निसाक्षिकम्-अग्निः साक्षी यस्मिन् तत् अग्निसाक्षिकम्, तन्न । विवाहाग्निं साक्षिणम् अकृत्वा एव । यथाविधि विवाहम् अकृत्वा एव । वीणाव्यपदेशेन वीणावादनशिक्षणमिषेण । आत्मनः चपलतया अधीरतया । विवाहं यावत् अप्रतिपाद्य एव । अथ च युवयोः पलायनोपरान्तम् । प्रतिकृतिं चित्रम् । निर्वृतः आश्वस्तः भव, सान्त्वनां लभस्व ।

1. प्रथमम् एव—Beforehand, before you were brought captive to Ujjayini, Modifies अभिप्रेत । अभि+प्र+इण्+कर्मणि क्तः । Mahasena and his wife Angarvati had resolved to make Udayana their son-in-law. But Udayana, not consenting, due to his pride of high birth in Pandava's family, was brought a captive to Ujjayini where he was treated by the king like his own sons, Gopalaka and

Palaka. Pradyota placed Vasavadatta as his student to learn lute-playing with a view that by close association love would grow between them and then they would be married together. See प्रतिज्ञा० and the Introduction of this book.

2. अनग्निसाक्षिकम्—Adv. (क्रियाविशेषणे २या) अग्निः साक्षी यस्मिन् कर्मणि तत् अग्निसाक्षिकम् ब. व्री. (शेषात् विभाषा कप्); तत् यथा स्यात् तथा अग्निसाक्षिकम् (क्रियाविशेषणे २या), न 'अग्नि साक्षिकम् अनग्निसाक्षिकम् ।' (नञ् तत्) । साक्षात्+इनि=साक्षिन (साक्षात् द्रष्टरि संज्ञायाम्) साक्षिन् साक्षाद्द्रष्टा ।

Without keeping the holy fire at a witness of the marriage. It is an essential part of Hindu marriage that the bride and the bride-groom should take an oath before sacrificial fire never to separate their hands once joined together before god Fire.

Cf. "वधूं द्विजः प्राह तवैष वत्से । वह्निर्विवाहं प्रति कर्मसाक्षी" Kumar. VII 83. "तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयांचकार"—Raghu. VII 20.

3. वीणाव्यपदेशेन—वीणायाः व्यपदेशः छलम् तेन । करणे ३या । वीणा means वीणा शिक्षणम् by लक्षणावृत्ति । under the pretext of, apparently for the purpose of learning lute-playing under you.

4. अनिवृत्तविवाहमङ्गला—विवाहस्यमङ्गलम् (षष्ठी तत्); निवृत्तम् अनिवृत्तम (नञ् तत्), अनिवृत्तम् विवाहमङ्गलम् यस्य सः (ब. व्री.)

5. अथ च—When you had fled away from Ujjayini, then.

6. चित्रफलकायाम्—चित्रस्य फलका इति (ष. त.) तस्याम् । चित्रफलकम् is neuter. From this very use फलका is used in Feminine. Though not proper.

7. विवाहो निर्वृत्तः—We have performed your marriage, of course, your photo-marriage and have given our parental sanction to your marriage. There is a reference to this photo-marriage in प्रतिज्ञायौग. Act IV. महासेनः क्षत्रियधर्मेणोद्दिष्टस्ते दुहितुर्विवाहः । किमिदानीं हर्षकाले संतप्यसे । तच्चित्रफलकस्ययोर्वत्सराजवासवदत्तयोः विवाहोऽनुष्ठीयताम् ।

8. निर्वृत्तो भव—निर्+वृ+क्त (कर्तरि). Be consoled. During separation lovers console themselves by drawing the pictures of the beloved and by looking at them. दुष्यन्त derives consolation in drawing शकुंतला's picture, and यक्ष in उत्मेघ—"त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्."

राजा—अहो अतिस्निग्धमनुरूपं चाभिहितं तत्रभवत्या ।

वाक्यमेतत् प्रियतरं राज्यलाभशतादपि ।

अपराधेष्वपि स्नेहो यदस्मासु न विस्मृतः ॥ १२ ॥

King—" Oh ! Her ladyship has spoken affectionately and befittingly.

These words are dearer to me than the acquisition of a hundred kingdoms. For *affection for us*, the offenders, has not been forgotten.

अन्वय—राज्यलाभशतात् अपि एतत् वाक्यम् प्रियतरम् अस्ति, यत् अपराद्धेषु अपि अस्मासु स्नेहः न विस्मृतः ।

व्याख्या—राज्यलाभशतात् शतसंख्यकराज्यलाभात्, अपि एतत् वाक्यम् वचनम् अङ्गारवतीसंदेशः, प्रियतरम् मनोहरतरम् । यत् यस्मात् अपराद्धेषु अपराधिषु अस्मासु स्नेहः वात्सल्यम् न विस्मृतः परित्यक्तः इति भावः । वयम् अपराधिनः, तथापि सा अस्मासु स्निह्यति अतएव तस्याः संदेशः बहुराज्यलाभात् अपि मे प्रियतरः अस्ति ।

Notes—1. प्रतिस्निग्धम्—क्रियाविशेषणे २या. Affectionately. Modifies अभिहितम्; प्रति+स्निह्+क्त (कर्त्तरि).

2. अनुरूपम्—रूपस्य योग्यम् इति अव्ययी भावः Modifies अभिहितम्. Befittingly. Befitting he high birth and position.

3. राज्यलाभशतात्—राज्यानां लाभाः इति राज्यलाभाः (ष. तत्) तेषाम् शतम् (ष. तत्), राज्यलाभशतम्, तस्मात् (पञ्चमी विभक्ते); राज्ञः कर्म इति राजन्+यक्=राज्यम्;—लभ्+घञ्; शतम्—is used here as a substansive, (संख्यानवृत्ति) and not as an adjective (संख्येयवृत्ति). Cardinal numerals from विंशति upwards, when used as adjectives (संख्येय) must be declined in singular only. But when they are used as substantives (संख्यान) they may be used in any number. द्वे शते शूराणाम् etc.

5. अपराद्धेषु—अप+राध्+क्त (कर्त्तरि); राध्यति राध्नोति वा. qualifies अस्मासु; which takes विषयाधिकरणे ७मी।

पद्मावती—अय्यउत्त ! चित्तगदं गुरुअणं पेक्खिअ अभिवादेदुं इच्छामि। [आर्यपुत्र ! चित्रगतं गुरुजनं प्रेक्ष्य अभिवादयितुम् इच्छामि।]

Padmavati—My lord, seeing my elder drawn in picture, I wish to bow down.

धात्री—पेक्खदु पेक्खदु भट्टिदारिआ। [प्रेक्षतां प्रेक्षतां भर्तृदारिका] (चित्रफलकां दर्शयति)

Nurse—Behold, behold, O Princess, (shows her the picture-board).

पद्मावती—(दृष्ट्वा आत्मगतम्) हं अदिसदिसी खु इयं अय्याए आवन्तिआए। (प्रकाशम्) अय्यउत्त ! सदिसी खु इयं अय्याए। [हम्, अतिसदृशी खलु इयम् आर्यायाः आवन्तिकायाः। आर्यपुत्र ! सदृशी खलु इयम् आर्यायाः ?]

Padma—(Seeing, to herself) Hum,—This closely resembles the venerable Avantikā. (Aloud). My lord, is it just like the revered lady ?

राजा—न सदृशी। सैवेति मन्ये। भोः कष्टम्।

अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम्।
इदं च मुखमाधुर्य्यं कथं दूषितमग्निना ॥ १३ ॥

King—Not only like her, it is she herself, I think. Oh ! Alas !

How could such terrible calamity befall such a charming appearance ? How could this sweetness of her face be defiled by fire ?

अन्वय—अस्य स्निग्धस्य वर्णस्य कथम् दारुणा विपत्तिः ? कथम् इदम् मुखमाधुर्यम् च अग्निना दूषितम् ?

व्याख्या—अस्य पुरोवर्त्तिनः, स्निग्धस्य नयनप्रीतिकरस्य, वर्णस्य रूपस्य, कथम् केन कारणेन, दारुणा अतिकठिना, विपत्तिः आपत् अग्निदाहविपत्, अभूत् इत्यर्थः। कथम् इदम् मुखमाधुर्यम् वदन-सौन्दर्यम् च, अग्निना वह्निना दूषितम् कलुषितम् नष्टम् कृतम्। अहो दैवदुर्विपाकः, ईदृशस्य सुन्दररूपस्य कथम् ईदृशी दारुणा विपत् ? ईदृशम् मधुरम् वदनम् कथम् अग्निना दग्धम् ?—अनुष्टुभ् वृत्तम्।

Notes—1. अभिवादयितुम् इच्छामि—Mark the noble trait in Padma's character. She wishes to salute the picture of her elder sister. How noble ! Yet how devoid of jealousy.

2. अवन्तिकायाः—सदृशी-योगे षष्ठी by तुल्यार्थैरतुलो.

3. हम्—An adverb-expressing surprise.

4. स्निग्धस्य वर्णस्य—स्निग्ध means 'oily' greasy hence charming, attractive. वर्ण=complexion, appearance.

पद्मावती—अय्यउत्तस्स पडिकिदिं पेक्खिअ जाणामि इअं

अय्याए सदिसी ण वेत्ति। [आर्यपुत्रस्य प्रतिकृतिं प्रेक्ष्य जानामि इयम् आर्यायाः सदृशी न वेति।]

Padma—On seeing my husband's portrait, I shall know whether this is like the revered lady or not.

धात्री—पेक्खदु पेक्खदु भट्टिदारिआ। [प्रेक्षतां प्रेक्षतां भर्तृदारिका।]

Nurse—Behold, Princess, behold.

पद्मावती—(दृष्ट्वा) अय्यउत्तस्स पडिकिदीए सरिसदाए जाणामि इयं अय्याए सदिसी त्ति। [आर्यपुत्रस्य प्रतिकृत्याः सदृशतया जानामि इयम् आर्यायाः सदृशी इति ॥]

Padma—(Seeing) From the exact resemblance of my husband's portrait, I know that this resembles the noble lady. (Vasava).

राजा—देवि ! चित्रदर्शनात् प्रभृति प्रहृष्टोद्विग्नामिव त्वां पश्यामि। किमिदम् !

King—Dear queen, since you have seen the picture I find you as if greatly delighted and agitated. What is this ?

पद्मावती—अय्यउत्त ! इमाए पडिकिदीए सदिसी इह एव्व पडिवसदि। [आर्यपुत्र ! अस्याः प्रतिकृत्याः सदृशी इह एव प्रतिवसति।]

Padma—My lord, one exactly resembling this likeness lives just here.

राजा—किं वासवदत्तायाः ?

King—What ? resembling Vasavadatta's portrait ?

पद्मावती—आम [आम्।]

Padma—O yes.

राजा—तेन हि शीघ्रमानीयताम्।

King—Then, bring her quickly here.

पद्मावती—अय्यउत्त ! कण्णाभावे केणावि बह्मणेण मम भइणि-
अत्ति णासो णिक्खित्तो। पोसिदभत्तुआ परपुरुसदंसणं परिहरदि।
ता अय्यं मए सह आअदं पेक्खिअ जाणादु अय्यउत्तो। [आर्यपुत्र !
मम कन्याभावे केनापि ब्राह्मणेन मम भगिनिका इति न्यासो
निक्षिप्तः। प्रोषितभर्तृका परपुरुषदर्शनं परिहरति। तद् आर्यां
मया सह आगतां प्रेक्ष्य जानातु आर्यपुत्रः।]

Padma—My lord, during my maidenhood, a certain Brahman, deposited her with me saying "She is my sister." Her husband living abroad, she shuns the sight of other men. Therefore let my husband recognise the noble lady on seeing her come along with me.

Notes—1. आर्यपुत्रस्य—Padma seems to be an experienced girl. She is very clever and wants to make herself doubly assured. If then King's portrait tallies with his appearance. Vasava's also shall surely resemble her.

2. प्रहृष्टोद्विग्ना—Delighted and agitated She is overjoyed to think that Vasava is alive and upset as to what is the real fact. Why she was there? Is she really Vasava or not etc. प्र+हृष्+क्त (कर्त्तरि); उद्+विज्+क्त (कर्त्तरि); आदौ प्रहृष्टा पश्चात् उद्विग्ना (कर्मधा.) by पूर्वकालैक सर्वजरत् etc.

3. आर्यपुत्रप्रतिकृतिसदृशतया—आर्यपुत्रस्य प्रतिकृतिः, (ष. तत्) तस्या सदृशता, (ष. तत्) तया। हेतौ ३या। If your picture resembles you, then Vasav's also shall resemble her.

4. चित्रदर्शनात् प्रभृति—प्रभृतियोगे ५मी। "कार्तिक्याः प्रभृति इति भाष्यप्रयोगात् प्रभृत्यर्थयोगे पञ्चमी ज्ञेया इति" भट्टोजिदीक्षितपादाः।

5. प्रोषितभर्तृका—प्रोषितः भर्त्ता यस्याः सा प्रोषितभर्तृका क comes by "नद्यृतश्च कप्"। A woman whose husband has gone

abroad. Avantika does not see the face of any other male during the absence of her husband. So she won't come to you. However I am going to her; see her from a distance and recognise her to be Avantika on seeing her accompanying me. There is variant here. "आर्या प्रेक्षतां सदृशी न वा" Let this lady (nurse) see if she is like Vasava or not.

यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति ।
परस्परगता लोके दृश्यते रूपतुल्यता ॥ १४ ॥

King—If she is a Brahman's sister, then she is clearly a different woman; for similarity of appearance, resembling each other, is seen in the world.

अन्वय—यदि (सा) विप्रस्य भगिनी, (तर्हि) व्यक्तम् (सा) अन्या भवेत्, लोके परस्परगता रूपतुल्यता दृश्यते ।

व्याख्या—सा त्वया वर्णिता नारी, विप्रस्य ब्राह्मणस्य, भगिनी स्वसा, तर्हि यदि व्यक्तम् स्फुटम् स्पष्टरीत्या, सा अन्या वासवदत्ता-भिन्ना । अपरा काचित् भवेत् । वासवदत्ता तु क्षत्रियकन्या, क्षत्रियस्वसा । लोके संसारे परस्परगता अन्योऽन्यस्थिता, रूपतुल्यता आकृतिसादृश्यम् दृश्यते अवलोक्यते । लोके समानरूपता दृश्यते । एकस्य जनस्य आकृतिः अपरस्य नरस्य आकृतिं संवदति । अर्थान्तरन्यासालङ्कारः । अनुष्टुम् वृत्तम् ।

1. व्यक्तम्—क्रि.वि. २या; Qual. भविष्यति । वि+अञ्ज्+क्त ।

2. रूपतुल्यता—रूपयोः or रूपाणां तुल्यता इति (ष. त.)

3. परस्परगतां—परस्परं गता इति (२या तत्) How to form परस्परम्? (i) कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवत् च बहुलम् so परम् becomes परम् परम् (ii) बहुलग्रहणाद् अन्यपरयोः न समासवत्, so परं परम् and not परपरम्

(iii) असमासवद्भावे पूर्वपदस्य सुपः सुः वक्तव्यः; when no Samasabhawa, then the विभक्ति of the first part is changed to सु. So अम् of परम् the first part of परंपरम् is changed to स्. Therefore परस् + परम्=परःपरम्; by कस्कादित्वात् सत्वम्. So परस्परम्; similarly अन्योऽन्यम्.

(प्रविश्य)

प्रतिहारी—जेदु भट्टा । एसो उज्जइणीओ बह्मणो, भट्टिणीए हत्थे मम भइणिअ त्ति णासो णिक्खित्तो, तं पडिग्गहिदुं पडिहारं उवट्ठिदो। [जयतु भर्ता। एष उज्जयिनीयो ब्राह्मणः, भट्टिन्याः हस्ते भगिनिका इति न्यासः निक्षिप्तः, तां प्रतिग्रहीतुं प्रतिहारमुपस्थितः।]

Portress—Victory to my lord! Here has a Brahman of Ujjayini come to the gate to take back his sister, a deposit made by him into the hand of the queen.

राजा—पद्मावति! किन्नु स ब्राह्मणः?

King—Padmavati, Is he that very Brahman?

पद्मावती—होदव्वं। [भवितव्यम्।]

Padma—He may be.

राजा—शीघ्रं प्रवेश्यतामभ्यन्तरसमुदाचारेण स ब्राह्मणः।

King—Bring him soon with due ceremonials proper for the inner apartment.

प्रतीहारी—जं भट्टा आणवेदि। (निष्क्रान्ता). [यत् भर्ता आज्ञापयति।]

Portress—As commands Sire, (Exit).

राजा—पद्मावति! त्वमपि तामानय।

King—Padmavati, you, too, bring her.

पद्मावती—जं अय्यउत्तो आणवेदि। [यद् आर्यपुत्रः आज्ञापयति]

Padma—As orders my lord.

Notes—1. उज्जयिनीयः—उज्जयिन्यां भवः इति। उज्जयिनी + छः "गहादिभ्यश्च छः" गहादिः आकृतिगणः ।

2. भवितव्यम्—Add तेन here.

3. अभ्यन्तर etc.—Formalities to be observed when any guest is received in the lady-apartment.

(ततः प्रविशति यौगन्धरायणः प्रतीहारी च)

(Then enter Yaugandharayana and the portress)

यौगन्धरायणः—भोः ! (आत्मगतम्)

> प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं
> कामं मया कृतमिदं हितमित्यवेक्ष्य ।
> सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
> किं वक्ष्यतीति हृदयं परिशङ्कितं मे ॥ १५ ॥

Yaugan—Oh ! (to himself).

Having concealed the queen for the welfare of the King, it was done by me, of my own accord considering it to be beneficial (to our interests). Though my task has been crowned with success, still my heart apprehends as to what the King will say.

अन्वयः—नृपतेः हितार्थम् राजमहिषीम् प्रच्छाद्य मया इदम् हितम् इति अवेक्ष्य कामम् कृतम् । मम कर्मणि सिद्धे अपि नाम मे हृदयम् "असौ पार्थिवः किम् वक्ष्यति" इति परिशङ्कितम् (भवति) ।

व्याख्या—नृपतेः उदयनस्य हितार्थम् उपकारार्थम् राजमहिषीम् राज्ञीं पट्टदेवीम् वासवदत्ताम्, प्रच्छाद्य, प्रच्छन्नां कृत्वा मया यौगन्धरायणेन, इदम् स्वामिपद्मावतीपरिणयकर्म, हितम् लाभदायकम् राज्यप्राप्तिसाधकम्, इति अवेक्ष्य विचार्य, कामम् स्वच्छन्दमेव, कृतम् आचरितम् । मम कर्मणि पद्मावतीपाणिग्रहणकर्मणि

राज्योद्धारकर्मणि च सिद्धे सफले अपि सम्पन्ने अपि (गर्हायाम्) नाम असौ पार्थिवः उदयनः किं वक्ष्यति किं कथयिष्यति किं मंस्यते वा इति हेतुना मे हृदयम् चित्तम्, परिशङ्कितम् भयभीतम् संदेहयुक्तं वा भवति।

सरलार्थः—वत्सराजस्य उपकारार्थम् वासवदत्तां प्रच्छन्नां कृत्वा "अग्निदाहे सा मृता" इति प्रवादं प्रचार्य पद्मावत्या सह तस्य विवाहं संपादितवान् अहम्, अनन्तरं तस्याः भ्रातुः श्रीदर्शकस्य सैनिकसाहाय्येन नष्टप्रायं वत्सराज्यं पुनरपि अस्माभिः लब्धम्। अतः मम उद्देशः तु पूर्णः परन्तु इदं सर्वं मया स्वेच्छयैव कृतं ननु नृपानुमत्या, अतएव नाहं जाने इदानीम् असौ वत्सराजः मम स्वेच्छाचारम् श्लाघयिष्यते निन्दिष्यति वा इति चिन्तयन्मे मनः शङ्काकुलं सञ्जातम्। वसन्ततिलकंवृत्तम्।

Notes—1. हितार्थम्—हिताय इदम् इति हितार्थम् (नित्यसमासः); "अर्थेनसह नित्यसमासः विशेषलिङ्गता च" धा+क्त भावे=हितम्।

2. राजमहिषीम्—राज्ञः महिषी (ष. त.) ताम्, obj. of प्रच्छाद्य। महिषी is not in this sense, the feminine of महिष (Buffallo), it is a word, having no corresponding masculine in this sense.

3. कामम्—An adv. meaning स्वच्छन्दम् स्वेच्छया।

4. इदम् कृतम्—इदम् refers to the marriage of पद्मा with उदयन.

5. हितं इति अवेक्ष्य—Considering it to be beneficial to us in regaining our lost Kingdom of Vatsa land. My chief aim in doing all these, was the recovery of the lost Kingdom and this was possible only with the military help of the King of Magadha. This help we could get only when our King Udayana would Marry

Padmavati, the sister of the King of Magadha. But now Udayana would not marry Padma so long as his first wife Vasava would live. Therefore it was of first class political importance that Vasava should die or at least should be known to be dead to the King.

For this, I spread the bogus rumour of her death in the village fire. Later on, the King was persuaded to marry Padma, whose brother helped us much in recovering the lost Kingdom. All this I did, of my own accord. Now I realise the gravity of the situation—of concealing the queen from the King and bringing about his second marriage. I fear what he will think of my actions. Will he approve of them or denounce them ?

6. कर्मणि—भावे ७मी "यस्य च भावेन भावलक्षणम्" ।

7. पार्थिव—King. पृथिव्याः ईश्वरः इति पृथिवी + अण् ।

N. B.—It was natural for Yaugandharayan to be nervous now. He was going to be applauded or condemned for his loyal actions. In रत्नावली also, यौगन्धरायण speaks in a similar vein. "सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि, स्वेच्छाकारी भीत एवास्मि भर्तुः" ।

प्रतीहारी—एसो भट्टा । उपसप्पदु अय्यो । [एष भर्ता । उपसर्पतु आर्यः ।]

Portress—Here is the King, may your reverence approach him.

यौगन्धरायणः—(उपसृत्य) जयतु भवान्, जयतु ।

Yaugan—(Advancing). Victory, victory to Your Honour.

राजा—श्रुतपूर्व इव स्वरः । भो ब्राह्मण ! किं भवतः स्वसा पद्मावत्या हस्ते न्यास इति निक्षिप्ता ।

King—The tone seems to have been heard before. O Brahman ! Was your sister kept as a deposit in the hand of Padmavati ?

यौगन्धरायणः—अथ किम् ।

Yaug—O Yes.

राजा—तेन हि त्वर्यतां त्वर्यतामस्य भगिनिका ।

King—Then, hasten, hasten his sister.

प्रतीहारी—जं भट्टा आणवेदि । (निष्क्रान्ता)

Portress—As commands Sire. (Exit.)

(ततः प्रविशति पद्मावती, अवन्तिका प्रतीहारी च ।)

(Then enter Padmavati, Avantika and the Portress).

पद्मावती—एदु एदु अय्या, पिअं दे णिवेदेमि । [एतु एतु आर्या । प्रियं ते निवेदयामि ।]

Padma—Come, Madam, come, I shall tell you something pleasant.

अवन्तिका—किं किं ? [किं किम् ?]

Avantika—What ? What ?

पद्मावती—भादा दे आअदो । [भ्राता ते आगतः ।]

Padma—Your brother has come.

अवन्तिका—दिट्ठआ इदाणिं वि सुमरदि । [दिष्ट्या इदानीम् अपि स्मरति ।]

Avantika—Fortunately he remembers me even now.

पद्मावती—(उपसृत्य) जेदु अय्यउत्तो । एसो णासो । [जयतु आर्यपुत्रः । एष न्यासः ।]

Padma—(Advancing) Victory to my lord ! Here is the deposit.

राजा—निर्यातय पद्मावति ! साक्षिमन्न्यासो निर्यातितव्यः, इहात्रभवान् रैभ्यः अत्रभवती चाधिकरणं भविष्यतः ।

King—Return Padmavati. A deposit should be returned in the presence of witnesses. The venerable Raibhya, and this revered lady will form the Court of justice.

पद्मावती—अय्य ! णीअदां दाणिं अय्या । [आर्य ! नीयताम् इदानीम् आर्या ।]

Padma—Sir, take away the revered lady..

धात्री—(अवन्तिकां निर्वर्ण्य) अम्मो ! भट्टिदारिआ वासवदत्ता [अम्मो ! भर्तृदारिका वासवदत्ता ।]

Nurse—(Closely observing)—Oh ! Our princess Vasavadatta !

राजा—कथं महासेनपुत्री ! देवि ! प्रविश त्वमभ्यन्तरं पद्मावत्या सह ।

King—How ? the daughter of Mahasena ! Queen; enter inside with Padmavati.

यौगन्धरायणः—न खलु न खलु प्रवेष्टव्यम् । मम भगिनी खल्वेषा ।

Yaugan—No, she should not, indeed, enter in. She is, indeed, my sister.

राजा—किं भवानाह ! महासेनपुत्री खल्वेषा !

King—What do you say. She is, to be sure, the daughter of Mahasena.

Notes—1. श्रुतपूर्वः—पूर्वं श्रुतः इति श्रुतपूर्वः (सुप्सुपा समासः) 'भूतपूर्वे चरट्' इति ज्ञापकात् पूर्वशब्दस्य परनिपातः । Panini in his sutra 'भूतपूर्वे चरट्' writes the word पूर्व after भूत, so it is clear that he allows पूर्व to be used after the first word.

2. न्यासः इति—"क्वचित् निपातेनापि अभिधानम्" अभिधानमात्रे प्रथमा । we call it popularly "अव्ययवोगे प्रथमा" ।

3. त्वर्यताम्—त्वर्+णिच्+कर्मणि यक्+लोट् ताम्। भगिनिका has उक्ते कर्मणि प्रथमा।

4. प्रियम्—कर्मणि २या, कर्म of निवेदयामि or क्रियाविशेषणे २या modifying निवेदयामि।

5. ते—सम्प्रदाने ४र्थी। "क्रियाग्रहणमपि कर्तव्यम्" यथा राज्ञे निवेदयामि।

6. साक्षिमन्न्यासः—साक्षिमान् न्यासः इति (कर्मधा·) साक्षात्+इनि (साक्षात् द्रष्टरि संज्ञायाम्) = साक्षिन्, साक्षिन्+मतुप्। उक्तकर्म of निर्यातितव्यः।

7. अधिकरणम्—Court of justice. रैभ्यः अत्रभवती च अधिकरणम् भविष्यतः उद्देश्ये च विधेये विभक्तिः सदृशी भवेत्। क्वचित्तु जायते तत्र वैषम्यं लिङ्गसंख्ययोः।

यौगन्धरायणः—भो राजन्।

भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः॥ १६॥

Yaugan—Halloo! Your Majesty.

Born as you are in the family of the Bharata, you are well-disciplined, wise and pure. Therefore it does not behove you, a teacher of kingly duties, to take away perforce. (my sister).

अन्वय—भो राजन्! त्वम् भारतानां कुले जातः, विनीतः ज्ञानवान् शुचिः असि तत राजधर्मस्य देशिकः (सन्) बलात् (मम भगिनीम्) हर्तुम् न अर्हसि।

व्याख्या—भो राजन्! हे नृप! भारतानाम् भरतवंश्यानाम् पाण्डवानां कुले वंशे, जातः समुत्पन्नः, अर्जुनतनयात् अभिमन्योः पञ्चविंशः पुरुष उदयनः इति विष्णुपुराणम्। विनीतः सविनयः सुशिक्षितः वा ज्ञानवान् प्रज्ञावान्, शुचिः शुद्धचरित्रः असि इति शेषः तत तस्मात्कारणात्, राजधर्मस्य नृपतिपालनीयस्य आचारस्य

प्रजापालनधर्मस्य देशिकः उपदेशा, प्रवर्तनाचार्य सन् बलात् प्रसभम् मम भगिनीम् इमाम् हर्तुम् आदातुम्, न अर्हसि युज्यसे।

सरलार्थः—हे नृपते ! भवान् प्रख्याते पाण्डववंशे जातः सुशिक्षितः, प्रज्ञावान् शुद्धशीलश्च अस्ति। भवतः एव सर्वे नृपाः लोकाचारान् प्रजापालनोपद्धतिं वा शिक्षन्ते; ते सर्वे भवतः चरितम् अनुकुर्वन्ति अतःनेदमुचितं यत् भवान् मम भगिनिकां बलात् अपहरेत् स्वान्तःपुरं च प्रवेशयेत्। अनुष्टुप् वृत्तम्। स्वाभिप्रायविशेषणत्वात् परिकरालंकारः बलात् हरण प्रतिहेतुत्वात् काव्यलिङ्गं च।

Notes—1. भारतानाम्—षष्ठीशेषे, भरतस्य गोत्रापत्यानि पुमांसः भरत+अञ = भारताः, तेषाम्। "उत्सादिभ्योऽञ्"—Yaugan appeals to the exalted birth of the King. You are born in the illustrious family of King Bharata, son of Dusyanta and Sakuntala, after whom our Motherland is named भारतवर्ष. You are moreover विनीत, not only that, ज्ञानवान् also. Your character also is all pure and above all you are राजधर्मस्य देशिकः So with all these good traits in you, it does not behove you to take away perforce my sister.

2. बलात्—हेतौ ५मी, बलमाश्रित्य "ल्यब्लोपे कर्मणि अधिकरणे" च पञ्चमी।

3. राजधर्मस्य—शेषषष्ठी connected with देशिकः। राज्ञः धर्मः इति (ष. त.)।

4. देशिकः—(i) दिश्यते इति देशः precept, counsel दिश् +घञ् (कर्मणि); देशेन आचरति इति देश+ठक्=देशिकः; (ii) देशः उपदेशः अस्यास्ति इति देश+ठन्=देशिकः। You are the teacher of the laws of good conduct and morality to all other kings, so you yourself should not violate

them. We can't derive दैशिक from root दिश् by adding ण्वुल् to it, दिश्+ण्वुल् is देशकः as in उपदेशकः ।

N.B.—भारतकुलजन्म, विनीतः ज्ञानवान्, and शुचिः राजधर्मस्य दैशिकः all these epithets have been used with a clear purpose, therefore परिकरालङ्कारः साभिप्रायविशेषणत्वात् । Moreover all these qualifications of yours, taken singly and jointly, donot permit you to take away my sister. So काव्यलिङ्गलंकारः ।

राजा—भवतु, पश्यामस्तावद् रूपसादृश्यम् । संक्षिप्तेतां यवनिका ।

King—All right, we shall then examine the resemblance of appearance. Draw the curtain.

यौगन्धरायणः—जयतु स्वामी ।

Yaugan—Victory to our master.

वासवदत्ता—जेदु अय्यउत्तो । [जयतु आर्यपुत्रः ।]

Vasava—Victory to my lord.

राजा—अये असौ यौगन्धरायणः, इयं महासेनपुत्री ।

किंनु सत्यमिदं स्वप्नः सा भूयो दृश्यते मया ।
अनयाप्येवमेवाहं दृष्टया वञ्चितस्तदा ॥ १७ ॥

King—*Oho* ! This is Yaugandharayana and this is Mahasena's daughter. Is it a truism (true reality) or a dream that she is again seen by me. In the same way I was deceived at that time also by her though seen.

अन्वयः—किम् नु इदम् सत्यम्, (उत) स्वप्नः (यत्) सा मया भूयः दृश्यते । अहम् तदा अपि दृष्टया अनया एवम् एव वञ्चितः ।

व्याख्या—किं नु प्रश्ने वितर्के वा, इदम् दर्शनम्, सत्यम् यथार्थम् उत स्वप्नः स्वप्नवत् अयथार्थम् यत् वासवदत्ता, मया उदयनेन भूयः पुनरपि, दृश्यते अवलोक्यते । अहं तदा अपि समुद्रगृहशयनकाले अपि दृष्ट्या अवलोकित तया अनया वासवदत्तया, एवमेव, अनेनैव प्रकारेण, वञ्चितः प्रतारितः छलितः । सरलार्थः—किमहं सत्यमेव अधुना वासवदत्तां पश्यामि उत स्वप्ने तां पश्यामि। पुरा राजगृहे मम इवशुरालये पद्मावत्याः शयनगृहे शयनकालेऽपि अहं वासवदत्तां दृष्टवान् । परन्तु पश्चात् विदूषकमुखात् ज्ञातं मया यत् अयं स्वप्नः आसीत्, न तु सा मया यथार्थतः दृष्टा । तदाहम् अनेन एव प्रकारेण तया विप्रलब्धः । किमधुनापि अहं तया छलितव्यः ?

Notes—1. रूपसादृश्यम्—रूपस्य सादृश्यम् तुल्यता इति । (ष. त.); सदृश+ष्यञ् The King wants to examine her resemblance and so he orders that यवनिका should be drawn aside. Ladies are standing probably behind the screen, so the King wants the removal of the curtain, so that he may personally mark the resemblance of the face of that lady to Vasavadatta.

2. यवनिका—Curtain, hung to screen the ladies. Some commentators take it so mean 'veil', but that is not possible, for if she was all veiled, then how did the nurse recognise her when her veil was not removed ? वासवदत्ता was behind the curtain, the nurse went inside the curtain and exclaimed "Oh ! She is our Princess Vasava." Moreover the King says, संक्षिप्यतां (संक्षेप्यतां) यवनिका i.e. यवनिका was expanded, it was ordered to be drawn.

3. जयतु स्वामी; जयतु आर्यपुत्रः—यौगन्ध and वासव doff their disguise and hail the King warmly.

4. किं नु—An adv. denoting वितर्क (doubt). The King does not believe his eyes. He gives reason for this.

5. इदम्—My seeing her ; whether I have actually seen her or I have seen again a day dream.

6. तदा वञ्चितः—I was deceived similarly when I was sleeping at Rajagriha in Padmavati's Ocean Pavilion. Shall I be again deceived by her ? The reference is to " Dream scene " in Act V where Vasava replaces King's hand and vanishes away, the King only catching a passing glimpse of her face.

यौगन्धरायणः—स्वामिन् ! देव्यपनयनेन कृतापराधः खल्वहम् तत् क्षन्तुमर्हति स्वामी । (इति पादयोः पतति)

Yaugan—My lord, I have, indeed, committed a crime by removing the queen (from you). Therefore it behoves my lord to pardon me. (Thus he falls at the King's feet.)

राजा—(उत्थाप्य) यौगन्धरायणो भवान् ननु ।

मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः ।
भवद्यत्नैः वयं मज्जमानाः समुद्धृताः ॥ १८ ॥

King—(Raising). You are really Yaugandharayan. By your pretended lunacy, by your battles, by your counsels supported by Shastras—thus, indeed, by these efforts of yours, we have been saved from being drowned (in the ocean of calamities).

अन्वय—मिथ्योन्मादैः च, युद्धैः च, शास्त्रदृष्टैः मन्त्रितैः च (एतैः) भवद्यत्नैः वयम् खलु मज्जमानाः समुद्धृताः ।

व्याख्या—मिथ्योन्मादैः कपटोन्मादचेष्टितैः, यथा पुरा उज्जयिनी कारागारात् मम मोचनकाले, युद्धैः समरैः शत्रुभिः सह युद्धैः इतिभावः, शास्त्रदृष्टैः शास्त्रानुमोदितैः शास्त्रसम्मतैः मन्त्रितैः मन्त्रणाभिः उपदेशैः वा, एतैः भवद्यत्नैः भवतः प्रयासैः उद्योगैः वयम्, खलु यथार्थतः, मज्जमानाः विपत्सागरे निमज्जन्तः समुद्धृताः, रक्षिताः उज्जीविताः।

सरलार्थः—भवान् यथार्थतः चरितार्थनामा यौगन्धरायणः। न हि भवान् अपराधं कृतवान्, परम् अस्माकं हितमेवाचरितवान् भवान् मिथ्योन्मादमिषेण अस्मान् उज्जयिनीकारागारात् उद्धृतवान्। अनन्तरं यदा वयं प्रद्योतसैनिकैः अनुसृताः तदा तैः सह युद्धं कृत्वा अस्मान् रक्षितवान्येन वयं सकुशलं स्वराज्यमागन्तुं समाः अभवाम्। न केवलमेकदैव, परन्तु अनेकशः शत्रुभिः सह युद्ध्वा अस्माकं हितं विहितवान्। शान्तिकाले सदा सुमन्त्रितैः अस्माकं राज्यशासनं चालयतिस्म। इत्थं भवान् स्वप्रयासैः विपत्सागरे मज्जनाम् अस्मान् बहुशः रक्षितवान्। अहो! कथं वयं भवतः कृतज्ञां विस्मर्तुं शक्नुमः। महता सौभाग्येनैव भवादृशः मंत्री लभ्यते।

Notes—1. मिथ्योन्मादैः—मिथ्या Adv. false; मिथ्या उन्मादः इति (सुप्सुपा समासः, तैः ; उद्+मद्+घञ् (मदोऽनुपसर्गे अप्)=उन्मादः, कपटी दशा। When Udayana was captured through wooden elephant by Mahasena and interned at Ujjayini, then Yaugan disguised himself as mad and Rumanvan was disguised as a Buddhistic monk and Basantaka as a clown. They intered Ujjayini, and contrived to effect the release of the King from the prison and when Udayana, flying, on the elephant with Vasavadatta was hotly chased by Mahasena's army, Yaugan and others put off their guise and drew their swords and gave battle to the pursuers to the result that

Udayana could get time to escape safely to his Kingdom." This story should be looked for in Pratigna Yaugandharayanam "प्रतिज्ञायौगन्धरायणम्" ।

2. युद्धैः—युध्+क्त (भावे) = युद्धम् तैः (करणे ३या) This Brahman minister (ब्राह्मण) was not only a councillor but a good general as well. In time of need, he used to fight personally also in the battle. He fought with Mahasena's army at Ujjain, and again with Arunni and other enemies of King Udayana. He was a true Bhumihar Brahman (ब्राह्मण)

3. शास्त्रदृष्टैः—Qual. मंत्रितैः; शास्त्रेषु दृष्टानि इति शास्त्रदृष्टानि (७मी तत्) तैः । Your Counsels were always in accordance with नीतिशास्त्र and न्यायशास्त्र । So sound counsels. मन्त्र + णिच् + क्त (भावे) = मंत्रितम्—Counsel, advice. करणे ३या । Here your concealing Vasava to form political alliance with मगधराज for regaining the lost Kingdom.

4. भवद्यत्नैः—भवतः यत्नैः (ष. त.) तैः । करणे ३या ।

5. मज्जमानाः—विपत्सागरे मज्जमानाः । मस्ज् + चानश् । (ताच्छील्ये) = मज्जमानः (ताच्छील्यवयोवचनशक्तिषु चानश्) मस्ज् is तुदा. परस्मै. मज्जति, so शतृ should come after it and we expect here मज्जन्तः वयम् from मज्जत् । Therefore we should add चानश् in ताच्छील्य sense by the above rule which avoids लकारमात्र and is added even in परस्मैपदी root. (तत्त्वबोधिनी) We find निमज्जमान used in old literature, e. g., "निमज्जमानंव्यसनैरमिदंतम्" महाभारतस्य सावित्र्युपाख्यानम्; so we can call it an आर्ष or शिष्टप्रयोगः ।

6. समुद्धृताः— We have been saved from being

drowned in the ocean of calamities. Our Kingdom was almost lost. I was ousted, but through Yaug's wise policy, I have got my deliverance from all these troubles.

N. B.—This verse is full of reference to the previous actions of Yaugan. These references should be well noticed in this book as well as in प्रतिज्ञानाटकम्। Mr. Kale is hopelessly mistaken in understanding the meaning of मिथ्योन्मादैः। It refers to the pretended lunacy of यौग at Ujjain to rescue the King and not to the King's own lamentations at the rumoured death of Vasava.

यौगन्धरायणः—स्वामिभाग्यानामनुगन्तारो वयम्।

Yaug—We are the followers of the fortunes of our lord.

पद्मावती—अम्महे! अय्या क्खु इअं। अय्ये! सहीजणसमुदाआरेण अजाअन्तीए अदिक्कन्दो समुदाआरो। ता सीसेण पसादेमि। [अम्मो! आर्या खलु इयम्। आर्ये! सखीजनसमुदाचारेण अजानन्त्या अतिक्रान्तः समुदाचारः। तत् शीर्षेण प्रसादयामि।] (पादयोः पतति)

Padma—O, ho, she is, indeed, the noble lady. Madam, I have transgressed the bounds of decorum, by treating you unknowingly like a friend. So I propitiate you by bowing down to you...(falls at her feet).

वासवदत्ता—(पद्मावतीमुत्थाप्य) उट्ठेहि उट्ठेहि अविधवे। उट्ठेहि। अत्थिसम्मं णाम शरीरं अवरज्झइ। [उत्तिष्ठ उत्तिष्ठ। अविधवे। उत्तिष्ठ अर्थिसं नाम शरीरम् अपराध्यति।]

Vasava—(Raising Padmavati). Get up, get up. O blessed wife, get up. This body, (my body), the property (deposit) of the Brahman supplicant, is at fault (and not you).

पद्मावती— अणुग्गहिदह्मि । [अनुगृहीतास्मि ।]

Padma—I am beholden to you.

राजा—वयस्य ! यौगन्धरायण ! देव्यपनये का कृता ते बुद्धिः ?

King—Friend Yaugandharayana, what was your object in removing the Queen ?

यौगन्धरायणः—कौशाम्बीमात्रं परिपालयामीति ।

Yaugan—Because I rule over Kausambi only.

राजा—अथ पद्मावत्याः हस्ते किं न्यासकारणम् ?

King—And what was the cause of your depositing (the queen) in the hand of Padmavati ?

यौगन्धरायणः—पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति ।

Yaugan—Because it was foretold by the soothsayers Puspaka, Bhadra and others that she was to be the queen of our lord.

राजा—इदमपि रुमण्वता ज्ञातम् ?

King—Was this, also, known to Rumanvan ?

यौगन्धरायणः—स्वामिन् ! सर्वैरेव ज्ञातम् ।

Yaugan—My lord, it was known to everybody.

राजा—अहो शठः खलु रुमण्वान् ।

King—Oh ! What a rogue, indeed, Rumanvan is !

यौगन्धरायणः—स्वामिन् ! देव्याः कुशलनिवेदनार्थमद्यैव प्रतिनिवर्ततामत्रभवान् रैभ्योऽत्रभवती च ।

Yaugan—Your Majesty, His Reverence, the noble Raibhya and her ladyship should return just to-day to communicate the news of the well-being of the queen.

राजा—न, न । सर्व एव वयं यास्यामो देव्या पद्मावत्या सह ।

King—No, no all of us will go there along with queen Padmavati.

यौगन्धरायणः—यदाज्ञापयति स्वामी ।

Yaugan—As commands Your Majesty.

Notes—1. स्वामिभाग्यानाम् etc.—This shows the loyalty of यौगन्ध who identifies his own interests with those of the King. We find similar fidelity on the part of अमात्यराक्षस in मुद्राराक्षसम्। कर्मणि षष्ठी by कर्तृकर्मणोः कृति : in connection with अनुगन्तारः। अनु+गम्+तृच्। We can't have तृन् for that would cause द्वितीया in भाग्यानाम् by नलोकाव्यय etc., the sense is संपदि विपदि वा स्वामिनमनुयास्यामहे।

2. सखीजनसमुदाचारेण—सखी एव जनः सखीजनः (मयूरव्यंसकादित्वात् समासः सच रूपकरूपः इति शेखरे नागेशः); सखीजनोचितः समुदाचारः (मध्यमपदलोपी) सखीजनसमुदाचारः, तेन हेतौ तेया। हेतुः अजानन्त्या। I treated you like my सखीजन but I did so unknowingly (अजानन्त्या) ज्ञा+शतृ+जानत्, स्त्रियां ङीप्=जानती, न जानती, अजानती (नञ्तत्) तया।

3. अतिक्रान्तः समुदाचारः—The etiquette was violated. The bounds of decorum were overstepped. Mark well the nobility of mind of Padma. It is the first time that she has the actual knowledge of the fact that the lady with her is none else than her own rival co-wife and still she does not feel jealous at all. She is rather sorry for not having treated Avantika as her superior sister and so she asks for her pardon by falling at Vasava's feet (शीर्षेण प्रसादयामि)।

4. अविधवे!—न विधवा इति अविधवा (नञ्तत्) विगतः धवः स्वामी यस्याः सा विधवा (प्रादितत्) This term is used in addressing a fortunate wife "भर्तुर्मित्रं प्रियमविधवे! विद्धि मामम्बुवाहम्" उ. मेघ.

4. अर्थिस्वम्—अर्थिनः स्वम् (धनम्) इति (ष. तत्), it is in case in apposition with शरीरम् । This line is variously interpreted. (i) This body of mine, falsely presented to you as the property (deposit) of the suppliant, was at fault. She means to say my body pointing to her own body was deposited with you like a property by the Brahman beggar and so you did not know me to be Princess Vasavadatta; hence you treated me in that way. So my body placed as न्यास by यौगन्ध is at fault, and not you.

(ii) Mr. G. P. Shastri interprets differently :—" Your body, the property of the supplicants, has committed the offence ! No, impossible it is. You have not offended *i. e.* you placed yourself at my disposal and so you offended me etc. ! How can it be ?

5. देव्यपनये का कृता ते बुद्धिः—What motive did you have in removing queen Vasavadatta ?—देव्याः अपनयः इति (ष. त.) तस्मिन् (अधिकरणे ७मी) अप+नी+अच् (एरच्) अपनय ते means here त्वया—" ते मे शब्दौ निपातेषु" वामन—२-१ । त्वया मया इत्यस्मिन् अर्थे ते-मे शब्दौ निपातेषु द्रष्टव्यौ । It is an irregular word (निपात) तद् मे यदुक्तमशिवं नहि तत् क्षमं ते उ. रा. अ. १४ ।

6. कौशाम्बीमात्रम्—कौशाम्बी एव इति कौशाम्बीमात्रम् (मयूरव्यंसकादित्वात् नित्यसमासः) He means I did all this to enable myself to rule over the whole kingdom of Vatsa, which I at first practically governed as your trusted Prime Minister. Our kingdom had dwindled into a small one and we were, practically speaking, ruling over the capital town of Kaussambi only, the

rest of the kingdom being snatched away by the enemies. Udayana was ruling over the town of कौशाम्बी only like the later Mugals ruling over the town of Delhi only.

7. पुष्पकभद्रादिभिः—पुष्पकभद्रः आदिः येषां ते पुष्पकभद्रादयः (ब. व्री.) तैः Qual. आदेशिकैः ।

8. आदेशिकैः—अनुक्ते कर्त्तरि ३या of आदिष्ट, आदेशेन चरति इति आदेश fore-tellings ठक् आ+दिश्+घञ्=आदेशः ।

9. स्वामिनो देवी भविष्यति—इति—"Because the fortunetellers said Padmavati shall be wedded to Your Majesty". This sentence is very suggestive (i). Padma surely shall be the wife of Your Majesty and there is no harm in placing your wife under your other wife. (ii) Padma would bear testimony of Vasava's chastity, being her constant companion. See Act I. 11. ततः प्रतिष्ठिते स्वामिनि तत्रभवतोऽनुपनयतो मे इहात्रभवती मगधराजपुत्री विश्वासस्थानं भविष्यति । (iii) Being a Princess Vasava was accustomed from her very birth to enjoy all sorts of comforts of life. So being placed in the royal palace of Magadha, Vasava being in the constant company of princess Padma won't suffer from wants of comforts of life. (iv) Vasava would have a good chance of studying the nobility of the character of Padma to be a fit consort of king Udayana's.

(V) Vasava would conceive, there by, a sisterly affection for Padma, though she was to be her rival in the love of her husband.

All the motives of Yaugan were very satisfactorily served and both the queens acquitted themselves nobly.

By their self-denial (त्याग) and not by their principle of enjoyment of the luxuries of life alone (भोग) they conduced much to the happiness of the life of King Udayana.

10. शठः खलु रुमण्वान्—उदयन calls रुमण्वान् of course humurously a शठ a rogue, a clever cheat; for he did not give him the slightest hint about the diplomatic and political plan of Yaugan, though he knew all about it. He kept the King under delusion that Vasava was really consumed by fire so much so that he lamented and lamented equally well with the king over Vasava's rumoured death vide अनाहारे तुल्यः प्रततरुदित क्षामवदनः etc., 'नृपः यदि सदृयः प्राणान् त्यजति तस्याप्युपरमः' Act I. 14.

11. कुशलनिवेदनार्थम्—कुशलस्य निवेदनम् (ष. त.); कुशलनिवेदनाय इदम् इति नित्यसमासः "अर्थेन नित्यसमासः विशेषलिङ्गता च वाच्या"।

12. देव्या पद्मावत्या सह यास्यामः—The king means to say "At such a time of rejoicings, we all should go to pay our respect to the parents of Vasava. They shall be very pleased to see Vasava safe and sound and would greatly admire her self-sacrifice for the cause of my welfare. They will be further delighted to see Padmavati who befriended Vasava when she was living separated from me for the sake of my welfare and who is really speaking Vasava's धर्मभगिनी। So let us all go to Ujjain along with Queen Padmavati."

भरतवाक्यम्

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ।। १९ ।।

(निष्क्रान्ताः सर्वे)

इति षष्ठोऽङ्कः । समाप्तमिदं स्वप्नवासवदत्तं नाम नाटकम् ।

May our lion-like King rule over the earth, bounded by the oceans, encircled by the Himalayas and the Vindhyas, and marked by this single royal umbrella.

(Exeunt all.)

End of Act VI.

Here Ends The Play Swapnavasavadattam.

अन्वयः—नः राजसिंहः इमाम् सागरपर्यन्ताम् हिमवद्विन्ध्य-कुण्डलाम् एकातपत्राङ्काम् महीम् प्रशास्तु ।

व्याख्या—नः अस्माकम् राजसिंहः राजा सिंहः इव राजसिंहः नृपव्याघ्रः इमाम् अस्माभिः अध्युषिताम्, सागरपर्यन्ताम् समुद्रपर्यन्तविस्तृताम् हिमवद्विन्ध्यकुण्डलाम् हिमवान् च विन्ध्यः च हिमवद्विन्ध्यौ तौ कुण्डले कर्णभूषणे यस्याः सा, ताम् एकातपत्राङ्काम् एकम् अद्वितीयम् आतपत्रम् राजच्छत्रम्, एकातपत्रम् अङ्कः लाञ्छनं यस्याः, ताम् एकेनैव राजच्छत्रेण, शासिताम् महीम् आर्यावर्तरूपाम् पृथिवीम् प्रशास्तु राज्यं करोतु ; अर्थात् अस्याः कृत्स्नायाः भुवः स्वामी भूयात् ।

सरलार्थः—अस्माकं नृपः (उदयनः) अस्मिन् आर्यावर्त्ते शासनं करोतु, यः आर्यावर्तः पूर्वापरौ तोयनिधीवगाह्य स्थितः यः वङ्गोपसागरात् अरबसमुद्रपर्यन्तं विस्तृतः यस्य, उत्तरस्यां हिमाचलः दक्षिणस्यां च विन्ध्याचलः कुण्डलरूपेणशोभेते । तस्मिन् आर्यावर्ते अस्माकं राज्ञः उदयनस्य एकच्छत्रम् राज्यं भूयात् ।

Notes—1. राजसिंहः—राजा सिंहः इव (उपमितकर्म.) उपमितंव्याघ्रादिभिः सामान्यप्रयोगे ।

2. सागरपर्यन्ताम्—सागराः पर्यन्ताः सीमानः यस्याः ताम् (ब. व्री) महीम् ।

3. हिमवद्विन्ध्यकुण्डलाम्—हिमवान् च विन्ध्यश्च इति हिमवद्विन्ध्यौ (द्वन्द्वः) हिमवद्विन्ध्यौ कुण्डले यस्याः ताम् (ब. व्री.) हिमवद्विन्ध्यकुण्डलाम् Qual. महीम्।

4. एकातपत्राङ्काम्—एकम् आतपत्रम् एकातपत्रम् (कर्मधा.) by पूर्वकालैकसर्वजरत्पुराणनवकेवलाः अनेन संख्यावाचकः एक-शब्दः कर्मधारये समस्यते।

एकातपत्रम् अङ्कः चिह्नं लांछनं यस्याः ताम् एकातपत्राङ्काम् (ब. व्री) Qual. महीम्. एकातपत्रम् जगतः प्रभुत्वम् R. II. Sovereignty over the earth. Where our King may rule as an unrivalled monarch.

5. महीम्—कर्मणि २या, कर्म of प्रशास्तु।

6. प्रशास्तु—प्र+शास् अदा. पर. लोट् तु शास्ति शशास अशिषत्। Mark the conjugation.

N. B.—राजसिंहः—A compliment to the reigning King. No particular King seems to have been meant here. Does this refer to any particular King or is it a general epithet applying to any King? Historians have been searching for the identify of राजसिंह and fortunately one राजसिंह of पाण्ड्य family said to have been ruling in the Deccan in the 3rd Century A. D. has been found out. Was it then that the drama was written under him? As yet scholars hold that राजसिंहः does not mean any proper name, it is a general epithet used for any great King राजसिंह इव (श्रेष्ठः). So no clue as to the date of the book can be hazarded on this score.

7. भरतवाक्यम्—The final benediction in a play; the final chorus. It is a stanza, containing an expression of the good wishes and is recited by the actors.

(भरतः) "देवद्विजनृपादीनां प्रशस्तिः स्यात्प्रशंसनम्"—Bhasa's play end, like all other later plays with भरतवाक्यम्, but his भरतवाक्यम् is very simple and short, it is unlike the भरतवाक्यम् of later plays. Where we find किमविभूयः प्रियंकरोमि किं ते भूयः प्रियमुपहरामि, किमतः परमपि प्रियमस्ति, तथापीदमस्तु ।

This श्लोक occurs, sometimes with slight change, in other plays of Bhasa as well. It is found in प्रतिज्ञा-यौग० VI. 26 ; पञ्चरात्रम्. III. 26 ; दूतवाक्यम् V. 56 ; बालच V. 20 ; A.VI. VI. 22 ; Abhi. VI. 35.

8. समाप्तमिदं स्वप्नवासवदत्तंनाम नाटकम्—The name of this book does not occur in the prologue (प्रस्तावना) of this book as is the case with other dramas written after him. But the name is given out in the last closing sentence as here. He gives out the names of his works in their last closing sentence. This seems to be his special characteristic. In no drama of his, the name of the book is given in the प्रस्तावना ।

Appendix (A).

Peculiar Grammatical Uses of Bhasa.

आपृच्छामिभवन्तौ ।	A. I.
विनयादपेतपुरुषः ।	"
सुखमर्थोभवेद्दातुं etc. ।	"
नश्लिष्यते मे मनसि ।	"
देशागतप्रत्ययाः ।	"
प्रचितपतितबन्धुजीवकुसुमं etc. ।	A. IV.
बाष्पाकुलपटान्तरितं ।	"
मधुकरपरिनिलीनाम् ।	"
स भूयोऽवचित्य ।	"
मेदानीमन्यथाचिन्तयित्वा ।	"
मेदानीं भवाननर्थं चिन्तयित्वा ।	A. V.
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् ।	A. IV.
सम्बन्धिराज्यमिद मेत्य महान प्रहर्षः स्मृत्वानृपसुतानिधनं विषादः	A. VI.
आर्यपुत्रेणेदागत्येमांकुसुमसमृद्धिंदृष्ट्वा etc. ।	A. IV.
अर्धमनःशिलापट्टकैश्च पूरितं मेऽञ्जलिम् ।	A. IV.
कः कालः त्वाम् अन्विष्यामि ।	A. III, A. IV.
धरते खलु वासवदत्ता ।	A. V.

N. B.—For the correct explanations, consult notes.

Appendix (B).

The Subbhasitas Occurring in the Play.

अकरुणाः, खल्वीश्वराः । III.

अनतिक्रमणीयोहिविधिः । III.

अविज्ञातानि दैवतान्यवधूयन्ते । I

अविचार्य कर्म न करिष्यति । I
अज्ञातवासोऽपि बहुगुणः सम्पद्यते । IV
अयुक्तं परपुरुषकीर्तनं श्रोतुम् । III.
अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणाकथम् । VI
आगमप्रधानानि सुलभ पर्यवस्थानानि महापुरुष हृदयानि भवन्ति । II
एवं तुलोकस्तुल्यधर्मायितानां कालेकालेछिद्यतेरुह्यते च ।
कः कं शक्तोरक्षितुं मृत्युकाले ।
कालः क्रमेण जगतः परिवर्तमाना चक्रारपंक्तिरिवगच्छतिभाग्य पंक्तिः । I
कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते । VI
गुणानां च विशालानां etc. । IV
तथा परिश्रमः परिखेदं नोत्पादयति यथायं परिभवः । I
तपो वनानि नाम अतिथिजनस्य स्वगेहम् । I
तस्मिन् सर्वमधीनं हि यत्राधीना नराधिपाः । I
दत्तं वेतनं परिखेदस्य । IV
दुःखंत्यक्तुं बद्धमूलोऽनुरागः । IV
धन्या खलु चक्रवाकवधूर्यान्योऽन्यविरहिता न जीवति । III
न यदपमाश्रमवासिषु प्रयोज्यम् । I
न हि सिद्धवाक्यान्युत्क्रम्य गच्छतिविधिः सुपरीक्षितानि । I
परस्परगतालोकेदृश्यते तुल्यरूपता ।
प्रद्वेषोबहुलो वा संकल्पोदुपजायते । I
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते ।
प्राणी प्राप्यरुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति । V
यात्रात्वेषु यद्विमुच्येतवाष्पं प्राप्तानृण्या यातिबुद्धिप्रसादम् । IV
रज्जुच्छेदे के घटं धारयन्ति । IV
सत्कारोहिनाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयति । IV
सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्यः एव भवति । IV

सर्वजनमनोऽभिरामं खलु सौभाग्यं नाम । II
सर्वजनसाधारणमाश्रमपदं नाम । I
सविज्ञानमस्य दर्शनम् । I
स्वाश्रमभ्यासो नियातयितव्यः । V
सुखंनामपरिभूतमकल्पवर्त्तं च ।
स्त्रीस्वभावस्तु कातरः ।

Appendix (C).

Questions with Answers.

(1) Describe the plot of Svapnavasavad attam. (See Introduction).

(2) What are the probable sources of the plot of S. V. D.? (See Introduction).

(3) What special peculiarities are found in the structure of S. V. D.? (See Introduction Mutual resemblance M. V.

(4) Why is the drama called Svapna-Vasavadattum? (See Introduction title of the play).

(5) Describe the characters of Udayana, Vasavadatta, Padmavati, Basantaka and Yaugandharayana. (See Introduction).

(6) Compare and contrast the characters of Vasavadatta and Padmavati. (Consult Introduction).

(7) Why is a Brahmachari introduced in the 1st Act? (See Appreciation of S. V. D. Introduction).

(8) Discuss what dramatic purpose is served by the burning of the village Lavanaka? (1932 S.)

N B.—It enables the Prime Minister to conceal Vasavadatta for the smooth working of his plan. The queen being burnt to death the King being consoled in course would Marry another wife which he was not willing to do in the life time of his beloved Vasavadatta whom he loved so dearly. Moreover the King of Magadha also in case of the death of the previous wife of Udayana, would marry unhesitatingly his sister to

Udayana as he had refused, according to Kathasaritsagar, to marry him as he loved Vasavadatta very greatly.

(9) Why and how does Yaugandharayana Marry Padmavati ? (1938 S.) (See Introduction Plot of S. V. D.)

(10) Who was Udayana ? (1936 S.) (See Intro. Character of Udayana).

(11) Discuss that Yaugandharayana is the central figure in the drama. (See Intro. Character).

(12) Describe how Vasavadatta was recognised in the sixth Act or Describe the 'Meeting Scene.' (36. A.) (See Intro. Plot).

(13) Describe the (Dream-Scene) and discuss its importance in the drama. (Consult Intro. why called स्वप्ननाटकम्).

(14) Discuss the date of Svapnanataka. (31-A). (See Introduction).

(15) Define विष्कम्भक, प्रवेशक, सूत्रधार and प्रस्तावना (See notes on these words in proper play).

(16) Write notes on the style of Bhasa. (See Introduction).

(17) Localise राजगृह, कौशाम्बी, वत्सराज, अवन्ति. (See Appendix Geography).

(18) How does Bhasa's story differ from that of बृहत्कथा as preservd in Kathasaritsagar ? (See Introduction-Sources of Bhasa's plays.)

(19) Note down some grammatical mistake of Bhasa's writing. Can you justify them ? (See Appendix A).

(20) Quote some of the good sayings of Bhasa's. (See Appendix B).

(21) Important verses are very many. As the verses are not many, only 58 in number almost all with a very few exceptions of third rate importance have been set in the University examinations. All the Prakrit passages, containing more than one line are important. Students should try to prepare, therefore all.